अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिक पत्रम्)

पञ्चमवर्षे प्रथमोऽङ्कः

१५ जनवरी १९८३

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः,

सांख्ययोगाचार्यः

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

परामर्शदातृमण्डलम्

(१) डा० रामसुरेशपाण्डेय: (२) डा० कृष्णकान्त शुक्ल:

(३) डा० उमाकान्त शुक्ल: (४) डा० सुलेख चन्द्र शर्मा

विषय-सूची

विषय:	लेखक :	
१. सम्पादकीयम्		१-२
२. *Editional*		३-४
३. पं० टी०वी० परमेश्वर अय्यर प्रणीतानि स्तवकाष्टके वर्गीकृतानि चतुस्त्रिंशदष्टकानि	पं० टी.वी. परमेश्वर अय्यर:	५-६४
४. "एक विश्वास और" इत्येतस्मिन् काव्ये मामकीनो विचार:	आचार्यरमेशचन्द्रशुक्ल:	६५-६८
५. देववाणी-परिषद्वार्ता	श्रीमती रमा शुक्ला	६९-७२

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् *Rs. 20.00* (भारते)

पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription

Rs. 20.00 (In India)

5 Dollars or 2 Pounds (Abroad)

'देववाणी-परिषद, दिल्ली'-कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नई दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६, वाणी-विहार, नयी दिल्ली-११००५९' त: प्रकाशितम्-अर्वाचीनसंस्कृतम् (५/१) । प्रधान सम्पादक:— डा० रमाकान्त शुक्ल: । प्रकाशनतिथि: १५-१-१९८३ ।

सम्पादकीयम्

'अर्वाचीनसंस्कृतम्' अनेनाङ्केन पञ्चमं वर्षं प्रविशति। अस्मिन्नङ्के पण्डित टी० वी० परमेश्वरअय्यररचितानां किञ्च अष्टस्तबकेषु वर्गीकृतानां चतुस्त्रिंशत्संख्याकानामष्टकानां प्रकाशनं क्रियते। अस्माभिरर्वाचीनसंस्कृतस्य १९८१ तम वर्षीयेऽङ्कद्वये श्रीअय्यरमहोदयस्य 'सदाशयसमुच्चयस्य' 'आभाणक-मञ्जर्या'श्च प्रकाशनं कृतमासीत्। तत्रैतेषां परिचयोऽपि दत्त आसीदतस्तदर्थं तदङ्कद्वयं विलोकनीयम्। तत्रैवास्माभिः 'साहित्यकौतुकम्' इति नामाऽस्य महानुभावस्य ग्रन्थः संकेतित आसीत्। तस्यैवेदानीं परिवृद्धिं गतस्य ग्रन्थस्य सहिन्द्यांग्लभाषानुवादं प्रकाशनं देववाणी-परिषदद्यत्वे समनुतिष्ठति। अस्माकं पाठकाः मूलमात्रं पूर्वमेव द्रष्टुमवसरं लभेयुरित्याकांक्षया तस्याष्टकानामत्र प्रकाशनं क्रियते।

अत्र स्तबकानामष्टके शार्दूलविक्रीडिते रचितानि चतुस्त्रिंशत्संख्याकानि अष्टकानि सङ्कलितानि। तद्यथा—(१) प्रार्थनास्तबके—१. श्रीरुद्राष्टकम्, २. श्रीकृष्णाष्टकम्, (२) देशीयस्तबके—३. श्रीभद्भारताष्टकम्, ४. राष्ट्र-नेत्रष्टकम् ५. सैनिकाष्टकम्, ६. विद्वदष्टकम्, ७. भिक्षुकाष्टकम् (३) प्रेरकस्तबके—८. द्रविणाष्टकम्, ९. वस्त्राष्टकम्, १०. भोजनाष्टकम्, ११ वेश्माष्टकम् (४) महापुरुषस्तबके—१२. खिस्तुदेवाष्टकम्, १३. श्रीकालिदासाष्टकम्, १४. श्रीरामाष्टकम्, १५. श्रीगान्ध्यष्टकम्, १६. श्री-दयानन्दाष्टकम्, १७. श्रीविनोबाष्टकम् (५) मनोरञ्जनस्तबके—१८. चलच्चित्राष्टकम्, १९. पत्रिकाष्टकम्, २०. निद्राष्टकम्, २१. प्रेमाष्टकम्, २२. योषाष्टकम्, (६) उपस्कृतिस्तबके—२३. पादपाष्टकम्, २४. ग्रामा-ष्टकम्, २५. पुर्यष्टकम्, (७) प्राणभृत्स्तबके—२६. सिंहाष्टकम्, २७. हंसाष्टकम्, २८. गर्दभाष्टकम्, २९. करीन्द्राष्टकम्, ३०. काकाष्टकम्, (८) धर्मोपदेशस्तबके—३१. दानाष्टकम्, ३२. धर्माष्टकम्, ३३. भक्त्य-ष्टकम् ३४. मोक्षाष्टकं चेति। यथा शीर्षकैरेव ज्ञायते एतेष्वष्टकेषु कवेः पद्यरचनापाटवं, लोकशास्त्रकाव्याद्यवेक्षणं, नवनवोन्मेषशालिनी प्रतिभा, गम्भीरं

ज्ञान, विनोदप्रियता चेत्यादयो विशेषता पदे पदे साक्षात्कर्तुं शक्यन्ते सहृदयैः। सर्वास्वापि विभक्तिसु वर्ण्यस्य आनुपूर्व्या वर्णनमनेकैः संस्कृतकविभिरितः पूर्वं विहितम्। तस्या एव परम्पराया सविशेषं परिपालनमत्र काव्ये श्रीअय्यर-महाभागेन कृतम्। एतेषामष्टकानां 'रीतिविज्ञान (शैलीशास्त्र)' दृशा अध्ययनं रोचकः शोधविषयो भवितुमर्हति।

अद्यत्वे संस्कृतलेखका भाषान्तरनिबद्धान् ग्रन्थानपि संस्कृतमाध्यमेन परि-शीलयन्ति, यथा पूर्वमालङ्कारिकाः प्राकृतकाव्यान्यालोचयन्ति स्म। अस्यां परम्परायामाचार्यश्रीरमेशचन्द्रशुक्लस्य "एक विश्वास और" इत्येतस्मिन् काव्ये मामको विचारः" इति शीर्षको लेखोऽस्मिन्नङ्के प्रकाश्यते। अयं लेखः संस्कृतसमीक्षायाः व्यापिनी गतिं सूचयति।

'देववाणी-परिषद्वार्तायां' विगतमासत्रये संजातानां गतिविधीनां संक्षिप्तं विवरणं दीयते।

पाठकाः अर्वाचीनसंस्कृतपरिवारस्य नूतनवर्षमङ्गलकामनाः स्वीकर्तुं सादरं प्रार्थ्यन्ते।

१५-१-१९८३, —रमाकान्तशुक्लः
आर ६, वाणी-विहारः सम्पादकः
नयी दिल्ली-११००५९

शुद्धिपत्रम्

६८ संख्यके पृष्ठे त्रयोदशपङ्क्त्या अन्ते इदं वाक्यं योजनीयम् :—"देव-वाणी-पदिषद आजीवनसदस्यस्य डा० वासुदेवकृष्णचतुर्वेदस्य 'द्वारकाधीश-महाकाव्यम्' अकादमी त्रिसहस्ररूप्यकात्मकविशिष्टपुरस्कारेण सम्मानितवती।

EDITORIAL

With the appearance of the existing number, *Arvācīn-saṁskṛtam* enters into its fifth year. The main attraction of this number is the recently completed poem of thirty four Astakas by Pandit T. V. Parmeswar Iyer, written in octo-form and arranged and divided into eight Nosegays. We have already published in our numbers of 1981, a couple of epigrammetic poems entitled 'Sadashayasamuchchaya' and 'Abhanakamanjari'. For the introduction of the poet. our readers are suggested to consult those issues. There we had also mentioned a poetic work by our poet entitled 'Sahitya Kautukam'. Devavani Parishad proposes to bring out the present work, which is the enlarged form of the former work, with Hindi-English Translation. However, for the benefit of readers we are giving original text of the same work in this present issue itself.

This collection of octaves includes thirty four octaves composed in Shardulvikridita metre with the titles viz, (1) NOSEGAY OF EULOGY—1. Rudrashtakam, 2. Sri Krishnashtakam, (2) DESHIYASTABAKA—3. Bharatashtakam, 4. Rashtra-netrashtakam 5. Sainikashtakam, 6. Vidvadashtakam, 7. Bhikshukashtakam (3) NOSEGAY OE INDUCEMENT 8. Dravinashtakam, 9. Vastrashtakam, 10. Bhojanashtakam, 11. Veshmashtakam, (4) MAHAPURUSIHASTABAKA—(12) Khristudevashtakam, 13. Sri Kalidasashtakam, 14. Sri Ramakrishnashtakam, 15. Gandhyashtakam, 16. Dayanandashtakam 17. Vinobashtakam, (5) MANORANJANASTABAKA—18. Chalachchitrashtakam, 19. Patrikashtakam, 20. Nidrashtakam, 21. Premashtakam, 22. Yoshashtakam, (6) UPASKRITISTABAKA—23. Padapashtakam, 24. Gramashtakam 25. Puryashtakam (7) PRANABRITSTABAKA—26. Simhashtakam, 27. Hamsashtakam, 28. Gardabhashtakam,

29, Karindrashtakam, 30. Kakashtakam, (8) DHARMOPADESHASTABAKA—31. Daiashtakam, 32. Dharmashtakam, 33. Bhaktyashtakam, 34. Mokshashtakam.

As is evident from the titles, the poem manifests a peculiarly agreeable poetic woskmanship along with an ever recreative charm of aesthetic imagination and an insight into the perception of worldly phenomena and varied literacy classicism contrasted with a mild satire and subtle humour.

One of the remarkable features of his poetic system is the use of all the declensions in a systemetic order in each octave, the experiment was wielded saccessfully by the poets of past in many of their compositions. Our poet succedes to this charm with his own distinctive merits. The composion also provokes the possibilities of its stylistic study.

One of the characteristics of the modern Sanskrit authors is their evergoing interest in the critique and study of the works of other languages through Sanskrit Medium. The ancient critics reviewed the Prakrit poetry with the same approach. The tradition has stimulated Dr. Ramesh Chandra Shukla to review 'Eka Vishvasa Aura' with the title 'Eka Vishwasa Aura Iti Kavye Mamako Vicharah.........' in this number.

A brief description of the activities of Devavani Parishad of the last three months follows as usual in 'Devavani-Parishadvarta'.

Readers are requested to accept our heartiest good wishes for a happy new year.

15-1-1983
R-6, Vani Vihar,
New Delhi-110059.

—Rama Kant Shukla
Editor

(१)

प्रार्थनास्तबकः

१. श्रीरुद्राष्टकम्

रुद्रः पाति जनानपापकलुषान् रुद्रं भजेऽहर्निशं
रुद्रेण व्यपनीयते हि दुरितं रुद्राय कुर्मो नतिम् ।
रुद्रात् त्रस्यति भीषिका भवरुजो रुद्रस्य दासा वयं
रुद्रे सक्तिरजस्रमस्तु मनसो हे रुद्र नः पालय ।।१।।

शम्भुं शङ्करमीश्वरं स्मरहरं गङ्गाधरं धूर्जटिं
सर्वज्ञं शितिकण्ठमीशममलं मृत्युञ्जयं त्र्यम्बकम् ।
यज्ञघ्नं त्रिपुरान्तकं पशुपतिं भूतेशमुग्रं भवं
भर्गं स्थाणुमथापि खण्डपरशुं रुद्रं सदा प्रार्थये ।।२।।

सर्वाजय्यतया विभूषितमिदं सम्पत्प्रगत्यन्वितं
सुस्वास्थ्येन च मण्डितं प्रविलसद्विज्ञानशिक्षादृतम् ।
ध्यानाभ्यासनिरस्तसर्वदुरितं सच्चेतनाभासुरं
कारुण्यामृतसागरेण निखिलं रुद्रेण रक्ष्यं जगत् ।।३।।

सद्ध्यानं हृदयस्थितं मलचयं दूरीकरिष्यत्यलं
पूजा चैवमृणात्मकान् गुणगणानित्येव सञ्चिन्त्य यः ।
पीडां पीतविषः प्रसन्नहृदयः पुण्यावहोद्यद्द्युतो
विश्वस्यास्य चराचरस्य हृतवान् रुद्राय तस्मै नमः ।।४।।

स्वस्मिन्नेव वपुष्यजस्रवसतिं ह्याधारभूतां महा-
शक्तिं वाञ्छति यश्चराचरवपुः सन्नर्द्धनारीश्वरः ।
रुद्रात् पर्वतराजवन्द्यतनयाप्राणप्रियादीश्वरा-
दन्यं देवमुपाश्रयेत् क इह भोः संसारसौख्यप्रियः ॥५॥

मार्कण्डेयमुनीन्द्रबालकवरे न्यस्यन् कटाक्षाञ्चलान्
दीर्घायुष्यवरेण तं गतगदं चक्रे च यस्तस्य हि ।
ब्रह्मादित्रिदशोत्तमैरहरहः संप्रार्थितस्यानघं
संसारार्णवतारकप्रवहणं रुद्रस्य पादाम्बुजम् ॥६॥

रुद्रे तिष्ठति रक्षणाय सततं कं देवमन्यं भजे
रुद्रे वाञ्छति बुद्धिवृद्धिविभवान् दातुं कमन्यं वृणे ।
रुद्रे भक्तिरचञ्चला भवति चेद् ध्येयः क्व चान्यो भवेद्
रुद्रे भद्रकृति प्रसन्नहृदये सक्तं मनो मे सदा ॥७॥

हे रुद्र क्षितिमण्डलं हि सकलं भूयात् समृद्धं परं
रुद्र त्वत्कृपया भवन्तु सततं राष्ट्राण्यजय्यानि च ।
सद्ध्यानैः सुकृतैरपेतदुरितैः स्वास्थ्यप्रकर्षावहैः
सिद्धिं प्राप्य ललन्तु पूर्णसुखिनस्त्वद्भक्तिनिष्ठाः सदा ॥८॥

२. श्रीकृष्णाष्टकम्

श्रीकृष्णः शरणं समस्तजगतामाराध्यमानः परं
योगस्थैः सततं स्वकृत्यनिरतैः सद्भावनाभावितैः ।
पार्थाय स्वजनानुरक्तिवशतः कर्तव्यमूढाय यः
सङ्ग्रामक्षितिसीम्न्यनल्पदयया गीतासुधां दत्तवान् ॥१॥

यस्मै मुष्टिमितान् प्रदाय पृथुकान् प्राप्नोत् सुदामा श्रियं
यो गोवर्धननामकं क्षितिधरं छत्रीचकार स्वयम् ।
यं सर्वे समुपासते सुरगणा भक्तार्तिहं तं मुदा
श्रीकृष्णं भववार्धिपोतममलं भक्त्या स्तुवीमः सदा ॥२॥

कालिन्द्याः पुलिनेषु रासरसिको यः प्रेम दिव्यं स्फुटं
चक्रे यस्य कटाक्षवीक्षणवशात् कुब्जाऽभवत् सुन्दरी ।
यस्मान्नास्ति परश्चराचरगणे तेनाखिलस्वामिना
श्रीकृष्णेन दयापरेण भुवनं संरक्षणीयं सदा ॥३॥

कालिन्दीह्रदवासिनः फणिपतेर्दर्पं समुच्चाटयन्
पीत्वा दावविभावसुं व्रजकुलं योऽत्रायतोग्रापदः ।
नित्यायातुलकीर्तये भवभिदे तस्मै परब्रह्मणे
श्रीकृष्णाय नमोऽस्तु विश्ववपुषे दैत्यारये भास्वते ॥४॥

गायत्रं व्रतमाददे यदुकुलाचार्याद्धि गर्गान् मुने-
र्यः काश्यस्य मनीषिणो गुरुकुलं सान्दीपनेः प्राविशत् ।
तस्मात् सर्वकलाविदग्धरसिकाद् विद्यार्णवाद्वन्दितात्
श्रीकृष्णादनघादनन्तविभवादन्यं न मन्ये गुरुम् ॥५॥

प्रह्लादध्रुवनारदार्जुनसुदामाद्या हि यत्प्रेमत-
स्तां तां सिद्धिमवापुरन्तरहितां लोकोत्तरां शर्मदाम् ।
तस्यानल्पकृपार्णवस्य वृजिनप्रध्वंसिनः श्रीमतः
श्रीकृष्णस्य पदारविन्दयुगले भक्तिर्भवत्वन्वहम् ॥६॥

भौमं यो नरकं जघान समरे प्रत्यार्पयत् कुण्डले
मात्रे यज्ञभुजां सुरद्रुमवरं भामागृहेऽस्थापयत् ।
तस्मिन् पद्मजपाशभृत्प्रभृतिभिर्देवैः परं पूजिते
श्रीकृष्णे पुरुषोत्तमे भव मनः सक्तं सदा शाश्वते ॥७॥

श्रीकृष्णः करुणापयोधिरनघः श्रीकृष्णमाराधये
श्रीकृष्णेन हि रक्षितं जगदिदं कृष्णाय कुर्वे नतिम् ।
कृष्णान्नास्ति परः समस्तविभुता कृष्णस्य कृष्णे रतः
श्रीकृष्ण प्रथिताः कथास्तव भुवि प्रख्यापयाम्यादरात् ।।८।।

-:०:-

(२)

देशीयस्तबकः

३. श्रीमद्भारताष्टकम्

आम्नायामलमन्त्रसंश्रवणतः पाठैस्तथा सस्वरै-
र्निर्मृष्टाघमुदग्रकीर्त्युपनिषच्चर्चातमतथ्यस्थिरम् ।
षट्कस्याध्ययनेन शोधितमनः सद्दर्शनानां भृशं
धर्मिष्ठामलसंस्कृतिद्युतियुतं विद्योतते भारतम् ॥१॥

येऽनिन्दन् परतन्त्रताभिभवतः क्लिष्टान् मनोर्वंशजा-
नज्ञानान्मतिदोषतश्च शठतावैयात्यविक्षोभतः ।
श्रेयःप्राप्तिसमुन्नतं समुचितप्रेयःप्रगत्यन्वितं
देशास्ते विनुवन्ति नम्रशिरसो भक्त्यादराद्भारतम् ॥२॥

दिव्यज्ञानयुता विशालहृदयाः सत्तापसाः कोटिशो
धर्मिष्ठा नृपसत्तमा जनहिते दत्तावधानाः सदा ।
आसन्नत्र समाजसेवनरता वर्णेषु सर्वेष्वपि
प्राप्तस्तेन हि भारतेन सुयशःपुञ्जो जगद्व्यापकः ॥३॥

विद्यासंस्कृतिभावभासुरकलाशिल्पादिकेष्वार्जित-
प्रावीण्याय रुजापनोदनविधौ नक्षत्रविद्यास्वपि ।
कौटिल्यादिभिरर्थशास्त्रकुशलैः संप्राप्तसत्कीर्तये
सर्वेड्याय च भारताय नमसां कुर्यां सहस्रं सदा ॥४॥

भूयान् संप्रति भारतीयजनतामध्ये दरीदृश्यते
भाषाहारविहारवस्त्रपरिधानाद्ये भेदो भृशम् ।
अस्त्येवैक्यमथापि तत्र रुचिरं सार्वत्रिकं सूक्ष्मत-
स्तस्मान्नूतनभारतात् किमपरं राष्ट्रं यशोमण्डितम् ।।५।।

नानाधर्मपथानुगान् सुमचयान् माल्ये यथा मञ्जुले
देशप्रेममयेन सूत्रनिचयेनागुम्फितान् कारयन् ।
सौभाग्यावहमन्तरिक्षमधिकं विद्योतयन् भव्यकृत्
स श्लाघ्यः खलु भारतस्य महिमा सत्प्रेरणादायकः ।।६।।

यत्रासन्नथ कालिदासभवभूत्याद्या महाकाव्यकृत्-
प्रौढा भूपतिसत्तमाः शिबिनृगाशोकादयो वन्दिताः ।
ख्याताः सुश्रुतवाग्भटप्रभृतयो भैषज्यविद्यारता
अस्मिन् श्रीमति भारते मम मनः सक्तं सदा भासुरे ।।७।।

देशेष्वद्य शताधिकेषु जगतीपृष्ठे धनाढ्यानुगाः
केचित्, केचन साम्यवादनिरताः संघर्षयुक्ता मिथः ।
ताटस्थ्यं समुपेयुषः समुचितं स्वीकृत्य मार्गान्तरं
भो भो भारत भूतले भवतु ते सर्वत्र शुभ्रं यशः ।।८।।

४. राष्ट्रनेत्रष्टकम्

गेहं गेहमुपेत्य तत्परतया चक्रे पुरा याचनां
सर्वेषां मतदायिनामुपकृतेर्निर्वाचने स्वस्य यः ।
पूर्णे लोकसभासदस्यचयने मन्त्रीबुभूषुर्मुदा
ह्येकच्छत्रधरोपमो विजयते राष्ट्रस्य नेता महान् ।।१।।

स्वं कर्तव्यमपेतशङ्कमुररीकृत्यात्मनः शक्तितः
पूर्णं तत् कुरुते भयादिरहितः स्वार्थान् परित्यज्य यः।
उद्बुद्धं प्रतिबोधयन्नपरान् उत्साहयुक्तं च तं
नेतारं प्रणमेदुदारचरितं राष्ट्रस्य वृद्ध्यैषिणम् ॥२॥

उत्सीदेन्निखिलं जगन्ननुयदि श्रेष्ठस्य विभ्रष्टता
वैक्लब्यं पुरुषे महात्मनि विघातायैव तच्छ्रेयसः।
ज्ञात्वैतन्न कदापि सन्त्यजति यो धैर्यं विपत्सञ्चये
नेत्रा तेन हि रक्ष्यते क्षितिरियं राष्ट्रस्य शं कांक्षता ॥३॥

अन्याय्याद् द्रविणात् स्वतो विमुखता नानानुजीविष्वलं
निष्पक्षत्वमदभ्रकारुणिकता वादेषु वाक्चातुरी।
क्लेशाधिक्यसहिष्णुतेति विविधैर्युक्ताय तत्तद्गुणै-
र्नेत्रे सर्वहिताय सत्त्वनिधये राष्ट्रस्य तस्मै नमः ॥४॥

आबालातिवयोधिकं समतया सर्वान् हि संभावयन्
बन्धुस्नेहपुरस्सरं च जनतामालोक्य यो हृष्यति।
दोषज्ञाद् गुणवक्तुरादरवतः कापट्यमुक्तात्मनो
नेतुः कोऽत्र भवेदिह प्रियतरो राष्ट्रस्य तस्मात् परः ॥५॥

देशे दुर्वणिजो नियम्य च खलान् निस्सीमलाभोद्यमान्
वस्तूनामुपलब्धये समुचितैर्मूल्यैः सदा यत्नवान्।
सन्मत्र्यैः परराष्ट्रभव्यनिलयैः पुष्णाति यः सौहृदं
नेतुस्तस्य दयानिधेः पदयुगे राष्ट्रस्य सेवाऽर्प्यताम् ॥६॥

आकिञ्चन्यविमर्दितोपरि दयादृष्टिं प्रकुर्वन् सदा
रुग्णानामुचितोपचारसुविधाहेतोर्व्यवस्थां तथा।
यः सिञ्चत्यमृतद्रवं सुखकरं सर्वस्य हर्षास्पदं
तस्मिन् नेतरि चारुभव्यचरिते राष्ट्रस्य रज्यान्मनः ॥७॥

देशद्रोहृत्युपजापकर्मकलुषं यद्वा रिपूणां व्रजै-
राक्रान्तं निजराष्ट्रमादरवता संरक्षणीयं त्वया ।
एवं सज्जनवत्सलो विनयवानादर्शनिष्ठान्वितो
नेतश्चेतसि मे निवासकुतुकी राष्ट्रस्य भूयाः सदा ॥८॥

५. सैनिकाष्टकम्

धृत्युत्साहसमन्वितो गतभयः कर्तव्यसंरक्षणे
देहारोग्यसुदार्ढ्यपालनविधौ यो जागरूको भृशम् ।
सन्नद्धो निजजीवितार्पणकृतौ राष्ट्रस्य हेतोः सदा
रक्षाकृद्रिपुसञ्चयाक्रमणतो वन्द्यः स वै सैनिकः ॥१॥

रक्षोदैत्यनिशाचरप्रभृतयः ख्याताः स्वकीयाद् बलात्
तत्तादृग् बलमात्मनीप्सितमलं किन्तूपयोगः पुनः ।
न श्लाघ्यो हि बलस्य तस्य सततं तेषां यथा वर्तते
जानन्तं चिरतत्त्वमेतदनघं वन्दस्व तं सैनिकम् ॥२॥

चरित्र्यं महिलाजनस्य विधिवत् संरक्षणीयं सदा
बालानामपि जीवितं बहुमतं ये भाविपौरा ध्रुवम् ।
येनेदं खलु तथ्यमादरवता विज्ञाय चाचर्यते
तेनैषा खलु सैनिकेन धरणिर्भव्या समुत्तंभिता ॥३॥

शत्रूणां हननेन सिध्यति च यत् तत्तोऽधिकं लभ्यते
सद्धर्माचरणे नियुज्य च रिपून् शक्त्या गुणोत्कृष्टया ।
स्पष्टं चिन्तयते किलेत्थमधुना कर्तव्यनिष्ठावते
तस्मै वाञ्छति सैनिकाय नमसां दातुं सहस्रं मनः ॥४॥

श्रीरामो रघुवंशमण्डनमणिः कोदण्डपाणिस्तथा
श्रीकृष्णश्च किरीटिसन्ततसखो यस्यादरार्हौ सदा ।
उत्पश्यन्ति शुभं सुभद्रचरितं सर्वे जना भूतले
तस्मादद्य हि सैनिकाद् गुणगणान् साध्वादृतां श्चान्वहम् ।५।

पार्थो मारुतिरञ्जनाप्रियसुतो द्रोणश्च भीष्मस्तथा
स्वातन्त्र्याय निजावनेः कृतमती राणा प्रतापो महान् ।
एतेषामनुयानसद्व्रतरतः शुभ्रापदानश्च य-
स्तस्येयं मम सैनिकस्य पदयोर्नम्रा नतिः सादरा ।।६।।

दीनत्राणरतिर्दयार्द्रहृदयः स्मेराननः सन्ततं
सद्विद्याव्यसनी श्रुतिप्रियवचोगुम्फश्च यो भ्राजते ।
संग्रामक्षितिसीमनीव जनतामध्येऽपि धृत्यन्विते
तस्मिन्नावह सैनिके मम मनः सक्तिं यशोभासुरे ।।७।।

देशद्रोहिजनावलीदमनकृत् कीर्तिं लभस्वानघां
संग्रामक्षितिमण्डले प्रकटय स्वीयं च शौर्यं भृशम् ।
दारापत्यसुखान्वितः परिजनैराराधितः सादरं
भो भो सैनिक वन्दनीयचरित क्षेमाभिवृद्धिं भज ।।८।।

६. विद्वदष्टकम्

येनोच्चाटितमज्ञताविलसितं घोरं तमः सञ्चितं
विद्यालोकविसर्पिशुभ्रकिरणैर्दीप्रैस्तथा मञ्जुलैः ।
यो वा पूर्णविकासमापयति मां सूक्तैः सुधासन्निभै-
र्विद्वान् वन्द्यपदारविन्दयुगलः सेव्यः स नित्यं मया ।। १।।

वेदस्याध्ययनं विधाय विधिवत् साहित्यमास्वाद्य यः
सम्यग् दर्शनषट्कमप्युरुमुदा पश्चाच्चकारात्मसात् ।
येनाशेषमधीतमुत्सुकतया श्रुत्यङ्गषट्कं द्रुतं
विद्वांसं प्रणमामि तं पृथुयशःसन्मण्डितं सादरं ॥२॥

निद्राहाररतादिभिर्न मनुजस्तृप्तिं गमिष्यत्यलं
कर्तव्यं बहु वर्ततेऽस्य जगतीत्येतद्विजानाति यः ।
यस्मिन् लौकिकलाभहानिगणनाबुद्धिर्न सन्दृश्यते
सौहार्दं निरुपाधिकं च विदुषा तेनैव कुर्यां सदा ॥३॥

सद्ध्याने निरतः सदा स्मितमुखः सत्योक्तिधीरव्रतो
यावच्छक्ति परोपकारकरणे यो बद्धकक्षोऽनिशम् ।
पूजां यो विदधाति सादरमहोरात्रं च सर्वेशितु-
स्तस्मै सद्विदुषे नमोऽस्तु सततं सद्धर्मनिष्ठावते ॥४॥

उत्कर्षेच्छुरहन्तया विरहितः सौम्यो विनम्रः शमी
नीचानामुपसेवनेऽपि विमुखः प्रख्यातिमिच्छन्नपि ।
निर्भीकः स्वमनोगतप्रकटने सत्याभिसन्धिश्च यो
जाने नान्यमुपास्यमत्र विदुषस्तस्माद्विशालाशयात् ॥५॥

उद्विग्नं न मनो यदीयममलं भूयिष्ठदुःखार्दितं
नैःस्पृह्यं विशदं यदीयहृदये सौख्यानुभूत्यामपि ।
वीतक्रोधभयादिकः स्थिरमतिर्वैराग्यवांश्चापि य-
स्तस्याहं विदुषः प्रणम्य चरणौ प्रीतिं लभेयानघाम् ॥६॥

यो न द्वेष्टि न चाभिनन्दति शुभं यद्वाऽशुभं भूतले
यद्वश्यानि किलेन्द्रियाणि नियतान्यास्ते हि युक्तश्च यः ।
यो ब्राह्मीं स्थितिमेत्य निर्वृतियुतो यो निर्ममः शान्तिभाक्
तस्मिन् सत्यनघे महात्मनि विदुष्यानन्दपूर्णं जगत् ॥७॥

माता धन्यतमा पिता च सुकृति वंशः समुत्तंभितो
ग्रामः पावनतामयाज्जनपदं जातं यशोभासुरम्।
देशः प्रीतिविकासबन्धुरतमः पुण्यार्जनोत्साहवान्
विद्वन् दर्शनकोविद क्षितितलं धन्यं भवज्जन्मना ॥८॥

७. भिक्षुकाष्टकम्

भक्ष्ये वाससि भूषणादिषु तथा गात्रादिशुद्धावपि
श्रद्धा नास्ति तथापि यस्य हृदयँ तृप्तं सदैवास्ति हि
निस्संगो नितरां निरस्तदुरितो योगीव सर्वैरलं
वन्द्यो भिक्षुक एष कैश्चिदधुना हन्तातिगर्ह्यो मतः ॥१॥

दीनं क्षुत्परिपीडितं सुमलिनं वासो वसानं सदा
तेजोहीननिजाक्षिसूचितमनःपीडातिरेकं कृशम्।
एनं भिक्षुकमादरेण महता संबोध्य नक्रोऽधिकं
स्तुत्यं स्वागतसूक्तिभिः प्रमदयन् सत्कर्तुमेवार्हसि ॥२॥

काव्यालोकनकौतुकं शुभतरं यद्गोचरं नाभवत्
सङ्गीतादिकलासु यस्य न रुचिर्नो राजनीतावपि।
सस्त्रीपुत्रकुटुम्बजीवितसुखं स्वप्नेऽपि यो नान्वभूत्
कार्यं दुष्करमेव तेन विहितं हा भिक्षुकेणामुना ॥३॥

द्वित्राणीश्वरबोधकानि च पदान्युच्चार्य तेनैव वै
धर्मस्याचरणं कृतं नु मनुते यः शुद्धचित्तः स्वयम्।
कामक्रोधमदाद्यदूषितमना यस्तृप्तहृत् सर्वदा
तस्मै मे शृणु भिक्षुकाय भवतात् सर्वानवद्या नतिः ॥४॥

भक्ष्यं पूति च यातयाममथवा दुर्गन्धयुक्तं तथा
गृह्णन्नत्तु ममेध्यदूषिततमक्षोणौ शयानोऽपि च ।
निन्दाभर्त्सनगालनादिभिरपि व्रीडान्वितो नैव य-
स्तस्मात् सम्प्रति भिक्षुकान्न हि परो धन्यो भवेद् भूतले ।५।

ग्रीष्मे तिग्मकरे तपत्यनुदिनं छत्रं विना यात्यसौ
वर्षावारिणि शीतले भृशतरं क्लिन्नोऽपि नो खिद्यते ।
हेमन्ते शिशिरे च शैत्यकदनं नैवामुना गण्यते
श्रेयस्तस्य न भिक्षुकस्य कथमप्याहन्यते शत्रुभिः ।।६।।

भिन्नः कोऽपि वनीयकाद् गुणगणैर्हीनात् सदा चञ्चलात्
योऽसौ मार्गनिदर्शकः सुकृतिनां श्रेष्ठैः स्वचर्याचयैः ।
पूज्ये सर्वसमाजसेवनरते ह्यध्यात्मविद्यागुरौ
तस्मिन्नेव हि भिक्षुके महति मे सक्तं मनः सादरम् ।।७।।

वैक्लब्यं धननाशहेतुकमथ प्राप्ताच्च तस्मान्मनः-
काठिन्यं सह धूर्ततादिभिरपि श्रेयोविधातावहम् ।
नास्त्येतद् द्वितयं त्वयि प्रकटमित्येतेन सद्धेतुना
भो भो भिक्षुक सज्जनादृत लसद्विद्यानिधे स्वस्ति ते ।।८।।

-:०:-

(३)

प्रेरकस्तबकः

८. द्रविणाष्टकम्

प्राप्तुं यद्यतते शुभाशुभकरैः कृत्यैर्नरः सन्ततं
यल्लब्ध्वा मनुते स्वजीवितमहो धन्यातिधन्यं परम् ।
लब्धं भूर्यपि यन्न तृप्तिकरमित्यस्ति प्रवादो महान्
लोकेऽस्मिन् द्रविणं तदद्य कुरुते शान्तिक्षतिं भूयसीम् ।।१।।

नीचोऽपि द्रविणार्जनेन भविता स्तुत्यः सदा सज्जनै-
गर्ह्यो निर्द्रविणो नरः क्षितितले विद्याविशिष्टोऽपि सन् ।
पापौघो द्रविणोपहारविहतो मान्यैरपि स्वीकृतो
वाञ्छामि द्रविणं ततो भुवि निजक्षेमाय सर्वोपरि ।।२।।

यद्यज्जीवनहेतवे भुवि भवेदावश्यकं प्रत्यहं
क्रय्यं तत्तदभीप्सितद्रविणदेनेत्यत्र वादः क्व वा ।
नूनं बह्वपि लभ्यते धनवता क्लेशादितान्मानवात्
प्राप्तेन द्रविणेन हि त्रिभुवनं क्रीतं भवेत् किं ततः ।।३।।

आशापाशविमुक्तमीषदपि यत् कुर्यान्न वै चञ्चलं
भक्त्या यः खलु सेवतेऽथ तमहो प्रेम्णानुगृह्णाति यत् ।
यन्नूनं सगुणं क्वचित् क्वचिदलं यन्निर्गुणं ब्रह्मवत्
तस्मै भो द्रविणाय सादरमिमं किं नार्पयाम्यञ्जलिम् ।।४।।

वस्त्रार्थं नियताशनार्थमथवा गेहार्थमावश्यकं
लोकेऽस्मिन् द्रविणं नरस्य बहुधा घस्रे च घस्रे ध्रुवम् ।
तातान्मुक्तिमवाप्य वेतनभृता पुत्रेण किंचित् क्वचित्
प्राप्यं यद् द्रविणात् सुखं भवति तत् को वा निषेद्धुंक्षमः ।५।

माता गोपकिशोरबन्धनरता द्वित्राङ्गुलन्यूनतां
खिन्ना रज्जुगुणेष्वपश्य; दधुना मूल्याभिवृद्ध्या पुनः ।
वस्तूनां द्रविणोनता प्रतिपदं सर्वानुभूता ततः
स्पष्टं हि द्रविणस्य मानवकुले मुख्यत्वमन्यादृशम् ।।६।।

स्वीये पिच्चटभाजने निपतितं संवीक्ष्य वै नाणकं
दारिद्र्यार्दितयाचकः खलु भवेद्विस्फारिताक्षो मुदा ।
कोटीशोऽपि कदर्यताकलुषितस्वान्तस्तथा दृश्यते
निन्द्या न द्रविणे रतिः समधिका प्रोत्साहनार्हाऽपि नो ।।७।।

खाद्यं येन तु पच्यते स दहनः क्रुद्धो भवेद् दाहकः
शाकच्छिच्छुरिका पिबेच्च रुधिरं निर्दोषहृत्स्थं बत ।
सर्वं वस्त्विह भूतले ऽस्ति विमलं भोक्ता भवेत् सात्त्विको
रे रे मित्रवरानघ द्रविण ते कीर्तिर्भवत्वक्षता ।।८।।

६. वस्त्राष्टकम्

यद् दृष्ट्वा मनुजस्य जीवितगतः सन्धार्यते हि स्तरः
प्रेमा यत्र च योषितां सुविदितः स्वर्णादिभूषास्विव ।
नग्नत्वावरणं मतं प्रथमतः पश्चाद्वपुर्मण्डनं
वस्त्रं वस्त्रमितीरितं विजयते तद्वस्तु सर्वादृतम् ।।१।।

आदौ पर्णचयेन संवृततनुर्मर्त्यस्ततो वल्कलैः
पश्चात्तूलविनिर्मितैश्च वसनैः क्षौमादिभिस्तत्परम् ।
काचाद्यैर्गुणरूपतां च गमितैर्विज्ञानलब्धोद्गति-
र्नाना कृत्रिमवस्तुभिर्विरचयन् वस्त्रं दरीदृश्यते ॥२॥

माल्याद्यैः सविशेषमण्डितवपुः पट्टाम्बरोष्णीषवान्
गन्धद्रव्यविलेपनेन मुदितो मौनी सभासंस्थितः ।
किञ्चिद्वक्तुमशक्नुवन् प्रकटयन् गांभीर्यमन्यादृशं
वस्त्रेण प्रकटप्रभेण विलसन् मूर्खोऽपि संराध्यते ॥३॥

केचित् सन्ति हि भूतले बहुधनाः संप्राप्तसर्वेप्सिता
निश्चिन्ता निखिलोपभोगमुदिताः पुण्यैरगण्यैर्ध्रुवम् ।
किन्त्वावश्यकवित्तवञ्चिततया साधारणस्याधुना
वस्त्रायाशनहेतवे वसतये मर्त्यस्य भूयान् श्रमः ॥४॥

कश्चित्तच्छकलैश्शिरश्च परिवेष्ट्यानन्दितो निर्भरं
कश्चित्तत् परिधाय संगिरति भोः क्षोणीपतिं पश्य माम् ।
योषिद्वेषधरोऽपरः प्रयतते गातुं तदानीं मुदा
वस्त्राद्वर्णविचित्रिताद् भवति हि प्रीतिः शिशूनां दृढम् ॥५॥

यच्छीतातपवारणं सुविदितं पुण्यावहं सम्मतं
यद्दानं कलिकल्मषघ्नमनघं नग्नत्वसञ्छादकम् ।
क्लिन्नत्वापनयक्षमं भवति यत् तस्यामलस्याधुना
वस्त्रस्यैष विकस्वरो नु महिमा न ज्ञायते केन वा ॥६॥

पाश्चात्यः खलु वस्त्रधारणविधिः सर्वत्र वै भारते
सम्प्राप्य प्रचुरप्रचारमधुना प्रापेव देशीयताम् ।
सर्वेषामपि वै तदीयविधया वस्त्रे धृते नूतने
हर्षोल्लासतरङ्गितं नु हृदयं त्वाबालवृद्धं बत ॥७॥

सद्योजातशिशोररिष्टनिलये सत्ता तवापेक्षिता
मृत्युग्रस्तवयोधिकस्य च चितास्थानेऽपि नूनं तथा ।
सम्पूर्णे नरजीविते च सततं राजद्भिनैवार्गलं
भो वस्त्रप्रकटप्रभाव परमा कीर्तिस्तवास्त्वीप्सिता ।।८।।

१०. भोजनाष्टकम्

अन्यूनं च न चाधिकं च हितकृत् काले च शान्त्याशितं
कट्वम्लादिविभिन्नमामयहरं यत् पाचनं दीपनम् ।
रस्यं स्निग्धमतिस्थिरं गुणयुतं पुष्टिप्रदं देहिनां
हृद्यं स्वास्थ्यकरं परं विजयते तत् सात्विकं भोजनम् ।।१।।

स्नेहार्द्रैः सुजनैः प्रियोक्तिचतुरैरन्नं च सव्यञ्जनं
तृप्त्याश्नीत घृतादिकं च पिबतेत्येवं वदद्भिः सदा ।
नात्युष्णं च न चातिशीतलमिदं रौप्ये शरावेऽमले
को वा नेच्छति भोजनं सुमधुरं दत्तं च सप्रश्रयम् ।।२।।

निर्णीता विविधैः परीक्षणशतैर्मर्त्यस्य वैज्ञानिकै-
रीदृक्ता प्रतिघस्रभोजनगता तस्य त्वियत्तापि च ।
तत्रेषद्व्यतियानमप्यनुचितं विज्ञैः किलांगीकृतं
तृप्ताः स्युः किमु भोजनेन मनुजा न्यूनेन दुष्टेन वा ।।३।।

दारिद्र्यप्रसरोऽत्र खेदजनकः खाद्यान्नवृद्धिर्लघुः
संख्या चात्र जनावलेः समधिका संवर्धते कोटिशः ।
क्लिश्नन्त्येव हि भोजनाय बहवो वारद्वयं प्रत्यहं
तल्लब्ध्या मुदिता भवन्ति विरला देशेऽस्मदीये बत ।।४।।

मात्रायामतिवेल्लमेव च लघु स्यान्नाम तेनाथ किं
प्रेम्णा दत्तमतिप्रशस्तफलदं तृप्त्या च सर्वादृतम् ।
द्वित्रानप्यतिथीन् विधाय मुदितान् पश्चात्कृताद्भोजना-
द्यल्लभ्यं सुखमत्र तत्सदृशतां नैवापरं प्राप्नुयात् ॥५॥

खाद्यान्नादिषु दुर्विषान्वितपदार्थात्यन्तसम्मिश्रवात्
स्वादुत्वापगमेन हानिकरताप्यापद्यते नित्यशः ।
तेनाकर्षकताऽपि सर्वविदिता चोष्यादिभेदेन सा
चातुर्विध्यमुपेत्य षड्रसवतो नो भोजनस्याधुना ॥६॥

देशे विप्लवसंकुले जनततौ शान्त्याश्च भंगे स्फुटे
क्षुद्व्याध्यादिभिराकुले बहुजने विक्षुब्धकल्पेऽखिले ।
देहे चामयपीडिते मनसि च ग्रस्ते विचारव्रजैः
पीयूषाशनतृप्तिकारिणि रतिः कस्यापि नो भोजने ॥७॥

कैश्चित् त्वं सकृदिष्यसे सुचरितैः काले कदाचित् क्वचिद्
वित्ताढ्यैरसकृद् विशिष्य रसनादासैरशङ्काकुलैः ।
रोगार्तैरधिकार्तिभीरुभिरहो बाढं परित्यज्यसे
भो भो भोजन सन्ततं व्रतधरैर्धर्मार्थमुत्सृज्यसे ॥८॥

११. वेश्माष्टकम्

वृष्टेर्भास्करतीक्ष्णरश्मिनिचयाद्धेमन्तशीतानिलाद्
वात्योत्थापितधूलिजालकदनाद् यत् त्रायतेऽस्मान् सदा ।
आवासार्थमभीप्सितं प्रियजनैः साकं व्यथाभञ्जकं
प्रोक्तं वेश्म तदेव यत्र मनसः प्रीतिर्वपुर्विश्रमः ॥१॥

क्रीडद्भिः शिशुभिः कलं च मधुरं गायद्भिरानन्दतो
गुञ्जत् प्रत्यहमस्तदोषमतिथिस्वीकारबद्धस्पृहम् ।
कल्याभं शुचि भासुरं च विलसच्छान्त्यन्तरिक्षान्वितं
तज्जानीह्यधुना च वेश्म महितं सर्वोपकारप्रदम् ॥२॥

आदौ शैलगुहानिवासकुतुकी वृक्षाग्रवासी ततः
पश्चात् पर्णकुटीरनिर्मितिरतो दूष्यादिवासोगृही ।
अद्यत्वे शतभूमिहर्म्यरचनादक्षः सुखेप्सुर्भृशं
मर्त्योऽसौ बत वेश्मना स्वरचितेनैषन्न तृप्तो हृदि ॥३॥

यत्र स्यादुचितः प्रबन्धनिकरो वार्यागमे निर्गमे
विद्युद्दीपिकया सह व्यजनमप्यस्त्येव यत्रामलम् ।
तस्मै मे खलु वेश्मने स्पृहयति स्पष्टं मनः सन्ततं
सम्यग् वायुगतागतेन सहितायात्यन्तशुद्धाय च ॥४॥

यत्र स्यान्निजगेहिनी हितरता शुश्रूषमाणा सदा
मन्दस्मेरमुखी मरन्दमधुरं पेयं तथा भोजनम् ।
सज्जीकृत्य चिरानिमेषनयना प्रत्यागतावुत्सुका
भर्ता सोऽत्र पराङ्मुखो न भविता तस्मात् पुनर्वेश्मनः ॥५॥

संगीते श्रुतितृप्तिकारिणि महान् श्रीत्यागराजो यथा
श्रीमान् मोहनदासगान्धिसदृशः सद्राष्ट्रनीतावपि ।
साहित्ये च रवीन्द्रनाथ इव वा कश्चिज्जनुं प्राप्नुयात्
कीर्तिस्तस्य च वेश्मनः परिलसत्याचन्द्रतारं भुवि ॥६॥

वृद्धाः सन्त्युपदेशदानचतुरास्तारुण्यभाजः सुताः
सत्कर्माचरणेन लब्धविभवाश्चारित्र्यशुद्धाः स्त्रियः ।
यस्मिन् बालकबालिकाश्च नितरां ज्ञानाप्तिदत्तादरा-
स्तस्मिन् भव्यतमे च वेश्मनि रतिः सर्वस्य सञ्जायते ॥७॥

निद्राहारविहारदत्तमतयो हा मन्दभाग्या वयं
भो भो वेश्म कथं त्यजन्ति मुनयस्त्वां नैव जानीमहे ।
नूनं तेऽभिलषन्ति शाश्वतसुखं मोक्षाभिधं विश्रुतं
यद्रूपं खलु मायया हृतमना वेत्तुं न शक्नोत्यहो ॥८॥

-:०:-

(४)

महापुरुषस्तबकः

१२. खि्रस्तुदेवाष्टकम्

चैतन्यं स्फुरति प्रकाशविशदं प्रीतिप्रकर्षप्रदं
स्वात्माविष्कृतिधन्यमीषदपि यन्नैवाविलं चिद्घनम् ।
तत्त्वं चैतदतिस्फुटं विशदयन् मर्त्यात्मना संस्फुरन्
ईशः खि्रस्तुरितीरितो विजयते चैतन्यविस्तारकृत् ॥१॥

क्रूशे निर्घृणशत्रुकीलिततनुः सन्ताडितो भर्त्सितो
लत्ताभिः परिपीडितोऽपि च भृशं नैवाप यो विक्रियाम् ।
"अज्ञान् क्षाम्यतु मे पिता स दिविषद्" यश्चैवमाह स्फुटं
खि्रस्तुं तं करुणार्णवं भजत भो मर्त्याः सदा निश्छलम् ॥२॥

"प्रेम्णा जय्यमसंशयं सुकृतिभिर्हिंसोन्मुखत्वं परं
प्रीत्या दर्शय सव्यमप्यपभयं गण्डस्थले दक्षिणे ।
यद्याहत्य निपीड्यसे" ह्युपदिशत्येवं स्म यः सन्ततं
तेन खि्रस्त्वभिधेन धार्मिकवरेणैषोद्धृता काश्यपी ॥३॥

"सौभ्रात्रं वितनुध्वमत्र जगतीपृष्ठे च सर्वत्र सत्-
प्रेम्णा निर्द्रविणान्धमूकबधिरादीनां च सेवां तथा ।"
शिष्यानेवमशात् प्रशान्तसुमुखो यः स्वाश्रितानन्वहं
तस्मै खि्रस्त्वभिधाय पुण्यवपुषे भक्त्यार्पयाम्यञ्जलिम् ॥४॥

"यस्त्वात्मानमपापमद्य मनुते स क्षेप्स्यति प्रस्तरं
ह्यादौ नान्य" इति ब्रुवन् मरियकां योऽत्रायत प्रेमतः ।
आरुह्याद्रिवरं चकार महितं धर्मोपदेशं च य-
स्तस्मात् ख्रिस्त्वभिधाद्गुणावलिनिधेर्लब्धाशिषः पूजिताः ।५।

आदेशा दशसंख्यका नतशिरोधार्या हि यस्यानघाः
सर्वैरत्र शुभेच्छुभिश्च मनुजैः श्रद्धालुभिः सर्वदा ।
दिव्यैर्दूतवरैस्सुरस्थतनुभिर्यस्सन्ततं संवृत-
स्तस्य ख्रिस्त्वभिधस्य सूक्तिनिचयैः प्राप्यं हि निःश्रेयसम् ।६।

त्याज्या प्रत्यपकारबुद्धिरखिलैर्वस्त्रापहर्त्रे स्वयं
दत्त्वा कञ्चुकमप्यदभ्रकरुणापूर्णेन चित्तेन तम् ।
सुप्रीतं कुरुतेति शिष्यनिवहान् यः प्रोक्तवान् निष्ठया
तस्मिन् ख्रिस्त्वभिधे सुधार्मिकमणौ सक्तं मनः सात्त्विकम् ।७।

अन्धान् नष्टविवेकसत्पथगणान् पङ्गूकृतान् दुर्नयैः
सत्सूक्तिश्रवणेऽतिमात्रबधिरान् दौष्ट्ये रतान् सन्ततम् ।
अश्रद्धान् जनताहितार्थकरणे रागादिदोषान्वितान्
हे ख्रिस्तो ! दुरितावृतान् हतधियः सन्त्राहि शीघ्रं जनान् ।८।

१३. श्रीकालिदासाष्टकम्

द्राक्षापाकललत्स्वसूक्तिनिवहैः पीयूषगर्वापहै-
र्विद्वत्पामरयोरपास्य च मिथो भेदं विना संशयम् ।
आनन्दाम्बुधिवीचिमज्जनरसान् कुर्वन् सचेतोव्रजान्
वन्द्यः पुण्ययशाः परं विजयते श्रीकालिदासः कविः ॥१॥

अर्थालङ्कृतिसद्रसान्वितगुणानर्घावलीभासुरैः
श्लोकैश्चेतसि भावनास्फुरणतः प्रीतिं विधायानघाम् ।
राजन्तं कविसार्वभौममनलं वाणीकटाक्षाञ्चला-
ल्यारामं विनयान् मुदा नमत भोः श्रीकालिदासं सदा ॥२॥

यत्काव्यं रघुवंशवर्णनपरं शाकुन्तलाख्यं तथा
यत्सन्नाटकमङ्कसप्तकयुतं माधुर्यधुर्यं मतम् ।
पाश्चात्यैरपि काव्यरत्नरसिकैर्भाषान्तरास्वादकै-
स्तेन श्रीयुतकालिदासकविना प्राप्तं यशः शाश्वतम् ॥३॥

धूमज्योतिरपोऽनिलादिघटितं जीमूतमप्यादरात्
सन्देशार्थकलापवाहनचणं चक्रे च यत्तूलिका ।
देव्याराधनलब्धसुन्दरवचोगुम्फाय विद्वन्मणि-
श्रेष्ठायामलकीर्तये मम नमः श्रीकालिदासाय हि ॥४॥

सत्काव्यं च षडाननोद्भवपरं षण्णामृतूनां तथा
यश्चक्रे क्रमशोऽथ वर्णनमसीमानन्दसन्दायकम् ।
तस्मात् स्थाणुपदारविन्दनिरताद्भक्तोत्तमैरादृता-
दन्यः कोऽर्हति वन्दनां जनततेः श्रीकालिदासात् कवेः ॥५॥

उर्वश्यां परमानुरागविवशस्यैलस्य राज्ञो भृशं
तद्वन्मालविकारतस्य कृतिनस्तस्याग्निमित्रस्य च ।
वृत्तान्तेन मनोज्ञरूपकयुगं यो निर्ममे हर्षत-
स्तस्यानर्घकवेः कृतीः पठत भोः श्रीकालिदासस्य वै ॥६॥

रात्रौ दीपशिखेव भूपतनयेत्याद्युक्तिवैचित्र्यतः
सम्प्राप्यानुपमं यशः सहृदयैरुद्गीयमानं मुदा ।
अन्यः साहसमाचरेत् कविपदे गर्वं न वोढुं कदा-
प्यग्रे तिष्ठति भारतीपदरते श्रीकालिदासे कवौ ॥७॥

अद्यत्वे सुरभारतीविषयिणी विद्याप्रवृत्तिर्गता
न्यूनत्वं भरतक्षितावपि विधेर्वामत्वहेतोर्भृशम् ।
नो जाने कति वा त्वदीयकवितामास्वादयेयुः स्वतः
साक्षात् श्वस्तनभारते मम कवे श्रीकालिदासानघ ।।८।।

१४. श्रीरामकृष्णाष्टकम्

गाढाज्ञानतमोमलीमसतमे नास्तिक्यझंझामरु-
त्तीव्राघातकदर्थितेऽवनितले शैलेन्द्रदार्ढ्यान्वितः ।
भक्त्युत्तेजितभव्यता परिमिलच्चैतन्यरश्म्युल्लस-
द्दिव्याभाकलितो जयत्यतितरां श्रीरामकृष्णो यतिः ।।१।।

वैदुष्यं परमात्मबोधविषये नात्यन्तमावश्यकं
नित्यानित्यविवेचनाविषयिणी स्याच्छक्तिरेतद्विना ।
तथ्यस्यास्य निदर्शनं स्वचरितं यो दर्शयामास तं
नौमि श्रेष्ठयतीन्द्रमादरयुतः श्रीरामकृष्णं मुदा ।।२।।

पाश्चात्यान् श्रुतिदर्शिताध्वकुतुकान् कृत्वा विवेकी भृशं
लब्ध्वानन्दमपि स्वकर्मणि परिव्राडुत्तमो योऽभवत् ।
मान्यः स प्रथितो महानिह विवेकानन्दसंज्ञोऽमुना
सन्मार्गे विधिवत् प्रशिक्षिततमः श्रीरामकृष्णेन हि ।।३।।

ग्रामीणानपि पामरान् लघुकथाख्यानेन संप्रीणय-
न्नुद्बुद्धानकरोत् सुबोधकवचःपीयूषदानेन यः ।
दुर्गाराधनकर्मदत्तमनसे तस्मै यतीन्द्राय भोः
कार्या संप्रति सन्नतिश्च सततं श्रीरामकृष्णाय वै ।।४।।

दान्तिक्षान्तिशमादिभिर्गुणगणैर्नैसर्गिकैर्भूरिशः
पुष्टैः सादरलोकसंग्रहपरे सत्कर्मणि व्यापृतैः ।
सद्भिर्वन्द्यतमं समस्तभुवने श्लाघ्यापदानं ध्रुवं
जानीमो न हि कञ्चनापरमिह श्रीरामकृष्णादृते: ।।५।।

ईत्यातङ्ककदर्थितानवशतासंपोडितानामयै-
र्वार्धक्याच्छ्लथगात्रविक्लबगतोन्निष्किञ्चनत्वार्दितान् ।
आश्वस्तान् विविधोपचारनिरताः कुर्वन्ति ये सादरं
शिष्याः श्लाघ्यतमा जयन्ति जगति श्रीरामकृष्णस्य ते ।६।

शान्तं पङ्कजरम्यमाननमलं मन्दस्मितेनाञ्चितं
दृष्टिः पूर्णकृपाकटाक्षतरला विद्योतमाना शुभा ।
एवं दिव्यविभान्वितः प्रकटितप्रेमा च यो भासते
तस्मिन् वन्द्यतीश्वरे दृढरतः श्रीरामकृष्णे सुधीः ।।७।।

सर्वाभीप्सितवस्तुदानचतुरे कल्पद्रुमे तिष्ठति
प्रज्ञाहीनतया प्रसारितकरा यत्कण्टकिक्ष्मारुहान् ।
नाथामोऽल्पफलार्थिनस्तदिह नः सिद्धं कुशिक्षावशात्
क्षन्तव्या वयमन्धदृष्टिकलुषाः श्रीरामकृष्णानघ ।।८।।

१५. श्रीगान्ध्यष्टकम्

यो हिंसाविमुखत्वमुत्कटदयास्नेहार्द्रचेतस्कतां
मेने कातरभावलेशरहितां स प्रौढधीभासुरः ।
सत्यान्वेषणसन्ततोद्यमरतः सर्वत्र सत्कीर्तिमान्
गान्धिः सत्त्वशमादि सद्गुणनिधिर्वन्द्यो महात्माऽनघः ।।१।।

धर्मो राष्ट्रनयश्च मानवहिते सामर्थ्यवन्तौ पृथक्
सामानाधिकरण्यमिष्टमनयोर्नो दुश्शकं चापि तत् ।
एतद् यः प्रकटीचकार विधिवत् तं कर्मचन्द्रात्मजं
गान्धिं मोहनदाससंज्ञितमहं भक्त्या नमाम्यन्वहम् ॥२॥

खड्गास्यादिभुशुण्डिकान्त विविधप्रध्वंसकेभ्यो विना
चक्रावर्तनतन्तुनिर्मितिविधामार्गेण चैकेन वै ।
स्वातन्त्र्याप्तिसुखानुभूतिमहिता चक्रे पुनश्चापि सा
वन्द्या भारतपुण्यभूमिरधुना श्रीगान्धिना तेन हि ॥३॥

आफ्रिक्काभिधदेशसीम्नि समदैर्घूत्कारसक्तैर्महा-
धूर्तैर्गौरवपुर्धरैरवमतो नैवाप यो विक्रियाम् ।
स्वीये भारतभूतले न सुमनःस्रग्भूषितो नन्दथुं
तस्मै मे भवताद्ध्रुवं नम इदं श्रीगान्धये सादरम् ॥४॥

शिक्षा ग्राह्यतमा निरस्तदुरिता कर्मण्यतापादिका
श्लाघ्यं कर्म च लोकसंग्रहपरं चेत्याह यस्सन्ततम् ।
सत्याहिंसनतत्परात् निरशने धर्म्ये च निष्ठावतो
नान्यं वेद्मि गुणावलीशुभतरं गान्धेश्च तस्माद्भुवि ॥५॥

लेढुं वाञ्छति तूर्णमेव च करांगुल्यग्रमुत्साहवा-
नालोड्योदकमादरेण गुडसम्मिश्रं हि तृष्णार्दितः ।
गान्धेस्तस्य महात्मनः सुविदिताः शिष्या रताः शासने
त्यक्तादर्शकलङ्कपङ्किलतमाः स्वार्थाप्तिबद्धस्पृहाः ॥६॥

नानाधर्ममतानुयायिषु मिथः स्पर्धा सदैवावह-
त्स्वीदृक्ष्वन्यतमो जघान गुणिनं हा लोहनाड्या द्रुतम् ।
गान्धावेवमहो मृतिं गतवति क्लेशार्दिताः साधवो
दैवे दत्तभराः स्वदेशसुखसौभाग्यादिषु स्थायिषु ॥७॥

शिक्षाकेन्द्रगताः पिबन्ति मदिरां वैदेशिकैरंशुकैः
स्वान्यङ्गानि समावरन्ति बहवः संसत्सदस्या अपि ।
मुष्ट्याघाततलप्रहारकुतुकाः हन्ताधुना भारते
गान्धे राष्ट्रपितः स्वयं तव पुरः स्थातुं न लज्जेत कः ।।८।।

१६. श्रीदयानन्दाष्टकम्

सुप्तान् विस्मृतपूर्वगौरवकथान् यो भारतीयान् जनान्
जाग्रत्सक्रियसुस्थितौ दृढरतांश्चक्रे हि निस्संशयम् ।
भव्यां वैदिकमन्त्रसञ्चयसुधां यः पाययामास च
श्रेष्ठः सच्चरितो महानिह दयानन्दः स मान्यः सताम् ।।१।।

धान्यं सत्कृषको यथाऽत्र कुरुते तुच्छाद्विविक्तं तुषा-
द्धंसो दुग्धमिवाम्बुनोऽपि च पृथक् तद्वद्द्वयं तीक्ष्णधीः ।
सच्छ्रद्धामथ भक्तिमान्ध्यकलुषां चक्रे विभक्तां पृथक्
वन्दे तं सुगुणार्णवं खलु दयानन्दं महर्षिं सदा ।।२।।

आर्याणां विततिं जगत्यभिनवां चक्रेऽयमुत्साहतो
दीनानां हितकारिणीं जनगणोन्मेषप्रदां निश्छलाम् ।
पौरस्त्याः कृतितत्परा न हि परं स्वप्नानुभूत्युत्सुकाः
संमृष्टः कुकलङ्क एष च दयानन्देन तेनैव हि ।।३।।

धर्मग्रन्थचयस्य विश्ववितत्स्यानादरानिच्छया
दुर्व्याख्याननिराकृतिं कृतवते सत्यार्थसुस्फूर्तये ।
वेदानामपि भाष्यमादृततमं नूत्नं विधायामलं
सद्धर्मोद्गतितत्पराय च दयानन्दाय तस्मै नमः ।।४।।

द्रव्यादीनि विलोभनानि वत हा मर्त्यान् हि धर्मान्तर-
स्वीकारेण कलङ्कितान् विदधति त्रातुं वराकानमून् ।
यः शुद्ध्याख्यमुरीचकार महितं कर्म स्वयं पावनं
जाने प्राज्ञतमं परं न हि दयानन्दाद्धि तस्मात् सखे ॥५॥

अश्रान्तश्रुतिमन्त्रपाठविधिना होमाख्यसत्कर्मणा
तैस्तैः पावनलोकसंग्रहपरैः कृत्यैरनन्तैस्तथा ।
पापौघापसृतिं विधाय तदनु क्षेमं च पुण्यात्मनां
धर्मस्फीतिकृतौ यतेमहि दयानन्दस्य शिष्या वयम् ॥६॥

आ बाल्यादघवर्जितेऽथ मुनिवर्याराधिते वर्त्मनि
प्रेम्णा सञ्चरति स्म यः प्रकटितस्थैर्यप्रकर्षः सदा ।
ईर्ष्यासङ्कुलमानसैरुरुमुदा सन्तर्जिते पीडिते
तस्मिन् वन्द्यतमे महात्मनि दयानन्दे रतिर्मादृशाम् ॥७॥

येऽस्मास्वत्र विवेकपुष्कलतया त्वन्मार्गगाः सन्ततं
तान् कारुण्यनिधे नराननुगृहाणाज्ञाकृतोऽस्ताशुभान् ।
ये निन्दन्त्यनुवासरं विमुखतोपेक्षावतस्तानलं
स्वामिन् भारतमेदिनीसुत दयानन्द! क्षमस्वाधमान् ॥८॥

१७. श्रीविनोबाष्टकम्

नाम्नासौ हि विनायको न हि परस्तस्यास्ति वै नायकः
सूनुर्ह्येष मतः सतो नरहरेर्माताऽस्य सा रुक्मिणी ।
धर्मज्ञः शुभचिन्तको नयवतां नेता विशालाशयो
"भावे" वंशमणिः स राजति विनोबाख्यः सतामग्रणीः ॥१॥

भीष्मं शान्तनवं वदन्ति कवयः स्वेच्छामृतिं भास्कर-
स्यौदीच्यायनमिच्छति स्म स मृतेर्हेतोः पुनः किन्त्वसौ।
खाद्यं भेषजमप्यहो परिहरन् सप्ताहकालेन वै
वव्रे मृत्युमितीषदन्तरयुतं वन्दे विनोबाभिधम् ॥२॥

कृष्यर्थे च परिश्रमे धृतरतीन् भूयोऽनुगृह्णन् धरा-
खण्डांस्तेषु यथायथं च वितरन् दानेन सत्कर्मणा।
ग्रामं ग्राममटन् जनानुरुदयः प्राबोधयत्तेन वै
लब्धा भूरिगुणार्जिता भुवि विनोबाख्येन कीर्तिः परा ॥३॥

येषां हृत्सु दयालवोऽपि न पुरा लेभे स्थितिं ये पुन-
र्हिंसाकर्मसु काञ्चने च कमनीयांगीष्वपि व्यापृताः।
चौरान् शान्तिपथाध्वगान् कृतवते तान् धर्मनिष्ठान्वितान्
सत्याहिंसनतत्परानपि विनोबाख्याय तस्मै नमः ॥४॥

सौजन्येन दयार्द्रलोचनतया दीनानुकम्पाढ्यया
विख्यातः शमसम्पदा स्थिरतपाः सद्ब्रह्मचर्यव्रती।
नानाधर्मपथानुयायिषु परा श्रद्धास्ति तस्यामला
को न्वस्माद् गुणवत्तरो वद विनोबाख्याच्च भूमौ भवेत् ।५।

धर्म्यं पुष्कललोकसंग्रहपरं सौभ्रात्रपूर्णं कला-
साहित्यामलसंस्कृतिव्यतिकरैर्विद्योतितं सन्ततम्।
पन्थानं स्फुटदीप्तिरम्यमनुगच्छामात्तभक्त्यादराः
शिष्याः प्रेमभराः सदैव हि विनोबाख्यस्य नेतुर्वयम् ॥६॥

यस्योपज्ञमशेषराष्ट्रहितकृत् सर्वोदयान्दोलनं
यात्राः पादकृताश्च यस्य जनतोद्बोधाय दक्षाः स्मृताः।
श्रेष्ठे भारतमेदिनीप्रियसुते सक्ता हि तस्मिन् विनो-
बाख्ये नेतरि साधवो जनहिते बद्धस्पृहाः सादरम् ॥७॥

गोहत्याप्रतिसन्निरोधविषये यत्नस्तवासीन्महान्
त्वत्स्वप्ने स्थितिलाभतृप्तिरभवद् ग्रामस्वयंपूर्णता ।
गान्धेः शिष्य समस्तधर्मसमता ग्रन्थस्थिता केवलं
किन्त्वस्माद् न निराशतां व्रज विनोबाख्य क्षमाभूषण ॥८॥

-:०:-

(५)

मनोरञ्जनस्तबकः

१८. चलच्चित्राष्टकम्

चित्रीकृत्य च सम्मुखे खलु पुरावृत्तानि सन्दर्शयत्
चेतोहृन्ति च तानि तानि विविधान्युज्जीवयत्येव यत् ।
नानानृत्यकलाप्रदर्शनपरं गीतैश्च संभाषणै-
र्नॄणामद्य मुदे चकास्ति हि चलच्चित्रं समेषां सखे ॥१॥

यस्मिन् भक्तिविवर्धिकाः श्रुतिकथाः सन्त्येव चित्रीकृता
वीराणां च पराक्रमा मृगदृशां केलीविलासास्तथा ।
यस्मिन् पुष्टिमवाप्नुवन्ति च रसाः शृङ्गारमुख्याश्च तत्
वृद्धो वापि युवापि वा भुवि चलच्चित्रं न कः शंसति ॥२॥

भद्रं कर्म शनैः शनैः प्रचरति क्षोणीतले नाशुभं
कर्मेति प्रकटं वदन्ति हि बुधा लोकस्थितिज्ञाः पुनः ।
हत्यादुर्व्यभिचारलुण्ठनमुखा दुष्कृत्यसंघा भुवि
व्याप्तिं यान्ति विशेषतः खलु चलच्चित्रेण निस्संशयम् ॥३॥

दृश्यस्यानघरूपकस्य बहवः सन्त्यत्र भव्या गुणाः
पर्यालोचनतोऽमृतात्मकतया श्राव्यस्य साकं गुणैः ।
एवं हर्षविवर्धकाय निखिलक्षेमावहायादराद्
दत्तासीमधना जनाः खलु चलच्चित्राय हृद्याय हि ॥४॥

चित्तोरोजकता सुनीतिघटनासामर्थ्यमन्यादृशं
कान्तेव प्रणयोपदेशपटुतेत्याद्यैश्च युक्ताद् गुणैः ।
योगक्षेममयो भवेद्धि सुतरां लोकस्य लाभो महान्
तस्मादद्य कलानिधेः खलु चलच्चित्रात् प्रशस्यात् सदा ।५।

यद् दृष्ट्वा विरुदन् क्षणेन शिशुरप्यानन्दपूर्णो भवेद्
यस्यास्वाद्यतमांशसञ्चयवशान्मूर्खोऽप्यलं हृष्यति ।
यस्मिन् भिन्नरुचेर्जनस्य च रतिः को वा कलास्वादक-
स्तां लोकप्रियतां निषेधति चलच्चित्रस्य तस्याधुना ।।६।।

येन स्वप्नविलोकनादिव सुखं सर्वानुभूतं सदा
नास्त्यन्यद् भुवि चित्तरञ्जनचणं यस्माद्धि सर्वप्रियात् ।
द्वित्राभिः खलु होरिकाभिरपि यद् विस्मारयेद्वैशसं
रज्यत्यान्तरचेतना मम चलच्चित्रे च तस्मिन्नहो ।।७।।

केचित् सन्ति विरक्तिशुद्धमनसस्त्वय्यद्य रक्ता न ये
केचिद् दर्शनलालसास्तव सदा सन्त्यक्तनिद्रादिकाः ।
अस्माकं न विशेषतस्त्वयि रति र्नो वा विरक्तिः परा
भो भो सज्जनचित्तहर्षद चलच्चित्र ! प्रसन्नं भव ।।८।।

१६. पत्रिकाष्टकम्

वृत्तान्तप्रसृतिप्रयोजनवती विज्ञापनाद्यैर्युता
क्रीडारङ्गविशेषवृत्तविशदीकारेऽपि नित्योद्यता ।
वस्तूनामपि मूल्यवृद्ध्यवनती संसूचयन्ती परं
लोकप्रीतिकरी भृशं विजयते दैनन्दिनी पत्रिका ।।१।।

विज्ञानार्जनतृप्तिपूर्णहृदयान् भव्याग्रलेखैर्जनान्
कृत्वा याऽत्र समाजशिक्षणविधौ साह्यं करोत्यन्वहम् ।
तां सर्वोपकृतिप्रशस्त्युपचितामानन्दसंवर्धिनीं
को नामानिशमादरेण न पठेद् दैनन्दिनीं पत्रिकाम् ॥२॥

सर्वस्यापि च सर्वकारघटकस्यालोचनां सुस्थिरा
या वै तूलिकया निशाततरया लोकप्रगत्युत्सुका ।
दृष्टे दोषगणे करोत्यपभया विद्वेषबुद्धिं विना
सेवा पत्रिकया तया नु विहिता नूनं प्रशस्यानघा ॥३॥

या चित्राण्यतिसुन्दराण्यनुदिनं सम्मुद्रयत्यादराद्
व्यक्तीनामपि पुण्यभव्यनिलयादीनां स्थलानां तथा ।
चिन्ताप्रेरकलेखसन्ततियुतान्युत्साहदायै पुन-
स्तस्यै स्यां नतमस्तकोऽहमनिशं सत्पत्रिकायै ध्रुवम् ॥४॥

उद्वाहेच्छुवधूवरप्रविचये सौकर्यहेतोस्तथा
वस्तूनां क्रयविक्रयादिविषये विज्ञापनं दीयते ।
गेहप्रश्नसमाधिरप्यहरहः क्लेशं विना सिध्यति
प्राप्यं लौकिकभूतिसक्तहृदयैः सत्पत्रिकाया बहु ॥५॥

चर्चाभिर्विविधाभिरेव हि कलाकार्यक्रमाणां भृशं
ग्रन्थानां गुणराशिभूषणवतामालोचनाभिस्तथा ।
नूनं बुद्ध्युपजीविनामनुपमैः केलीविलासैश्च यत्
संभूतं सुरभीकरोति भुवनं तत्पत्रिकाया यशः ॥६॥

यद्यत् साधु भवेदसाधु च तथा सामाजिके मण्डले
तत्तद् वर्णयति स्फुटं जनहितायैवाद्य सा पत्रिका ।
रूपं दर्पणगं पुरो भुवि यथा सन्दृश्यते मानवैः
सर्वं दृष्यमहो विशेषविधया सत्पत्रिकायां सदा ॥७॥

दूरीकृत्य दुरात्मनां तु दुरितान्युन्मूल्य दुष्कण्टकान्
सत्कर्मोत्सुकतां सदैव जनतामध्ये प्रतिष्ठाप्य च ।
सत्कीर्तिप्रभया सतां बहुमता विद्योतिताशाऽनघा
कर्तव्येषु रता कलङ्करहिता भूयाः सदा पत्रिके ॥८॥

२०. निद्राष्टकम्

अर्कांशुव्रजशोषितेव लतिका सन्तापिते निर्भरं
रात्रौ वापि दिवापि वा श्रमवशात् सादं गते मानवे ।
उत्साहं जनयन्त्यपेतविशयं कृत्यान्तरालम्बने
निद्रा सर्वसुखावहा विजयते क्लेशानपाकुर्वती ॥१॥

कीटैर्मत्कुणकादिभिर्विरहितां स्वप्नैस्तथानाविलां
शय्यामेत्य कुशेशयातिमृदुलां शैत्योष्णबाधां विना ।
अक्लिष्टामनुपद्रुतामहरहर्विश्रान्तिसौख्यप्रदां
निद्रां यः खलु सेवते भगवतीं नूनं स धन्यः स्मृतः ॥२॥

कान्ता मे निकटं न याति नितरां बिब्बोकिनी हन्त मे
सूनुर्ज्ञानविवर्जितो मम धनं स्तेनैर्ह्रियेतेति च ।
नानाचित्तविकारदूषितधियः खिद्यन्ति रात्रिन्दिवं
विश्रान्त्यावहनिद्रया विरहिता ये मन्दभाग्या नराः ॥३॥

व्यायामः क्रियते गतागतशतैः शीतं तथा पीयते
पानीयं मृदुमञ्जुगीतकगणैश्चेतः समाधीयते ।
तैलाभ्यक्तललाटकाश्च गुटिका आस्वाद्य संख्यातिगा
निद्रायै समनुष्ठितप्रयतनाः सन्त्यत्र भोः कोटिशः ॥४॥

हर्म्येऽसंख्यमनोज्ञरत्नखचितेऽप्यप्राप्तनिद्रः सदा
क्लिश्नात्येव धनी नरः सुमधुराण्यास्वाद्य भक्ष्याण्यपि ।
निश्चिन्तः स्वकुटीरवासमुदितो ह्यत्यन्तसाधारणो
निद्राया लभते सुखं ननु नरः प्राग्जन्मसत्पुण्यतः ॥५॥

शय्या सा मृदुलोपधानसहिता मन्दानिलोत्पादकं
सद्विद्युद्व्यजनं तथा च सविधे रम्याश्च गन्धादयः ।
एवं चेत् सुविधोपचारनिकरः स्वस्थस्य मर्त्यस्य वै
निद्रायाः सुखसन्ततेः प्रतिनिधिर्नैवास्ति भूमण्डले ॥६॥

कांश्चिद् वायसनिद्रयैव नितरां तृप्तान् समीक्षामहे
केचित् सन्ति हि कुम्भकर्णसदृशा ये दीर्घनिद्रोत्सुकाः ।
आनिष्किञ्चनमाधनाढ्यमवनौ भूयस्यथाल्पापि वा
निद्रायां रतिरस्ति सर्वसहजा ह्याविज्ञमापामरम् ॥७॥

कश्चित् सुप्तिमुपैति पादपतले विन्यस्तशीर्षः शिला-
पट्टे हर्म्यवरेऽपरश्च सम्मुखं पल्यङ्कशायी तथा ।
आदन्तीन्द्रमथापिपीलिकमिह ब्रह्माण्डगाः प्राणिनो
निद्रे ! ते वशगा वयं च मनुजा अक्रीतदासा ध्रुवम् ॥८॥

२१. प्रेमाष्टकम्

हृद्यः सद्गुणराशिनिर्वृतिविलासोद्बोधकः प्राणिनां
दूरोत्सारणतत्परोऽथ दुरितव्यूहस्य निश्शेषतः ।
सर्वानुग्रहकृत् सदा विजयते सत्प्रीतिसन्दायकः
प्रेमा वत्सलतानुरागभगवद्भक्त्यादिरूपो भृशम् ॥१॥

नानाधर्मविचारसञ्चयगुणादर्शादियुक्तान् जना-
नेकत्रैककुटुम्बवर्तिन इव क्षिप्रं करोतीह यः ।
सर्वानप्यनुनीय मोदमुदितान् कुर्वन्तमेवानघं
प्रेमाणं कलहोन्मुखत्वविहतौ दक्षं तमाराधय ।।२।।

अश्रूणां यदि बिन्दवोऽत्र कतिचिन् मृष्टा भवेयुः सखे
द्वित्राणामपि चेत् क्षुधा परिहृता श्राणाप्रदानादपि ।
पापौघाचरणेन पङ्किलतमा दिव्यामृतस्पर्धिना
प्रेम्णा धौतमला भवन्ति हि जनाः क्षोणीतले सर्वदा ।।३।।

विश्रान्त्यर्थसुषुप्तितृप्तमनसः स्वल्पान्ननीतक्षुधो
वस्त्रागारविभूषणादिविषये नात्यन्तसक्तास्तथा ।
आत्मश्रेयसि कांक्षया बहुजनक्षेमाभिलाषेण च
प्रेम्णे जीवितमर्पयन्ति कृतिनः स्वार्थांस्त्यजन्तो मुदा ।।४।।

शुश्रूषा कृतकेतरा सदयता या प्राणिमात्रोन्मुखी
सेवासक्तिरदभ्रकारुणिकता मूकान्धपङ्ग्वादिषु ।
विद्यावित्तविवर्जितेषु च तथा दुष्कर्मसक्तेषु वा
तत् किं वस्तु सुखावहं भुवि भवेत् प्रेम्णो न यल्लभ्यते ।।५।।

श्रेयःप्राप्तिरसंशयं भवति हि त्यागे कृते केनचित्
सूते सत्फलमेव चाश्रुनिकरस्त्यक्तः परेषां कृते ।
न प्राप्नोति हि दुर्गतिं सुचरितो मर्त्यश्च कल्याणकृत्
प्रेम्णः पुण्यवतैव कीर्तिसुभगं लभ्येत सर्वं फलम् ।।६।।

अज्ञानप्रभवं तमोऽतिबहुलं दूरीकृतं विद्यया
क्लेशः कृच्छ्रतरोऽतिदैन्यजनितो द्रव्येण नीतः क्षयम् ।
नैष्ठुर्योत्थविभीषिकापनयनं कर्तुं समर्थं ध्रुवं
प्राप्ते प्रेम्णि नरेण पूर्वसुकृतैः प्राप्तं समस्तं खलु ।।७।।

वात्सल्येन वशं नयेदवरजान् साधूक्तिभिः पण्डितान्
भक्त्यैवेश्वरमादरेण च गुरून् प्रीत्या सदा योषितः ।
आराध्येत्थमशेषलोकमनिशं न्याय्ये पथि स्थापयन्
प्रेमन् ! भव्यकृदग्रग ! त्वयि रतो जेतुं क्षमःक्ष्मातलम् ॥८॥

२२. योषाष्टकम्

सौशील्येन नयेन सूनृतगिरा स्वाकृष्टबन्धुव्रजा
शुश्रूषानिरताऽखिले गुरुजने सुस्मेरवक्त्रा सदा ।
प्रेमालापविचक्षणा गुणयुता पाकादिविद्यापटु-
र्योषा दोषविवर्जिता वितनुते सौभाग्यवन्तं नरम् ॥१॥

स्वापत्यव्रजशिक्षणाय यतते भर्तुः प्रियं कांक्षति
स्वं गेहं रुचिरं करोति सततं मालिन्यमुक्तं शुभम् ।
यावच्छक्ति समाज सेवनरता पुष्णाति या संस्कृतिं
योषां तां प्रणमामि सादरमहं साध्वीकुलालङ्कृतिम् ॥२॥

रुग्णे भर्तरि चाथवात्मजनुषि स्वापं विहायैव या
तत्सेवानिरता स्थिरा प्रयतते स्वास्थ्याप्तये सन्ततम् ।
बन्धूनां कुशले स्वकीयकुशलं मत्वा प्रसन्ना च या
प्रख्यातिः किमु शाश्वतीह न तया संप्राप्स्यते योषया ।३।

या वै गार्हिकतुन्नवायविधया निर्माति वस्त्राणि स-
त्कूर्पासप्रभृतीनि दुर्व्ययपरीहारार्थमात्मौकसि ।
संगीतादिकलासु लब्धरुच्चये सद्गेहिनीमौलये
योषायै विनयान्ममास्तु नमसां तस्यै सहस्रं सखे ॥४॥

स्रष्टुं विश्वमथास्य सुस्थितिमपि प्रेम्णा विधातुं क्षमा
संहर्तुं प्रभवत्यसीमविभवा योषैव शक्त्यात्मिका ।
तां वाञ्छन्त्यमलाः सुकर्कशधियः क्रुध्यन्ति तस्यै जना
योषायाः खलु बिभ्यति त्रिभुवनान्यस्या निगूढाकृतेः ॥५॥

बाल्ये सम्यगधीतिबोधनिरता तातेन संवर्धिता
या भर्त्रा परिपाल्यते प्रणयिना तारुण्यकाले मुदा ।
तस्याः शान्तिदयानिधेर्हितरतेः संपक्वबुद्धेरहो
योषाया दृढशासने स्थितवतः पुत्रस्य भाग्यं महत् ॥६॥

कार्याकार्यविवेचनक्षमतया साकं कलाकौशलं
द्रव्यापव्ययवारणोत्सुकतया साकं सुखे कामना ।
साकं लौकिकबन्धतत्परतया भक्तिश्च सर्वेश्वरे
योषायां गृहनायिकोचितगुणा एते प्रशस्याः सदा ॥७॥

नानाक्लेशदकृत्यसञ्चयवशात् सादं गतेनान्वहं
विश्रामाप्तिसुखैकलोलुपतया भर्त्रोपधानीकृते ।
दोलाप्रेंखणचारुकर्मचतुरे मञ्जुक्वणत्कङ्कणे
योषे ! ते करपल्लवे सुदृढता किं न्वायसी वर्तते ॥८॥

-:०:-

(६)

उपस्कृतिस्तबकः

२३. पादपाष्टकम्

यो वै दुर्विषदूषितं च मरुतं हालाहलं शंभुवत्
संप्राश्याहरहः प्रयच्छति परं प्राणानिलं प्राणिनाम् ।
खिन्नायाध्वनि घर्मतप्तपथिकायात्यन्तशैत्यप्रद-
च्छायावान् दलराजिराजितशिराः स्तव्यः स सत्पादपः ॥१॥

पुष्पं पक्वफलं मरन्दमधुरं यः सन्ततं यच्छति
त्वक्पत्रादिभिरादरादपनयत्युग्रान् गदानप्यहो ।
वर्षाकारणमामनन्ति यमिमे विज्ञानदक्षाः परं
सर्वेषामुपकारकर्मचतुरं वन्दस्व तं पादपम् ॥२॥

बालक्रीडनकेषु वाद्यनिचयेष्वानद्धमुख्येष्वथ
प्रस्थानाक्षमदुर्बलप्रवयसामाधारयष्टिष्वपि ।
पल्यङ्कादिषु यद्विलासविहृतिः सन्दृश्यते तेन वै
किं किं न क्रियते सुखाय भुवि नः सत्पादपेनाधुना ॥३॥

यन्मूलं शयनालयीकृतमहो पाकालयत्वेन यद्
वित्ताभावविषादपूर्णजनतालक्षैः सदा स्वीकृतम् ।
स्वात्मव्रश्चनकौतुकानपि च यः स्वच्छायया तर्पयेत्
तस्मै मे नमसां शतं सविनयं सत्पादपायार्पितम् ॥४॥

अत्युग्रेण नदीरयेण तटयोर्मृत्स्नाविनष्टिं हरेद्
यन्मूलं प्रविसर्पि दिक्षु निखिलास्वानन्दमुत्पादयेत् ।
यश्चाजस्त्रकुठारविक्षतिसहो भूयः समुज्जृम्भते
लाभप्राप्तिरशेषमानवकुले तस्माद्धि सत्पादपात् ॥५॥

आसन्द्यासनपीठविष्टरमुखान् शाखाभिरुर्वीरुहां
स्कन्धैः पर्णचयैश्च वेश्मनिवहान् निर्मान्ति मर्त्या भुवि ।
मूलान्यौषधरूपतः फलततिं पक्वां च खादन्ति ते
को न्वङ्गो मनुजोपयोगरहितः सत्पादपस्योच्यताम् ॥६॥

मर्त्या भूरिकृतघ्नताकलुषितस्वान्ताः कुठारैर्द्रुमं
संछिन्दन्ति तथापि पादपवरो मर्त्योपकारोत्सुकः ।
आमूलाग्रमशेषमेव च वपुः प्रीत्यार्पयत्येषु वै
तस्मिन्नो भविता रतिर्वद भोः सत्पादपे कस्य वा ॥७॥

वर्षावारिणि हैमने च पवने तीक्ष्णातपे चाप्यहो
सातत्येन च लोकसंग्रहरतस्तिष्ठन् परं निश्चलः ।
स्वार्थत्यागगुणाप्तकीर्तिभरितस्त्वं राजसे भूतले
भो भोः पादप ! ते नमोऽस्तु सततं योगीन्द्रचूडामणे ॥८॥

२४. ग्रामाष्टकम्

पृथ्व्यम्भोऽनलमातरिश्वनभसां स्वातन्त्र्यपूर्त्यान्विता
भूतानामपि पञ्चकस्य विहृतिर्यत्रास्ति सर्वत्र हि ।
यश्चाकृत्त्रिमसुन्दरत्वनिलयो भव्यातिभव्यश्च स
ग्रामः सज्जनमण्डितः परिलसत्यानन्दहेतुर्भृशम् ॥१॥

सभ्यत्वस्य तथोदितस्य बहिरेवाकर्षकस्यात्र न
स्थानं दत्तमिति प्रमोदकरमेवेत्यत्र कः संशयः ।
विद्यासंस्कृतिवित्तवृद्धिविषये न्यूनोऽपि किंचित् क्वचिद्
ग्रामं तं च निसर्गरम्यमखिलप्रीत्यास्पदं पश्यत ॥२॥

साहाय्यं ननु सर्वकारजननेत्राद्यादवाप्योचितं
विघ्नानां विनिवारणं कृतवता वाञ्छानुसारं क्वचित् ।
स्वातन्त्र्योत्तरवत्सरेषु विगतेष्वीत्यादिबाधां विना
ग्रामेण प्रगतिं गतेन यतितं लब्धुं स्वयंपूर्णताम् ॥३॥

पेयाम्भःप्रदनालिका, सुरुचिरं ज्योतिश्च यद्वैद्युतं
यातायातसुखार्थवाहनपरा सम्यग्व्यवस्थाऽनघा ।
आवासोचितरम्यभव्यभवनान्येवं यथा स्यात्तथा
ग्रामायाश्रितसौख्यदाय गुणिने संप्रार्थ्यतां भावुकम् ॥४॥

भूयाद् धान्यसमृद्धिरिष्टफलदा वृष्ट्या च पर्याप्तया
व्याधीनां विनिवारणेन सुखिनः सन्त्वेव सर्वे भृशम् ।
नृणां जीवनहेतवे विवशता मा भूत् कदाचित् क्वचिद्
ग्रामान्निर्गमनं पुरं प्रति मुहुर्नूनं हि खेदावहम् ॥५॥

दक्षास्तक्षकतन्तुवायरजका ये लोहकारास्तथा
ह्यन्ये सौचिककांस्यकृत्प्रभृतयः शिल्पे विदग्धाश्च ये ।
एतेषां सततप्रयत्नफलतः सौख्यं च लब्धं जनैः
कीर्तिः शुभ्रतरा सदा प्रसरति ग्रामस्य तस्याधुना ॥६॥

पुर्यां यत् ससुखं वसन्ति धनिनो नानाकलातत्परा
नीतिन्यायविदश्चिकित्सकवरा दक्षाश्च तेऽध्यापकाः ।
क्षेत्रे पङ्कमलीमसे जलमये खाद्याभिवृद्ध्यै भृशं
ग्रामेऽश्रान्तपरिश्रमं कृतवतां नृणां हि सोऽनुग्रहः ॥७॥

ग्रीष्मे तिग्मकरे तपत्यनुदिनं वर्षे 'सुवृष्ट्यन्विते
हैमाहेषु च शीतकम्पिततनुः पुण्यार्जनायोद्यतः ।
शश्वत् त्वं खलु लोकसंग्रहरतस्तस्मादकस्मादपि
ग्राम ! त्वां यदि विस्मरेयमधुना पापार्जनं मे भवेत् ।।८।।

२५. पुर्यष्टकम्

शिक्षाधिक्यलवत्वभेदविहितं कृत्वा नितान्तं श्रमं
केचिन्मासिकदैनिकादिविधया निर्वाहहेतोः स्वयम् ।
स्वं स्वं वेतनमाप्नुवन्ति नियतं यस्यामजस्रं जनाः
सा मां पातु सदा धनार्जनकृते सर्वावलम्ब्या पुरी ।।१।।

उद्योगैर्बहुभिः सुकर्मकुशलस्याजीविकादायिनीं
भिक्षामप्यटतां क्षुधां कतिपयैर्ग्रासैर्निराकुर्वतीम् ।
लोकोऽयं सकलोपकारनिरतां वित्तप्रदानक्षमां
रम्यां तां वरदां पुरीं पुरुगुणां सन्त्यज्य गच्छेत् क्व वा ।।२।।

नानाहर्म्यगणैश्च सस्वनचलच्चित्रादिचेतोहर-
प्रेक्षागारकदम्बकैः सुमलतोद्यानैश्च रम्यैस्तथा ।
पेयानामपि भोजनस्य च गृहैः संगीतनृत्यालयै-
र्नूनं ख्यातिरुपार्जिता सुविशदा पुर्या तया श्रेष्ठया ।।३।।

सन्त्यत्रामलपुस्तकालयगणाः सद्विश्वविद्यालया
विद्यासंस्कृतिपोषणोद्यमवतां संस्थाश्च नानाविधाः ।
सत्सङ्गालयसंयुताः सुरुचिरा देवालया निर्मला-
स्तस्यै प्रार्थितभावुका भवत भोः पुर्यै जनाः सन्ततम् ।।४।।

वाणिज्यं समुपैति वृद्धिमनया देशे विदेशेषु च
प्रीत्या पर्यटका विदेशनिलया अस्यां रमन्ते सदा ।
राष्ट्रश्रेयसि सन्ततोद्यमरताः कुर्वन्ति सम्मेलना-
न्यस्या लौकिककार्यजातविदुषां प्राप्यं च पुर्या बहु ॥५॥

भ्रात्राप्यत्र नरः सदा विवदते क्रुध्यन् मिथो भर्त्सयन्
हन्तुं चाप्यविशङ्कमेव यतते लोभेन मित्राण्यपि ।
सर्वानेव च धिक्करोति विदुषः संस्तावको दुष्प्रभोः
तस्मात् कीर्तिरपीषदद्य मलिना जाता हि पुर्या बत ॥६॥

न ग्रामस्य न वा पुरस्य भवति ह्येकान्ततः सर्वदा
निन्दार्हत्वमनिन्दितेषु गणना वेत्यत्र शङ्का क्व वा ।
दोषाः सन्ति गुणाश्च तत्र वसतामाश्रित्य चेतोगतिं
पुर्यां दोषगुणावुभौ कथितवान् काव्येऽत्र सामान्यतः ॥७॥

इन्दुं चैव यथा विषं च गिरिशो दोषान् नियम्यात्मनः
कण्ठे सद्गुणसञ्चयान् स्वशिरसा श्लाघेऽग्रतः सादरम् ।
दोषोक्तिं मम मर्षय स्फुटगुणे सद्भिः सदाराधिते
हे भव्ये पुरि ! सत्परिश्रमवतां श्रेयःप्रदे हर्षदे ॥८॥

-:०:-

(७)

प्राणभृत्स्तबकः

२६. सिंहाष्टकम्

पर्णानां पततां मरुत्प्रचलितैः शाखाच्युतानां पुनः
शब्देभ्योऽपि भयप्रशङ्कितदृशां का वा मृगाणां कथा ।
शुण्डादन्तवतां बृहत्तनुभृतां भीदो गजानामहो
सत्त्वानामधिपोऽटविस्थितिमतां सिंहः सटामण्डितः ॥१॥

मर्त्यैर्वञ्चनकौतुकैर्बहुविधैर्यत्नैः कृतं वागुरा-
बद्धं रुद्धयथेच्छभव्यगमनं क्रोधाकुलं मानिनम् ।
क्षुत्क्षामत्वदशास्वपि प्रकटहुङ्कारं स्थितं पञ्जरे
गर्जन्तं रिपुभीषणं गतभयं सिंहं न जानाति कः ॥२॥

मौर्ख्येणाप्यथवातिनिष्ठुरतया सिंहेन यद्यत् कृतं
ग्रन्थेषु प्रतिपादितं च बहुधा यत्पञ्चतन्त्रादिषु ।
तत्तत् सूक्ष्मविचारभावितया हर्षं तनोत्येव हि
क्षिप्रं छात्रहृदन्तरेषु न भवेत् सन्देहलेशोऽत्र मे ॥३॥

दैत्येन्द्रं च हिरण्यपूर्वकशिपुं हत्वास्य पुत्रं पुनः
प्रह्लादं प्रविधाय हृष्टमनसं देवानरक्षद्धि यः ।
भक्तानुग्रहतत्पराय विभवे कारुण्यवाराशये
तस्मै मे नररूपिणे नम इदं सिंहाय दिव्यात्मने ॥४॥

दुर्गासप्तशतीति विश्वविदिते ग्रन्थे च यद्विक्रमः
ख्यातो निष्ठुरदैत्यमुख्यपृतनामध्ये च सर्वंदमः ।
जानीमो गुणराशिभासुरतरं शौर्यप्रकर्षान्वितं
देव्या वाहनरूपिणो न हि परं सिंहाच्च तस्माद्वयम् ।।५।।

तेजस्वी पुरुकातरस्य लपितं विद्वांस्तथा जल्पितं
मूर्खस्याप्यविवेकिनो विगणयत्येषैव वस्तुस्थितिः ।
क्रन्दन्त्वत्र सृगालरासभमुखाः क्षुद्राः सदा जन्तवो
मत्तेभाधिपकुम्भपाटनरतेः सिंहस्य का वा क्षतिः ।।६।।

हिंस्राः सन्ति सहस्रशोऽत्र भुवने जीवेषु मर्त्येष्वपि
त्रस्यन्त्येषु पुरः स्थितेषु पशवो ग्राम्या वराका भृशम् ।
दस्यौ हेतिकरे च घातकगणे कर्तव्यमूढा जनाः
सिंहे गर्जति किं करोतु हरिणो भीरुर्विना धावनम् ।।७।।

सन्त्यन्ये बहवः किलात्र पशवो ग्राम्यास्तथारण्यका
ये मर्त्यानितरांश्च जीवनिचयान् सुष्ठूपकुर्वन्ति हि ।
आहारार्थमथात्मजानसमुदे प्रध्वंसनोत्साहिना
किं तत् सर्जनकर्म यत्र विहिता श्रद्धा च सिंह ! त्वया ।।८।।

२७. हंसाष्टकम्

भैमीनैषधयोगसाधकयशा नैजेन दौत्येन यः
ख्यातो वृष्टिदिनेषु मानससरोवासीति पौराणिकैः ।
नीरक्षीरविवेचनक्षम इति ज्ञातः किलाप्तोक्तिभि-
र्हंसो हंस इतीरितः खगवरः श्रोत्रं न कस्यागतः ।।१।।

योगीन्द्रानवबुद्धजीवपरमात्मैक्यांश्च हंसाख्यया
प्राहुर्वाग्विशारदाः खरकरं शम्भुं च विष्णुं तथा ।
हंसं वाहनमामनन्ति कवयो वाचो विधेश्चापि तं
पक्षीन्द्रं कलनादभव्यगमनं सुश्वेतपक्षं शुभम् ॥२॥

प्रहेलिका
केनाजो ध्रियते नर क्वः कुरुते स्नानं च यानेन किं
कार्यं ब्रूहि च केन लब्धफलता शस्यास्ति को वा बलिम् ।
धर्मो हन्ति च कीदृशो दुरितकृत् को वाजनैरुच्यते
हंसेनाप्सु गतागतं कृतवता काको हतः कश्मलः ॥३॥
हिंसातत्परतामुपेत्य च मृगाधीशोऽस्ति सिंहाभिधो
हंसो वर्णसमागमेन भवति प्रीत्या हसन् निश्छलः ।
एवं व्याकरणज्ञकीर्तितगुणायाद्रोहसद्बुद्धये
हंसायासकृदर्पयेऽद्य नमसां साहस्रिकां सादरम् ॥४॥
सौन्दर्यं वपुषि प्रकृष्टविभवो मत्यास्तथा चेतसः
शुद्धिः सात्त्विकभावभासुरतमा नीरागतोद्वेल्लिता ।
इत्थं मान्यतमान् गुणान् कलयतो हंसात् परः प्राणभृत्
कश्चित् सागरमेखलाविच्चयतोऽप्यासाद्यते वा न वा ॥५॥
सोऽहं सोऽहमिति प्रबुद्धहृदयेनाम्रेडितं यः करो-
त्याप्नोत्येष नरो रहस्यमखिलं ज्ञानस्य तथ्यस्य च ।
अध्यास्यात्मविवेकशून्यहृदयो हंसस्य तूलैः कृतां
शय्यामज्ञतयाभिभूयत इति स्पष्टं तु बोध्यं नरैः ॥६॥
केकिन्युद्भटनृत्यकारिणि तथा काके च बन्धुप्रिये
गानालापविचक्षणे पिकवरे कल्योत्थिते कुक्कुटे ।
प्रेष्ठप्रेमणि वा कपोतकवरे रज्यन्ति सर्वे नरा
हंसे चैव तथा पयोजलविवेकिन्यब्जजातप्रिये ॥७॥

निन्देयं न तु निन्दनीयचरितान् निन्दा न किञ्चित्करी
तेषूपेक्षणमेव भात्युचितमित्येतद्धि कुर्वेऽधुना ।
नो वा धूर्तबकाय नापि च बलाकायै प्रदेयं मया
हंस ! श्वेतगरुत्मतां प्रवर ते स्वस्त्यस्त्वबाधं सखे ॥८॥

२८. गर्दभाष्टकम्

भारस्योद्वहने स्वविश्रमसुखं त्यक्त्वापि लग्नो ध्रुवं
सन्तोषेण न रिक्ततामयति यः सन्ताडितो भर्त्सितः ।
कृच्छ्रे कर्मणि सन्ततोद्यमरतः शारीरिकायासवान्
नूनं गर्दभ एष मेऽर्हति परां श्रद्धां सखे निश्छलाम् ॥१॥

शान्तोऽयं खलु कुंभकाररजकाद्यभ्यर्णसेवाव्रतः
शैत्यौष्ण्यादिसहिष्णुतासुविदितो निर्द्वन्द्व इत्यादरात् ।
कार्कश्येन रवस्य गर्हिततमं मेधाविहीनं वपु-
श्चारुत्वेन च वञ्चितं कृतदयो वन्दस्व तं गर्दभम् ॥२॥

चक्रस्य भ्रमणं तु दण्डविहितं हेतुत्वमस्माद् घट-
स्योक्तं तद्वदपीष्यतेऽस्य च पुनर्मृत्स्नाहृतेर्वस्तुतः ।
नीचान्नीचतरं च कर्म जनताकल्याणदं कुर्वता
प्राप्यं तेन च गर्दभेन विपुलं किं नाधुना सद्यशः ॥३॥

बुक्कन् घुर्घुरिकारवेण हृदये भीतिं समुत्पादयन्
शक्तो वारयितुं स्वहिंसकजनान् निस्संशयं कुक्कुरः ।
हन्तायं पुनरल्पशक्तिरवनम्रास्यो वराकः सदा
व्यर्थं क्रुध्यति गर्दभाय च जनः कर्तव्यसक्तात्मने ॥४॥

अत्यल्पादनतृप्तिमानहरहः स्वायासदत्तोद्यमः
शैत्यौष्ण्यादिसहत्वलब्धसुयशाः प्राप्तेन तुष्टश्च यः ।
वन्ये वा गृहसीम्नि मर्त्यनिवहैर्गुप्ते पशूनां गणे
जाने नान्यमुदात्तमादृततमं तस्मात् पशुं गर्दभात् ॥५॥

वैयाघ्र्यं परिधाय चर्म कुहकः कश्चिद्धतः कर्षकै-
र्गानोत्साहयुतोऽपरश्च मरणं गोसायुना प्रापितः ।
निन्दन्त्योऽत्र वराकमेनमनिशं दोषैकदृक्त्वोत्थिताः
श्रूयन्ते खलु गर्दभस्य विषये नानाकथाः प्राक्तनाः ॥६॥

कर्म ज्ञानमितीह चक्रयुगलं यात्राविशेषक्षमं
बोध्यं भव्यतरस्य जीवितरथस्यान्योन्य साहाय्यकम् ।
हीनं चान्यतरेण नैव चलतीत्यालोचयन्तः पुनः
पश्यन्त्येव विवेकिनो गुणगणांस्तस्मिन्नहो गर्दभे ॥७॥

वर्षावारिणि चातपेऽपि कृषकैर्यत्ने कृते भुञ्जते
सर्वे बुध्युपजीविनः सुखमयान् भोगानशेषेप्सितान् ।
यन्त्रागारसदा प्रयत्ननिरते भृत्यायुते वै भव-
त्युद्योगाधिपजीवितं सुखमयं हे गर्दभ ! क्ष्मातले ॥८॥

२९. करीन्द्राष्टकम्

शुण्डावालधिकर्णचालनरतो यस्सन्ततं तीक्ष्णधी-
र्गाम्भीर्यं स्फुटमेव मन्थरगतौ यस्यातिहर्षप्रदम् ।
घोरारण्यभुवि प्रपीडितदरिद्राणां कुटीरे तथा
वन्द्यो राजगृहेऽथ मन्दिरवरे मत्तः करीन्द्रः सदा ॥१॥

एको मोक्षमवाप निर्गुणपरैः स्तोत्रैः समुद्घोषितै-
रन्यो वृत्रहवाहनत्वमुदितः सुश्वेतवर्णस्तथा ।
अष्टौ दिग्गजतामवापुरनघा यद्गोत्रजाताः परं
ख्याताः प्राक्तनसत्कथासु बहवो वन्दे करीन्द्रं च तम् ॥२॥

देवागारमहोत्सवेषु लसितं ह्याभूषणैर्भास्वरैः
संग्रामेष्वपि दर्शितं स्फुटतरं चात्मीयशौर्यं महत् ।
वृक्षस्कन्धविकर्षणादि चरितैर्लोकोपकारः कृतः
किं किं नो कृतमुच्यतामिह करीन्द्रेणामुना भूतले ॥३॥

"सर्कस्" संज्ञितलोकरञ्जकमहासंस्थासु यद्गोत्रजै-
रभ्यासातिशयाप्यपुष्टिविभवैः कृत्यैश्च शारीरकैः ।
प्राप्तानन्दमहोदयाः खलु कृता आबालवृद्धं जना-
स्तस्मै पुष्कलसद्गुणाय च करीन्द्रायास्तु सन्मङ्गलम् ॥४॥

लक्ष्मीमेष पयोभिरम्बरसरिल्लब्धैः सदा सिञ्चति
प्रज्ञोत्कर्षचिरस्मृतिप्रभृतिभिः ख्यातोऽयमन्तर्गुणैः ।
विघ्नेशः सुमुखो गजाननतयेत्येतन्न जानाति को
न प्राण्यन्तरगं यशः सुविपुलं तस्मात् करीन्द्राद्भुवि ॥५॥

सुश्वेतानघदन्तयुग्मलसिता सर्पाभशुण्डान्विता
स्तंभस्पर्धिपदद्युतिप्रविलसत्पीनाङ्गभास्वद्वपुः ।
गण्डस्थानगलन्मदद्रवभरा प्रोत्तानकुम्भस्थला
लभ्यान्यैः पशुभिर्न चात्र सहिता शोभा करीन्द्रस्य सा ॥६॥

ऊर्वोरस्त्युपमानमस्य च करः कुम्भश्च योषास्तने
गत्याश्चास्य सुमन्दभव्यगमनं काव्येषु दृष्टं मुहुः ।
शम्भुं कृत्तिधरं वदन्ति मुनयः कुम्भोऽस्य मुक्ताकर-
श्चेत्येवं प्रथिते ममाभिरमते नित्यं करीन्द्रे मनः ॥७॥

स्नानं तेऽस्ति निरर्थकं खलु रजस्सक्त्या किलाभद्रया
सस्योद्यानविभञ्जने तव रतिर्दृष्टा च सीमातिगा।
एवं दोषयुतोऽपि सद्गुणगणश्लाघ्योऽसि तस्मात् सखे
वन्दे त्वच्चरणान् करीन्द्र! कविभिर्भूयोऽप्युपश्लोकित! ।८।

३०. काकाष्टकम्

पूयन्मांसवसादिकं गतरसं दुर्गन्धयुक्तं पुन-
र्दग्धापूपकृमिप्रदुष्टजनतोच्छिष्टामिषाद्यं तथा।
एवं सन्ति बहूनि वस्तुदलनान्येषु स्पृहावान् परं
काकः पङ्किलभक्षकोऽशुचितमः सर्वैः सदा गर्हितः ॥१॥

रोगव्याप्तिनिवारणाय सततं कुर्वन्ति यत्नं नरा
रोगाश्चाशुचिताप्रवृत्तविसराः सर्वत्र चोर्वीतले।
दूरीकर्तुमनिष्टवस्तुनिचयं सज्जं सदा वस्तुतः
काकं विद्धि परोपकारिणमतः स्वच्छत्वसम्पादकम् ॥२॥

काकेन प्रथितं चकास्ति यदुलूकस्यात्र वैरं महत्
नूनं तत्प्रकटीकृतं स्फुटतयाप्यन्धस्य चक्षुष्मता।
मूर्खस्यापि सुबोधमण्डितनरेणारोग्ययुक्तेन यद्
रुग्णस्याथ विशेषतश्च शुचिना पङ्काविलस्यापि वा ॥३॥

स्वादुत्वं भवतु प्रकाममथवा तच्छून्यता चापि वा
भक्ष्ये तेन न चिन्तितोऽयमिति विद्ध्येतत् प्रशस्यं सदा।
निद्रा चापि विनिर्जितेति सगुणः काको नितान्तं ह्यतः
काकाय प्रणतिः सभक्तिविनया तस्मै न किं दीयते ॥४॥

लब्धाशिक्षितपाटवं वियति च प्रोड्डीनतः प्राक् स्वयं
काकात् पुष्टिमवाप्य कोकिलकुलं धन्यं नितान्तं भुवि ।
नैवास्त्यत्र च सम्प्रतारणकथा मूर्खत्वचिन्ता कथं
कार्या कोकिलकाकयोरपि मिथः सौहार्दबन्धो ह्ययम् ॥५॥

न्यायत्वेन हि सिद्धमस्ति वचनं यत् काकतालीयमि-
त्यत्रास्माकमयं तदर्थविषये सन्देह उद्भाव्यते ।
को वा तालफलेन साकमुचितः काकस्य बन्धोऽधुना
भुक्तिस्तस्य समीहिता न तु मृतिस्तेनाहतस्यास्य वै ॥६॥

काकस्नानमहो नु सर्वविदितं नूनं त्वकिञ्चित्करं
विद्वांसो रसिकाश्च काकपदकृत्कौतूहलप्रेरिताः ।
ब्रूते कः खलु काकपेयतटिनीसन्तारणं दुष्करं
काके भूरिगुणेऽल्पदोषसहिते को वा न रज्येन्नरः ॥७॥

अक्ष्णैकेन हि सम्यगेव विविधानर्थान् समर्थो भवान्
द्रष्टुं; हा भवदीयदन्तगणनां व्यर्थां नरा मन्वते ।
सक्ताः सन्ति हि दुष्कृतौ निशि दिवा भीता भवद्रोदनात्
काव्यस्यास्य भवान् कृतो नु विषयो हे काक! तत्क्षम्यताम् ।८।

-:०:-

(८)

धर्मोपदेशस्तबकः

३१. दानाष्टकम्

दातव्यं हि मयात्र संशयलवो नास्तीति बुद्ध्या तथा
नो कुर्यादुपकारलेशमपि यस्तस्मै नरायापि च ।
काले पात्रवराय वै समुचिते देशे च यद्दीयते
दानं सात्त्विकमेतदेव कथितं भूत्यै समेषां हितम् ॥१॥

केचित् प्रत्युपकारलाभमथवा प्राप्तिं च पुण्यस्य वा
वाञ्छन्तः कृतसन्ततप्रयतना दानादिसत्कर्मसु ।
एतावद्द्रविणं प्रदेयमपि वेत्यन्तर्वहन्तो व्यथा-
माचार्याः कथयन्त्यधीतनिगमा दानं तु तद्राजसम् ॥२॥

कृत्वा सत्कृतिवञ्चितान् परुषवाङ्नाराचविद्धान् बहून्
दानीयान् विदुषोऽवमत्य तरसाऽऽविष्कृत्य गर्वान्धताम् ।
यद् दानं खलु देशपात्रसमयश्रद्धां विना दीयते
किं वा तेन तमोमयेन कुशलं दानेन नृणां भुवि ॥३॥

पात्रं योग्यतमं ह्यदभ्रविनयेनासाद्य तस्मै पुनः
सद्धर्मार्जितवित्तदानमुचितं सर्वस्य शर्मप्रदम् ।
तत् पापाचरणं मतं यदि पुनर्दानाय दत्तस्य चेद्
यः कश्चिन्नृगवद्यतेत पुरुषो जानन्नजानन्नपि ॥४॥

अन्धान् निर्धनखञ्जमूकबधिरानापद्गतांश्चेतरान्
कुष्ठाद्यामयपीडितानृणशतैः सन्तप्तचित्तांस्तथा ।
दानात्तोषय भोजनस्य वसनस्यान्यस्य वा वस्तुनः
प्राग्जन्मार्जितपापदुष्फलभुजो मत्वा च मा धिक्कुरु ॥५॥

वन्द्यं प्राघुणकं प्रणम्य चरणौ प्रक्षाल्य पूजादिकं
कृत्वा तं प्रियभाषणेन बहुशः प्रीतं विधायादरात् ।
भक्ष्यं पेयमथोचितं द्रविणमप्यस्मै प्रयच्छेदृशो
दानस्य प्रथितस्य कोऽपि महिमा वाचां स नो गोचरः ।६।

निद्रात्यत्ति बिभेति जन्तुनिवहो ग्राम्यं च धर्मं चर-
त्येतत्सीमितजीवितोऽपि मनुजो जन्तुर्भवेद्वस्तुतः ।
त्यक्त्वा स्वार्थपरत्वमल्पमतितां लोकोपकारोत्सुका
दाने यस्य रुचिः स एव जगति श्रेयः सदा प्राप्स्यति ॥७॥

प्रेमाभावतमोवृतं जगदिदं क्लिश्नाति भूयस्तरां
तद्वत्स्वार्थधुरातिमर्दितमधो याति क्षयात् प्रक्षयम् ।
त्वद्दीप्तिर्हि समाजभव्यगगनं विद्योतयत्यादृता
त्वत्तो दान ! समुद्धृता भवति हि क्षोणी विनाशाम्बुधेः ।८।

३२. धर्माष्टकम्

विज्ञो वापि निरक्षरोऽथ धनिको यद्वा दरिद्रोऽपि च
स्वस्थो वाथ रुजार्दितोऽपि भवतु श्रेयः परं तस्य तु ।
शश्वत् सुष्ठु च यः करोति सततं प्रायो निवार्यापदो
धर्मो रक्षति रक्षितः स हि भृशं कल्याणहेतुः स्मृतः ॥१॥

पृथ्वी स्वर्गसमानतां शुभमयी नूनं व्रजेद्यद्यहो
दायित्वं परिनिर्वहेयुरनिशं स्वार्थाविरोधादपि ।
श्रेष्ठाः शासनकार्यजातनिरता उत्कोचबाह्यास्तथा
धर्मं सम्यगवेक्ष्य तत्परतया कर्तव्यनिष्ठान्विताः ॥२॥

लाभो हानिरिति द्वयं लघुधिया सर्वत्र सञ्चिन्त्यते
द्रव्यप्राप्तिमुदारधीर्विगणयत्यध्यात्मचिन्तारतः ।
शान्तिश्चेतसि तुष्टिरात्मनि समाजोत्थानमित्यादिकं
किं किं ब्रूहि विशेषतोऽत्र भुवने धर्मेण नासाद्यते ॥३॥

कामक्रोधमदादयो नु रिपवो धर्मेण जय्यास्तथा
सत्यास्तेयरतिं शमं दममपि प्राप्नोति धर्मोन्मुखः ।
सत्कर्मोत्सुकता प्रशान्तिफलदा विद्याप्रचाराश्रिता
धर्मायोद्यमकृत् कदापि न भवत्यप्राप्तकामो भुवि ॥४॥

सत्यं ब्रूहि वद प्रियं च हितकृत् सन्त्यज्य रोषादिकं
मा हिंसीः शुभमाचर प्रणयवान् सर्वेष्वपि प्राणिषु ।
निन्दां मा कुरु गालनादिसहितां कस्यापि कुत्रापि वा
यद्धर्मादनपेतमाचर तदेवानन्दकृद् भूयसाम् ॥५॥

पत्नी पत्युरनादरेण तनयः पित्रोश्च शिष्यो गुरोः
किञ्चिज्ज्ञो विदुषः प्रतापनिधिरप्यात्मप्रजाया नृपः ।
नूनं ते महदाचरन्ति दुरितं सत्कर्म तेषां वृथा
धर्मस्य व्यय एष इत्युपनिबध्नाति स्मृतिग्रन्थकृत् ॥६॥

सौभ्रात्रं विलसत्वमोघमखिले मानुष्यके सुस्थिरं
स्वारम्भे सफलाः प्रशान्तमनसः प्रज्ञाविवेकत्विषः ।
सर्वे सन्तु निरामयाः कुशलिनः सर्वे प्रसादान्विताः
सम्पन्ना धनधान्यमङ्गलयुता धर्मे रताः सन्ततम् ॥७॥

मात्सर्येण मिथोविरोधकलुषस्वान्तेन सार्वत्रिक-
श्रेयोघ्नेन यदन्धकारभरितं निश्शेषमुर्वीतलम् ।
गाढप्रेममरन्दपानमुदितं दैन्यापनुत्तिक्षमं
तत्तूर्णं भवतु प्रकाशविशदं हे धर्म ! ते रश्मिभिः ।।८।।

३३. भक्त्यष्टकम्

सर्वेशे मनसोऽनुरक्तिरमला साद्गुण्यसंप्रेरिता
तत्कल्याणगुणैर्द्रुतस्य मनसो वृत्तिः प्रसादान्विता ।
धारावाहिकतां गताऽघरहिता पुण्यप्रकर्षोदया
भक्तिः सा जयति प्रकृष्टफलदा पापापहन्त्री सदा ।।१।।
अद्यास्मिन्नपि भारते सुविदितैर्भक्तोत्तमैर्मण्डिते
विज्ञानस्य तथोदितस्य फलतः सम्यङ् न लब्धास्पदा ।
सामान्ये जनमण्डले शुभमयी बुद्धिस्तु सा सात्त्विकी
भक्तिं वर्धयितुं यतेत जनतासौभाग्यकाङ्क्षी जनः ।।२।।
एकं सद् विबुधा वदन्ति बहुधा श्रीकृष्णरुद्रादयो
देवा भिन्नविभूतयः परिचितो देव्यश्च लक्ष्म्यादयः ।
तेषां पूजनमाचरत्यहरहर्यः सत्त्वभावस्थिरो
भक्त्या नूनमनन्यया स लभते सर्वाण्यभीष्टान्यपि ।।३।।
अर्चावन्दनकीर्तनादिभिरलं सुष्ठूपचारैर्मुहु-
र्विस्मृत्याशनपानकृत्यनिचयं स्वीयं पवित्राशयाः ।
आसन् स्वाभिमतं नु दैवतमहोरात्रं स्मरन्तो मुदा
भक्त्यै सादरदत्तजीवितदिनाः केचिन्महान्तः पुरा ।।४।।
ईशे प्रेम तदीयसज्जनगणे मैत्री तथा बालिशे-
ष्वत्यर्था करुणा द्विषत्सु नियतोपेक्षा च यैः स्वीकृता ।

तेषां सार्थकजन्मनामनुपमानन्दानुभूतिः पुन-
र्भक्त्या एव नु सिध्यतीति कथितं शास्त्रज्ञविद्वद्वरैः ॥५॥
कैङ्कर्यं निरुपाधिकं प्रतिफलापेक्षाविहीनं यथा
कीशे वायुसुतेऽर्जुने पुनरिदं सख्यं महन्निश्छलम् ।
यत् प्रोक्तं नवधा पुरातनमुनिश्रेष्ठैश्च तत्राधुना
बोध्यं चैतदमोघभव्यफलदं भक्त्यास्तु रूपद्वयम् ॥६॥
कायायासफलेन कृच्छ्रतपसा साध्यं किमित्युच्यतां
साध्येन द्रविणव्ययेन महता यज्ञेन वा किं फलम् ।
सत्तानन्दचिदात्मकं सुविमलं ब्रह्माधिगन्तुं पुन-
र्नो मार्गान्तरमिष्यते सुखतमं भक्त्यां नु सत्यां सखे ॥७॥
सौहार्दप्रणयादिकं त्वभिमतं भक्त्याश्च रूपं शुभं
वात्सल्यं च तथैव चिन्तकजनैः स्वीकार्यमेवादरात् ।
व्याप्यैवं भुवि भूरिशोभममलस्वान्तेषु शान्तिप्रदे
भक्ते ! दीनजनार्तिहन्त्र्यभयदे द्योतस्व सर्वत्र हि ॥८॥

३४. मोक्षाष्टकम्

मायानिर्मितमेव विश्वमखिलं रज्जौ यथाशीविष-
भ्रान्तिस्तद्वदियं प्रपञ्चकलना क्लेशातिरेकप्रदा ।
रागद्वेषकृताद्भवाब्धिदुरितादत्यन्तमुक्तिर्हि सा
विज्ञैर्मोक्ष इतीर्यते परचितः प्रत्यक्षबोधोदयः ॥१॥
मायादोषनिराकृतेर्हि भवति श्रेयश्च जीवात्मनः
सा चापि श्रवणादिभिर्गुरुमुखाल्लब्ध्वा श्रुतीस्तत्पराः ।
इत्थं द्वन्द्वकृतान्यपास्य दुरितान्यास्ते सुखं यद्वशी
मोक्षं तं प्रवदन्ति निर्वृतिमयीं स्वात्मानुभूतिं बुधाः ॥२॥

अप्राप्तस्य न लब्धिरत्र पुरुषस्यानीयते नैव वा
किञ्चिद्वस्तु कुतश्चिदप्यतितरामेषैव वस्तुस्थितिः ।
अज्ञानापगमात्मकेन निजरूपेणैव संस्थानवान्
मोक्षेणाधिगतेन लब्धपरमानन्दः स्वयं साधकः ॥३॥

रज्जौ सर्प इति भ्रमो रजतमित्यद्धा च शुक्तौ तथा
मिथ्याबुद्धिरितीह सर्वसहजा वस्तुन्यवस्त्वात्मिका ।
तत्त्वज्ञानपथेन तन्निरसनं साध्यं भवेज्जीविनां
मोक्षायोद्यम एष तेन न वृथा ज्ञानाप्त्युपायो नु सः ॥४॥

रूपस्पर्शरसादियोगमधुरैः सांसारिकानन्ददै-
स्तैस्तैर्वस्तुभिरेषणाप्रकृतिभिर्भूयोऽभिसंप्रेरितैः ।
मूर्खैराद्रियते सुखं सुखमिति स्पष्टं प्रलब्धैश्च तन्
मोक्षात् प्राग् यदिहास्मदादिभिरतिक्लेशादिकं सह्यते ॥५॥

सालोक्यं प्रथमं सुपुण्यवशतः प्राप्यं हि यन्मानवैः
सामीप्यं तदनु प्रसिद्धमपरं सारूप्यमित्यादृतम् ।
सायुज्यं निखिलोपरि प्रकटितस्वीयप्रभावं पुन-
र्विद्ध्येतांश्चतुरो जगत्सु विदितान् मोक्षस्य भेदान् सखे ।६।

मुक्तार्णः श्रुतियज्ञसन्ततिमुखैस्तैस्तैस्तथा कर्मभिः
सर्वांस्तानृषिदेवतापितृगणांस्तृप्तान् कुरुष्वादरात् ।
पश्चादेव दुरन्तसंसृतिपयोराशिं तितीर्षुः स्वयं
चेतस्त्वं विनिवेशयेप्सिततमे मोक्षे स्थिरश्रेयसि ॥७॥

सर्वत्राम्बुदसंवृतस्य च गिरेः शृङ्गं दिनेशोन्मुखं
पत्रं नोदकबिन्दुभिः सरसिजस्यात्यन्तलिप्तं तथा ।
नाकृष्टाः सुखसाधनेन बहुशः सर्वत्र लभ्येन ये
रक्ष्याः संप्रति ते भवोदकनिधेर्मोक्ष ! त्वदौन्मुख्यतः ॥८॥

"एक विश्वास और" इत्येतस्मिन् काव्ये मामको विचारः

(डा० रमेशचन्द्र शुक्लः, एम०ए०, पीएच०डी०, साहित्य-सांख्ययोगाचार्यः)

"एक विश्वास और" इत्येतन्नामधेयायां स्वकीयायां रचनायां श्री डा० रमेशचन्द्रमिश्रो याः महनीया अनवद्याश्चोद्भावनाः अवातारयत् ता विज्ञानबन्धुरां धरामध्यासते। तत्र हृदयावर्जनकारिणी पावनसुषमा समुल्लसति। तत्रत्या नव्यता प्रत्नतापरिपोषिता भूत्वा विभ्राजते। रामकाव्यपरम्परायां या भावनाः आस्थाश्च समर्चिताः सन्ति सुव्युत्पन्नस्य मेधाविनो मनीषिणः कल्पनाभिस्तासां गरिमा संवर्धितः सन् संलक्ष्यते।

विद्वांल्लेखक एतस्यां स्वरचनायामृषिं विश्वामित्रं "युवकसर्जक था विश्वामित्र का चरित्र" "तो कहीं निष्ठ व्यक्ति बनता जन-जीवनत्राता" —इत्येतदादिपेशलपदरङ्गरमणीयतयोल्लिखन्नधिगम्यते। वस्तुतस्तदीयं तच्चित्रणं तामेव श्रियमाददाति यां भारतीयपुरातनेतिहासे पुराणेतरे च साहित्येऽवलोकयितुमध्येता श्रवणकर्ता च सौभाग्यमधिगच्छति।

विश्वामित्रस्य शिष्यत्वाधिगमनाद् निर्वासनाच्च प्राग्रामस्य, भारते केन्द्रीया शक्तिरासीद्ध्रासोन्मुखी; तदा लङ्काधिपती रावण एव परां प्रचण्डतामुत्तुङ्गीकुर्वन् भुवि प्राप्यत। सः स्वत्वं स्वकीयं भारते संस्थापयितुं चेष्टमान आसीत्। दण्डकारण्यं यावत्तु तदीयानीकिनी निर्भया भवन्ती विचरणं विधातुं तदारभत। आसीद् ऋषिर्विश्वामित्रः स्थितीनां ज्ञाने परमनिपुणः। तस्यां दृश्यमानायां स्थित्यां विहिते सति प्रमादेऽवश्यमेव पतनं स्यात्, इत्येतद् विमृश्य द्रागेवासौ स्वकीयं राष्ट्रं भाविनो निपातनात् पातुमात्मानं समुद्यतं विदधौ। स तदा राष्ट्ररक्षणमेव ब्रह्मत्वसिद्धिममंस्त।[२] स विना विलम्बं राष्ट्ररक्षाव्रतमुद्दिश्य स्वाश्रमस्य शिष्यानाजुहाव। स ऊर्जस्विना वचसा शिष्याणां हृदयानि प्रज्वलयत् यदि लङ्केशोऽस्मद्देशमुपनिवेशीकर्तुमस्ति संलग्नस्तदा वयमपि स्वदेशं रक्षितुं नैजासूनपि अखण्डराष्ट्रज्योतिषि होतुं सन्नद्धाः स्मः।[३]

---

१. प्रतिज्ञा पृ०, १३ २. वही, पृ० १६ ३. वही, पृ० १७

सः सद्यः महर्षेर्वसिष्ठस्याश्रमं प्रयाय। तं तासु गम्भीरासु स्थितिषु कृत्स्नतयावगमयन् तत्प्रतीकाराय सम्यगचेतयत्।

इमं हि वसिष्ठविश्वामित्रयोर्गम्भीरं संवादं विद्वान् कविः प्रकृष्टप्रौढताश्रितेषु शक्तिमत्सु शब्देषु समुपन्यस्यति। तत्र "धरतो तो जड़ है, क्रम से ही उगते हैं रत्न तो"[1] इत्येतद्विधा शक्तिमती शब्दावलिर्दृष्टा भवत्येकत एकतश्च वर्णननैसर्गिकत्वम्। सर्वत्रैव वस्तुतो वागात्मकमर्थात्मकं च वपुर्बलिष्ठं मनोहरं च भवत् समुपस्थितं सञ्जायते। एतावदेव न, "रानियों की कनसुई फुफकारती नागिन सी" इत्येतादृश्यः स्वकीयमेवाद्वितीयत्वं बिभ्राणा उपमाः काव्यमलङ्कुर्वाणाः समुद्दीप्यन्ते।

राष्ट्रहितसंलग्नाभ्यामुभाभ्यामपि ऋषिकविभ्यां राजभवन-नृपदशरथ-कैकेय्यादिमधिकृत्य परिस्थितिर्निदधत्[2] संलक्ष्यते मनीषिप्रवरो लेखकस्तत्र तदीयायां वर्णनविदग्धतायां तु पाठकः परिचितस्तु भवत्येव परं द्वयोरपि महर्षयोर्मानसं स्वदेशहिते कियत् सावधानमित्येतदपि सोऽनायासेनावगच्छति[4] समाजागतदोषांश्च कविरद्भुतेनैव विधिनोपन्यस्यति।[5] वस्तुतो विमर्शणपरिपूर्णत्वात् काव्यस्य विमर्शो नाम सर्गः सार्थकतां बिभर्ति।

काव्यस्यास्य 'वीरोत्सवः' सर्गः स्वकीयसम्पत्त्वेन शोभते। ईदृशी कल्पना नान्यत्र दृश्यते। तेन राज्यस्य शक्तिप्रियतायास्तु बोधो जायत एव परं रामस्य मल्लश्रेष्ठत्वमपि ज्ञाततां याति। अथ च सः (वीरोत्सवः) विश्वामित्रर्षियज्ञं रक्षितुं रामस्तेन सह गच्छेदित्येतद्विषयिण्या भूमिकाया अपि कार्यमनुतिष्ठति। लेखकस्योद्भावनेयमतितरां स्तुत्या।

रामवननिर्गमने रावणाद् राष्ट्रं संरक्षितुं वसिष्ठविश्वामित्रयोः परमप्रच्छन्नप्रयास एव मूले सक्रियोऽवर्तत इत्येतत्प्रतिपादनं निश्चप्रचतया कवयितुरस्य सर्वथेष्टम्। कैकेयीयाचितवरद्वयन्तु गौणमेवाभवत्। स्वसाध्येऽन्तरायत्वाद् विश्वामित्रस्य, रावणस्तं स्वकीयमरिमेव मेने। कविरिदमेव तत्त्वमधःस्थितासु पङ्क्तिषु प्रकटीकुर्वन्

---

१. विमर्श, पृ० ३३ २. वही, पृ० २९ ३. वही, पृ० ३२
४. वही, पृ० ३८ ५. वीरोत्सव, पृ० ४२

समुपलभ्यते........

"देखो, वह विश्वामित्र, शत्रु राजा रावण का।
वध नहीं करना है, जीवित ही पकड़ना।
प्रसन्न लङ्केश होगा इससे।[1]"

समाजसेव्येषु युवा लेखकं प्रीणयत्यतः सः स्वकाव्ये रामं समाजसेवियुवत्वेन दर्शयति। रामः समाजसेवागुणं निधत्ते-इत्येतत् कविर्विश्वामित्रमुखेन वक्ति........."साधक तू समाज का"।[2]

अस्मद्विचारेण काव्यस्यास्य नायकोऽस्ति विश्वामित्रः। कविदृष्ट्या राष्ट्रात् परं नान्यत्। राष्ट्रस्य रक्षा चेद् जाता, राष्ट्रस्य गौरवं वृद्धिं गतं तदा किन्न जातम्। तस्य (कवेः) दृष्ट्यां राष्ट्रमेव पुरुषः (परमेश्वरः) तदेव गुरुः। स्वान्तःकरणस्याभिलषितमिदं रामाननेन निगदति—"राष्ट्रपुरुष, राष्ट्रगुरु—तुम्हारे पराक्रम से रक्षित हो........[3]। पञ्चवट्यां प्रच्छन्नतया निहितस्य शस्त्रागारस्य विश्वामित्रेण रामाय यत् समर्पणं तदपि महर्षिविश्वामित्रस्यानन्यराष्ट्रभक्तिं विनिगमयति। रामाय तच्छस्त्रागारसमर्पणेन रामः शत्रोर्देशं रक्षितुं शौर्य्यं निदधातीत्येतदपि विदितं जायते। विश्वामित्रस्य च्छत्रच्छायायां युवा देशरक्षण-समाजोद्धार-तपोमयपरम्परापरकशिक्षादीक्षादिगुणान् प्राप्तुं शक्नोतीति रामः सम्यग् विवेद। रामस्य विश्वामित्रनिष्ठयानया भावनया च विश्वामित्रस्योदात्तविश्वकल्याणकारिणी प्रवृत्तिः साध्ववगम्यते।

काव्यमिदं नानासूक्तिसमुल्लसितं सत् तानि तत्त्वानि परिपुष्णाति यैर्जीवनस्य भवति निर्माणम्।

अहल्याप्रकरणो कविरहल्यां प्रति प्रदत्तं शापं येन प्रकारेणोद्भावयति सः सर्वथैव नवीनो विज्ञानसङ्गतो मौलिकश्च वर्तते। तस्यास्ति सा नवीनता, मौलिकता भवति हृदयगम्या धीगम्या च। जगति यत् किमपि घटते, यच्च भवितुं शक्यं तदेव कविना काव्ये निहितमुपपादितं च।

कवेर्हृदयं "नारी-अहिल्या" प्रकरणे नारीणां करुणास्पददशायामाक्रन्दति। भवति तद्धृदयं दयापरिप्लुतम्। अस्ति कविस्वान्तम-

---

१. अनुशासन, पृ० ७३ २. वही, पृ० ८५ ३. वही, पृ० ८५

सहायासु प्रताडितासु नारीषु सहानुभूतिसमवेदनामयम् । अहल्या-कथा स्मारयति तं तास्ता असहाया नारीः । स आचष्टे—"असहाया, प्रताडिता, अधोमुखी—अन्य भी अहिल्यायें देश में" ।[1]

स्फुटतयैव रामस्य समाजोद्धारकं करुणामयं च चरित्रं नारीः प्रति नितान्तमनोज्ञतया चित्रितं कविवरेण । अयं राम आसीत्, यस्य प्रयासेन अहल्यायाः समाजे प्रवेशो भवितुमार्हत् ।

धनुर्भङ्गे (मोहभङ्गे) कथावस्तु तदेव यत् काव्यान्तरे दृश्यते । परं तत्रापि आर्यसंस्कृतौ श्रद्धा निष्ठा च कवेर्दृश्येते कामं ते प्रत्यक्षीभूय नावलोक्येते । देशस्येतिहासश्चेदतीतगौरवं न जहाति तदा देशस्य समाजः संस्कृतो भवितुमर्हतीति लेखको विश्वसिति । योग्ययशस्विनं नायकमन्तरेण न देश उत्कर्षमधिगन्तुमीष्टे इत्येष च विदुषो लेखकस्य द्रढीयान् विचारः । धनुर्भङ्गप्रकरणे रामस्य सर्वविजयिन्या वीरतायाः दर्शनं जायते । तत्र तस्य सत्याग्रहशील-त्वमप्यवगतिं याति ।

अन्त्यः सर्गः कवेर्वस्तूपस्थापनाया विचित्रां कुशलतामभिव्यनक्ति । कविना एको विशाल इतिहासः स्वल्पपृष्ठगतः कृतोऽस्ति । तदध्ययनेन रघुवंशसम्भवानां वीरतायुक्तां चरित्रविशिष्टतामारभ्य दशरथनृपकृतपुत्रेष्टियज्ञः, रामस्य समग्रजीवनपुण्यगाथा, राज्ञो जनकस्य देदीप्यमानं ज्ञानं चास्मन्मानसमञ्चेऽवतरन्ति । रामकथा, वस्तुतोऽस्मिन्नध्याये स्वामेव विशिष्टतां निदधाति ।

संक्षेपत इदं वक्तुं शक्यते यदस्मिन् हिन्दीभाषाकाव्ये कविना वैज्ञानिकेन नवीनेन प्रकारेण च रामकथा प्रस्तुतीकृतास्ति ।

कवेः सफलः प्रयासो जनमानसे राष्ट्रभक्ति, समाजसेवाञ्चावातारयन् असहायपतितनार्युद्धारार्थमभिरुचिं जनयन्, स्वदेशीयतपःपूतगौरवमयीं परम्पराम्प्रति महान्तमनुरागं प्रवलयन्, वीरतानुशासनपरकचेतनाद्यनेकानेकसद्गुणानुत्पादयन् उत्साहौजःसम्पन्न-राष्ट्रभक्तिनिष्ठरसं पाययन् रामस्य पावनं चरित्रं समुपस्थाप्य प्राणिमात्रनिमित्तेन श्रेयांसि सम्पादयति । अभिनन्दनीयोऽस्ति सर्वथैव विद्वद्वरस्य कविवरेण्यस्यायं प्रयासः । ●

---

१. पृ० १०५, १०७ अहिल्या

देववाणी-परिषद्वार्ता

(१) 'अर्वाचीनसंस्कृत'स्य चतुर्थवर्षसम्पूर्तिः

१५-१०-१६८२ तारिकायाम् 'आर ६ वाणी-विहार, नई दिल्ली-११००५६' इति स्थाने देववाणी-परिषदा स्वत्रैमासिक-मुखपत्रस्य 'अर्वाचीनसंस्कृतस्य' चतुर्थवर्षसम्पूर्तिरायोजिता ।

अस्मिन्नवसरे भारतसर्वकार-शिक्षा-मन्त्रालय-केन्द्रीय-संस्कृत-मण्डलस्याध्यक्षैः किञ्च विक्रमविश्वविद्यालयस्य भूतपूर्वकुलपतिभिः डा० प्रभाकरनारायणकवठेकरमहाभागैः 'अर्वाचीनसंस्कृत'स्य चतुर्थवर्षस्य चतुर्थाङ्कं विमोचयद्भिः अर्वाचीनानां संस्कृत-रचनानां प्रकाशनार्थं देववाणी-परिषदः प्रयत्नाः सविशेषं समभिनन्दिताः । तैः १५-१०-१६८२ तारिकायां प्रकाशितस्य चतुर्थवर्षीयस्य चतुर्थाङ्कस्य प्रथमं प्रतिरूपं (copy) हस्ताक्षरीकृत्य परिषदः संस्थापकाध्यक्षेभ्यः आचार्यरमेशचन्द्रशुक्लेभ्यः समर्पितम् ।

विशिष्टातिथिपदमलंकुर्वाणैः दरभङ्गास्थ-कामेश्वरसिंहसंस्कृत-विश्वविद्यालयकुलपतिभिः डा० जयमन्तमिश्रमहाभागैरुक्तं यन्नूनं हि 'अर्वाचीनसंस्कृतम्' संस्कृतस्य नित्यनूतनविकासस्य, परिचायकं पत्रमस्ति ।

समारोहाध्यक्षैः राष्ट्रियसंस्कृतसंस्थाननिदेशकैः डा० रामकरण-शर्ममहाभागैः 'अर्वाचीनसंस्कृत'-सदृशानां सावधिकपत्राणां बलसंवर्ध-नार्थं समधिकानुदानस्यावश्यकता रेखांकिता ।

पत्रस्य प्रधानसम्पादकेन डा० रमाकान्तशुक्लेन सूचितं यदर्वाचीनसंस्कृतेऽद्यावधि चत्वारिंशत्प्रायाणां मौलिकरचनानां प्रकाशनं जातम् । अस्मिन् चत्वारिंशत्प्रायान् नवीनसंस्कृतग्रन्थान् अवलम्ब्य समीक्षात्मिका सामग्री अपि प्रकाशिता जाता । यद्यपि पत्रस्य ग्राहकसंख्या अत्यन्तं न्यूनास्ति तथापि अस्य चिन्ता नैव कार्या । दृढसंकल्पेन पत्रं प्रकाशनीयं वर्तते ।

(२) देववाणी-परिषदः सप्तमः स्थापनादिवससमारोहः

देववाणी-परिषदः पञ्जीकरणं १३-१२-१९७६ ई० तारिकायामभूत्। ततः प्रभृति प्रतिवर्षमस्यां तारिकायां परिषद् स्वस्थापनादिवसं सम्मानयति। अस्मिन् वर्षेऽनया त्रिदिवसीयः सप्तमः स्थापनादिवससमारोहः ११, १२, १३-१२-१९८२ तारिकासु 'आर ६, वाणी-विहार, नई दिल्ली-११००५९' इति स्थाने सम्मानितः।

११-१२-१९८२ तारिकायाम् उद्घाटनगोष्ठ्याम् १९८२ वर्षतमवर्षे परिषदा प्रकाशितयोः डा० सुलेखचन्द्रशर्मणा ग्रथितयोः 'साधारणीकरण और समानान्तर चिन्तन की पूर्वपीठिका'—'भट्टनायक और अभिनवगुप्त की साधारणीकरण-विषयक अवधारणा' नामग्रन्थयोः प्रख्यातसमालोचकेन काव्यशास्त्रमनीषिणा च डा० नगेन्द्रमहाभागेन विमोचनं कृतम्। ग्रन्थद्वयमवलम्ब्य दिल्ली-विश्वविद्यालयस्य हिन्दीविभागप्रवाचकेन डा० सत्यदेवचौधरी-महाभागेन स्वविचाराः प्रस्तुताः। डा० सुलेखचन्द्रशर्मणा स्वग्रन्थ-प्रणयनस्य प्रेरणा प्रक्रिया च संकेतिते। अस्या गोष्ठ्या आध्यक्ष्यं परिषदः संस्थापकाध्यक्षैराचार्यरमेशचन्द्रशुक्लैः सम्पादितम्।

१२-१२-१९८२ तारिकायां '**विंशशताब्द्याः संस्कृतसाहित्यं प्रति केरलीयविदुषां योगदानम्**' इति विषयमवलम्ब्य गुरुवायूरकेन्द्रीयसंस्कृत विद्यापीठ (पावरटी केरल)-प्राचार्येण डा० चक्रधरविजल्वानमहाभागेन अभिभाषितम्। तेनास्मिन् प्रसङ्गे नैकासां प्रकाशितानामप्रकाशितानाञ्च अर्वाचीनसंस्कृतरचनानामुल्लेखो व्यधायि। तेन 'देववाणी परिषद् दिल्ली' कैरलीयसाहित्यकाराणां डा० सी० आर० स्वामिनाथन्—श्री ओट्टूरउण्णिनम्बूदिरीपाद—श्री टी० वी० परमेश्वर अय्यराणां कर्णभूषण—राधाकृष्णरसायन—सदाशयसमुच्चया-भाणकमञ्जर्यादिग्रन्थप्रकाशने समभिनन्दिता। अस्यामभिभाषण-गोष्ठ्यां विशिष्टातिथित्वं डा० सत्यदेवचौधरीमहाभागेन आध्यक्ष्य-ञ्चाचार्यश्रीरमेशचन्द्रशुक्लमहाभागैः सम्पादितम्।

१३-१२-१९८२ तारिकायां त्रिदिवसीयस्यास्य समारोहस्य समापनोत्सवः सम्पन्नः। अस्मिन्नवसरे राष्ट्रियसंस्कृतसंस्थान-निदेशकैः डा० रामकरणशर्ममहाभागैः १९८२ तमेशवीयेऽब्दे परिषदा

प्रकाशितस्य आचार्यरमेशचन्द्रशुक्लप्रणीतस्य **'अभिनवहनुमन्नाटकस्य'** (डा०) रमाकान्तशुक्लसम्पादितस्य 'अर्वाचीनसंस्कृतसाहित्यपरिचय'-प्रथमखण्डस्य च विमोचनं विहितम् । डा० शर्ममहाभागैः **'संस्कृतस्य दिक्कालानवच्छिन्नं रामणीयकम्'** इति विषयमवलम्ब्य भाषणमपि कृतम् । तैरुक्तं यत्संस्कृतस्यानुशीलनेन हृदयं सत्यं शिवं सुन्दरं च जायते । अद्य यादृशीभिः समस्याभिर्वयमाक्रान्ताः, तासां सर्वासामपि समाधानं संस्कृतानुशीलनेन सम्यग् भवितुं शक्यते ।

अस्मिन्नवसरे **'कमल पब्लिक स्कूल'—'गुडविल चिल्ड्रन पब्लिक स्कूल'** विद्यालययोश्छात्राभिः संस्कृतसमूहगीतानि प्रस्तुतानि । मोतीनाथसंस्कृतमहाविद्यालयच्छात्रैः संस्कृतश्लोकान्त्याक्षरी प्रस्तुता ।

समारोहस्याध्यक्षतां कुर्वाणैः परिषदध्यक्षैः डा० कृष्णकान्त शुक्लैः परिषदा अनुष्ठितेषु कार्यक्रमेषु भागं ग्रहीतॄणां शिशूनां विशेषेणाभिनन्दनं कृतम् । तैरुक्तं यत्संस्कृतसेविनामिदं कर्तव्यमस्ति यदसंस्कृतज्ञेषु संस्कृतरुचेर्जननाय ते सविशेषान् प्रयत्नान् समाचरेयुः । समापनोत्सवं विशिष्टातिथिरूपेण राष्ट्रियसंस्कृतसंस्थानोपनिदेशकाः डा० मधुसूदनमिश्राः सनाथितवन्तः ।

त्रिदिवसीयेऽस्मिन् स्थापनानादिवससमारोहे राजधान्याः देशस्य विभिन्नेभ्यो भागेभ्यश्च समागता नैके विशिष्टा विद्वांसः संस्कृतसेविनश्च समुपातिष्ठन् ।

(३) उत्तरप्रदेशसंस्कृताकादम्या देववाणी-परिषत्प्रकाशिताः ग्रन्थाः पुरस्कृताः

उत्तर प्रदेशसंस्कृताकादम्या १९८१ तमवर्षे देववाणीपरिषत्प्रकाशितः किञ्च डा० रमेशचन्द्रशुक्ललिखितो **'भारतस्वातन्त्र्यसङ्ग्रामेतिहासः'** पञ्चसहस्र (५०००)रूप्यकात्मक डा० गङ्गानाथ झा पुरस्कारेण सम्मानितः । इतः पूर्वमपि अकादमी परिषत्प्रकाशितं डा० शुक्लप्रणीतं **'सुगमरामायणम्'** महाकाव्यं १९७९ तमवर्षे एकसहस्ररूप्यकात्मकपुरस्कारेण, किञ्च **'श्रीकृष्णचरितं'** नाम महाकाव्यं १९७९ तमवर्षे त्रिसहस्ररूप्यकात्मक (३०००) पुरस्कारेण सम्मानितवती । (सुगमरामायणम् १९७८ तमवर्षे हरियाणा-

साहित्य-अकादम्या एकसहस्र (१०००) रूप्यकात्मक-गीता-पुरस्कारेणापि सम्मानितं बभूव)

उ०प्र० संस्कृताकादम्या परिषत्प्रकाशिता इमे ग्रन्था एकैक-सहस्ररूप्यकात्मकपुरस्कारैः सम्मानिताः—

'भाति मे भारतम्'	(ले० रमाकान्त शुक्लः)	(१९८०)
'जय भारतभूमे !'	(,, ,,)	(१९८१)
कालिदास की कला और संस्कृति (भाग २)'	(ले० देवीदत्तशर्मा)	(१९८१)

अकादमी देववाणी-परिषदः प्रतिष्ठितसदस्यस्य पं० विष्णुकान्त शुक्लस्य 'स्फाटिकीमालां' मान्यसदस्यस्य डा० उमाकान्तशुक्लस्य 'चाङ्गेरिकां' चापि एकसहस्ररूप्यकात्मकपुरस्कारेण सम्मानितवती। पुरस्कारवितरणं १२-१-१९८३ तारिकायां 'लखनऊ' राजभवने सम्पन्नम् ।

विद्यावाचस्पतिपण्डितपरमानन्दशास्त्रि-स्मारकव्याख्यानमाला

वयोवृद्धसंस्कृतविदुषा किञ्च देववाणी-परिषदः संस्थापकाध्यक्षेण आचार्यरमेशचन्द्रशुक्लेन निगदितं यत्संस्कृतव्याकरणेन लोकप्रचलनस्य निरादरो नैव कृतः । काले काले सञ्जातानां वैकल्पिकसंशोधनानामिइतिहास इदमेव तथ्यं पुष्णाति यत् लोक-प्रवृत्तिमनुशासयदपि संस्कृतव्याकरणं लोकप्रवृत्तेः समादरं करोति।

आचार्य शुक्लः देववाणीपरिषत्प्रवर्तितायां 'विद्यावाचस्पति-पण्डितपरमानन्दशास्त्रिस्मारकव्याख्यानमालायां' 'संस्कृतव्याकरण-शास्त्रस्य विकासः, इति विषयमवलम्ब्य द्वितीयं भाषणं व्याहरन् २-१-१९८३ तारिकायां तथ्यमिदं सविशेषं प्रत्यपादयत् ।

देववाणी-परिषदो महासचिवेन डा० रमाकान्तशुक्लेन विज्ञापितं यदग्रिमवर्षात् 'मौखिक परम्परायां विख्यातगुरोर्विद्यावाचतेः श्री परमानन्दशास्त्रिणः स्मृतौ छात्राणां भाषणप्रतियोगिता आयोज-यिष्यते ।

(प्रस्तोत्री—रमा शुक्ला)

दिल्ली में

नसबंदी एवं "कापर टी"
का विशेष अभियान

(१ जनवरी से २८ फरवरी १९८३ तक)

प्रत्येक नसबंदी कराने वाले को प्रोत्साहन राशि के अलावा
१५१ रु० का अतिरिक्त उपहार चैक दिया जायेगा।

महिलाओं के लिए विशेष इनामी योजना

"कापर टी" पर लाटरी द्वारा विशेष आकर्षक उपहार दिये जायेंगे

आज ही

अपने परिवार को नियोजित कीजिये

और अपने भाग्य को आजमाइये

विशेष जानकारी हेतु अपने निकट के अस्पताल/
परिवार कल्याण केन्द्र से सम्पर्क करें।

सूचना एवं प्रचार निदेशालय दिल्ली प्रशासन
द्वारा प्रसारित

विज्ञापन

राष्ट्रिय संस्कृत संस्थान (मुख्यालय)

2 ए, राम किशोर मार्ग, दिल्ली-110054

1.	अंकगणितम् बीजगणितम्	2.10
2.	चन्द्रगोलविमर्शः	27.00
3.	मलयमारुतम् भाग III	5.00
4.	,, भाग IV	5.00
5.	नयविवेकः	50.00
6.	प्रोसीडिंग्स आफ फर्स्ट इन्टरनेशनल संस्कृत कान्फेरेन्स खंड I भाग I	20.00
7.	,, ,, भाग II	20.00
8.	,, ,, II भाग I	20.00
9.	,, ,, II भाग II	20.00
10.	,, ,, III भाग I	20.00
11.	संस्कृत विमर्शः खंड I भाग I	7.50
12.	,, खंड I भाग II	7.50
13.	,, खंड II भाग I	7.50
14.	,, खंड II भाग II	7.50
15.	,, खंड III भाग I, II	15.00
16.	,, खंड IV भाग I, II	15.00
17.	,, खंड V भाग I, II	15-00
18.	,, ,, VI ,, ,,	15.00
19.	,, ,, VII ,, ,,	15.00
20.	युभातः संस्कृतं प्रति	32.00

प्रेस में—प्रोसीडिंग्स खंड III भाग II

,, IV

,, V

नय विवेकः खंड II

अर्वाचीनसंस्कृतम्

(R.N. 34554/79

※

१. प्रकाशन का स्थान — नयी दिल्ली

२. प्रकाशन की आवधिकता — त्रैमासिक

२. मुद्रक तथा प्रकाशक का
नाम, राष्ट्रीयता तथा पता — डा० रमाकान्त शुक्ल
(देववाणी-परिषद्, दिल्ली-कृते)
भारतीय
६, वाणी-विहार, नई दिल्ली-११००५९

४. सम्पादक का नाम,
राष्ट्रीयता तथा पता — डा० रमाकान्त शुक्ल
भारतीय
६, वाणी-विहार, नई दिल्ली-११००५९

५. उन व्यक्तियों के नाम और पता
जो इस पत्रिका के मालिक या
साझेदार हैं अथवा जो इसकी
सारी पूंजी के एक प्रतिशत से
अधिक के हिस्सेदार हैं। : देववाणी-परिषद्, दिल्ली
६, वाणी-विहार, नयी दिल्ली-११००५९

मैं, डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद् दिल्ली
प्रकाशक

देववाणी-परिषदा प्रकाशिताः ग्रन्थाः

१.	अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (प्रथमखण्डः) (सं० : डा० रमाकान्तशुक्लः)	रु० १५.००
२.	,, ,, ,, (द्वितीयखण्डः)	रु० ३०.००
३.	,, ,, ,, (तृतीयखण्डः)	रु० ३०.००
४.	कर्णभूषणम् (डा० सी० आर० स्वामिनाथन्)	रु० ५.००
५.	भाति मे भारतम् (डा० रमाकान्तशुक्लः)	रु० ४०.००
६.	श्रीकृष्णचरितम् (डा० रमेशचन्द्रशुक्लः)	रु० ३०.००
७.	सुगमरामायणम् ,, ,,	रु० ३५.००
८.	हरविजयस्य साहित्यिकमध्ययनम् (डा० कृष्णकान्तशुक्लः)	रु० ६०-००
९.	श्रीमदप्पयदीक्षितचरितम् (डा० हरिनारायणदीक्षितः)	रु० २०.००
१०.	भारतस्वातन्त्र्यसंग्रामेतिहासः (डा० रमेशचन्द्र शुक्लः)	रु० ३५.००
११.	सदाशयसमुच्चयः (पं०टी०वी० परमेश्वर अय्यरः)	रु० १५.००
१२.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
१३.	मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा)	रु० २०.००
१४.	रघुवंश : एक विश्लेषण (,, ,,)	रु० २०.००
१५.	अभिज्ञानशाकुन्तल : एक विश्लेषण (,,)	रु० २०.००
१६.	कालिदास की कला और संस्कृति (भाग २) (लेखक : डा० देवीदत्त शर्मा)	रु० ६०.००
१७.	जय भारतभूमे ! (डा० रमाकान्तशुक्लः)	रु० ३०.००
१८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्डः) (सं० : डा० रमाकान्त शुक्लः)	रु० ३०.००
१९.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
२०.	साधारणीकरण और समानान्तर चिन्तन की पूर्वपीठिका (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
२१.	अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्र शुक्लः)	रु० २०.००
२२.	भट्टनायक और अभिनवगुप्त की साधारणीकरण-विषयक अवधारणा (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
२३.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०-००

प्राप्तिस्थानम्

'देववाणी-परिषद्, दिल्ली', ६ वाणी-विहारः, नयी दिल्ली-११००५९

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिक पत्रम्)

पञ्चमवर्षे द्वितीयोऽङ्कः

१५ अप्रेल १९८३

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः,

सांख्ययोगाचार्यः

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

परामर्शदातृमण्डलम्

(१) डा० रामसुरेशपाण्डेय: (२) डा० कृष्णकान्त शुक्ल:
(३) डा० उमाकान्त शुक्ल: (४) डा० सुलेख चन्द्र शर्मा

विषय-सूची

विषयः	लेखकः	पृष्ठाङ्कः
१. सम्पादकीयम्		७१-७२
२. स्फूर्तिसप्तशती (आर्याभाग:)	डा० शिवदत्तशर्मा चतुर्वेदी प्रवक्ता, साहित्य-विभाग:, प्राच्यविद्यासंकाय:, काशी हिन्दू विश्वविद्यालय:, वाराणसी	७३-१३८
३. राजस्थानम्	डा० रमाकान्त शुक्ल:	१३९-१४४
४. देववाणी-संस्कृतम्	श्रीलक्ष्मणप्रसाद गौतम:	१४५
५. अर्वाचीनसंस्कृते समीक्षार्थं प्राप्तानि पुस्तकानि		१४६
६. देववाणी-परिषद्वार्ता	रमा शुक्ला	१४७-१५४

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् रु० 20·00 (भारते)

पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription

Rs, 20.00 (In India)

5 Dollars or 2 Pounds (Abroad)

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नई दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहार, नयी दिल्ली-११००५९' त: प्रकाशितम्-अर्वाचीनसंस्कृतम् (५/२)। प्रधानसम्पादक:— डा० रमाकान्त शुक्ल:। प्रकाशनतिथि: १५-४-१९८३।

सम्पादकीयम्

'अर्वाचीनसंस्कृतस्य' पञ्चमवर्षे द्वितीयोऽङ्कः पाठकानां करकमलेषूपह्रियते। पद्यमयेऽस्मिन्नङ्के डा० शिवदत्तशर्मचतुर्वेदप्रणीतायाः स्फूर्तिसप्तशत्या आर्याभागः, रमाकान्तशुक्लप्रणीता 'राजस्थानम्' इत्येतच्छीर्षका कविता श्रीलक्ष्मणप्रसादगौतमप्रणीता 'देववाणी-संस्कृतम्' इत्येतच्छीर्षका रचना च प्रकाश्यन्ते। अन्ते च अर्वाचीनसंस्कृते समीक्षार्थं लब्धानां पुस्तकानां विवरणं देववाणी-परिषद्वार्ता च दीयेते।

'स्फूर्तिसप्तशत्याः' प्रणेतास्ति साहित्याचार्य-व्याकरणाचार्य-एम०ए०-पीएच०डी०-प्रभृत्युपाधिभूषितो देववाणी-परिषद आजीवनसदस्यो डा० शिवदत्तशर्मा चतुर्वेदः, यो ह्यद्यत्वे वाराणसीस्थ-काशीहिन्दूविश्वविद्यालयस्य प्राच्यविद्यासंकाये साहित्यविभागे प्राध्यापकोऽस्ति। १६-४-१६३४ तारिकायां समुत्पन्नः स्वर्गीयमहामहोपाध्यायपण्डितगिरिधरशर्मचतुर्वेदानामयमात्मज आबाल्यादेव काव्यरचनायां प्रवृत्तः सञ्जातः। अद्यावधि अनेन महानुभावेन पञ्चत्रिंशद्ग्रन्थानां, शताधिकानां हिन्दी-संस्कृतभाषानिबद्धानां वैदुष्यपूर्णानां लेखानामनेकासां कवितानां च विरचनं कृत्वा साहित्यजगतः सेवा विहिता। 'ललिता' नाम्न्याः संस्कृतमासिकपत्रिकायाः सञ्चालनं, प्रकाशनं सम्पादनञ्चाप्यनेन महानुभावेन किञ्चित्कालपर्यन्तं कृतम्। वाराणस्यां 'कविभारती' संज्ञकसाहित्यिकसंस्थायाः मन्त्रित्वमप्ययं निरवहत्। डा० चतुर्वेदस्य संस्कृतकृतिषु प्रमुखाः सन्ति—१. गोस्वामितुलसीदासशतकम् (उत्तरप्रदेशसंस्कृताकादमीपुरस्कृतम्) २. काव्यप्रयोजनशतकम् ३ काव्यकारणशतकम्, ४. विद्योपार्जनशतकम्, ५. ललिता (सम्पादिता), ६. कविभारतीकुसुमाञ्जलिः (सहसम्पादितः), ७. स्फूर्तिसप्तशती च।

'स्फूर्तिसप्तशती' देववाणी-परिषदा १६८२ तमेशवीयेऽब्दे प्रकाशयितुमारब्धा। तस्या अल्पमूल्येनैव अर्वाचीनसंस्कृतस्य पाठकेभ्यः प्राप्तिः स्यादिति कृत्वा तस्या अर्वाचीनसंस्कृतेऽपि प्रकाशनं क्रियते। अस्मिन्नङ्के स्फूर्तिसप्तशत्या आर्याभागः प्रकाश्यते, अग्रिमे चाङ्केऽवशिष्टानि पद्यानि प्रकाशयिष्यन्ते। अस्मिन्नार्याभागे 'महात्मा' इति शीर्षके रचितानि पद्यानि व्यतिरिच्य

सर्वाण्यपि पद्यानि 'आर्या' छन्दसि रचितानि अतः प्राधान्यव्यपदेशन्यायेनायं भाग 'आर्याभागः' कथ्यते। कवितानां शीर्षकाणां सूचिरग्रिमे पृष्ठे दीयते। स्फूर्तिसप्तशत्या अस्मिन् आर्याभागे ६१९ पद्यानां प्रकाशनं क्रियते। इमां कृतिमवलम्ब्य विस्तरशस्तु अन्यत्र चर्चा विहिता स्यात्, अत्र केवलमिदमेव सङ्केत्यते यदस्यां रचनायां कवेः काव्यसाधना प्रतिपदं प्रगतिपथमारोहति। कवेर्भक्तिभावः, महापुरुषाणां कृते समादरः, स्वसंस्कृतिं प्रति प्रेम, आशावादः, संस्कृत-निष्ठा, सूक्ष्मनिरीक्षणम्, विनोदप्रियता, सामयिकसमस्यादर्शनम्, व्यंङ्ग्यविच्छित्तिः—इत्येतदादिकाः प्रवृत्तयोऽत्र काव्ये सहृदयैः साक्षात्त्कर्तुं शक्यन्ते। अत्रैव तत् 'किन्तु-शतकम्' अपि विलसति यत्र आधुनिकपरिवेशे यथार्थादर्शयोर्विसङ्गतिर्द्रष्टुं शक्यते। परिमितशब्दैरपरिमितानां भावानां प्रकाशनं कवेः रचनाया वैशिष्ट्यम्। कवेरार्या नितरां प्रिया। स तां भावानामुद्भाविनीं स्वीकरोति :—

आर्या सैषा रम्या यदि प्रसादं करोति तन्मन्ये।
भावाऽभावाऽभावः सत्वरमेवाऽत्र जागर्ति ॥"

(स्फूर्तिसप्तशती/५२ आर्या/५९४)

मन्ये, डा० शिवदत्तशर्मचतुर्वेदस्य कवित्वपूर्णा भावा आर्यावलम्बनादहमहमिकया स्फुरन्ति। एतादृशरचनार्थमयं महानुभावः समधिकं समभिनन्द्यते।

'राजस्थानम्' इति सञ्ज्ञकं गीतमेनत्पंक्तिलेखकेन रचितम् यस्मिन् राजस्थानस्य स्वरूपं समुन्मीलयितुं चेष्टितमस्ति। 'देववाणी-संस्कृतम्' इति शीर्षककविता उदीयमानेन छात्रकविना नेपालस्थेन श्री लक्ष्मणप्रसादगौतमेन रचिता। अस्यां कवेः संस्कृतनिष्ठा अभिव्यज्यते। अयं चिरायुर्भूत्वा संस्कृतं समर्चयिष्यतीत्याशास्यते।

देववाणीपरिषद्वार्तायां विगतमासत्रये समायोजितानां कार्यकलापानां संक्षिप्तं विवरणं दीयते।

पाठकाः कुत्रचिज्जातानि मुद्रणस्खलितानि संशोधयितुं सादरं प्रार्थ्यन्ते।

विदुषामाश्रवः

रमाकान्तशुक्लः

१५-४-१९८३ ई० प्रधानसम्पादकः

स्फूर्तिसप्तशती (आर्याभागः)

विषयानुक्रमणिका

क्रमः	कविताशीर्षकनाम	पद्यसंख्या	पृष्ठसंख्या
१.	राधा	(१-८)	७५
२.	कृष्णद्वैपायनः	(९-२५)	७६-७७
३.	मङ्गलम्	(२६-३४)	७७-७८
४.	प्रतिभा	(३ -४२)	७८-७९
५.	उपनिषत्	(४३-५०)	७९-८०
६	गीता	(५१-६०)	८०-८१
७	लोकमान्यतिलकः	(६१-६८)	८१-८२
८.	महात्मा गान्धी	(६९-७८)	८२-८३
९.	श्रद्धा	(७९-१००)	८३-८५
१०.	स्मृतिलीला	(१०१-१३३)	८५-८८
११.	संस्कृतभाषा चिरं जयति	(१३४-१६६)	८८-९१
१२.	सहृदयसम्बुद्धिः	(१६७-१७४)	९१-९२
१३.	सहयोगः	(१७५-१९१)	९२-९३
१४.	कथा	(१९२-१९९)	९४
१५.	दृश्यावलिः	(२००-२०८)	९४-९५
१६.	औदार्यम्	(२०९-२१६)	९५-९६
१७.	एकान्ताः	(२१७-२२५)	९६-९७
१८.	मेघमाला	(२२६-२३३)	९७-९८
१९.	मेघाः	(२३४-२४१)	९८-९९
२०.	वेदना	(२४२-२४९)	९९-१००
२१.	सिद्धस्थानम्	(२५०-२५७)	१००-१०१
२२.	स्वरलहरी	(२५८-२६६)	१०१-१०२
२३.	सा कार्ऽपि	(२६७-२७४)	१०२-१०३
२४.	दूरे-अन्तिके	(२७५-२८१)	१०३
२५.	ऊर्जा विद्युत्	(२८२-२८९)	१०४
२६.	रतिः	(२९०-३०४)	१०४-१०६
२७.	जीवनम्	(३०५-३१८)	१०६-१०७
२८.	संघर्षः	(३१९-३२६)	१०७-१०८

क्रम: कविताशीर्षकनाम	पद्यसंख्या	पृष्ठसंख्या
२९. आह्वानम्	(३२७-३३४)	१०८-१०९
३०. भाषा विवषा	(३३५-३४१)	१०९-११०
३१. विवशता	(३४२-३४९)	११०-१११
३२. प्रेरणा	(३५०-३५७)	१११-११२
३३. वैज्ञानिकधारा	(३५८-३७०)	११२-११३
३४. कुण्ठा	(३७१-३७६)	११३-११४
३५. निषेधकाव्यायितम्	(३७७-३८०)	११४
३६. पुरातनं सुन्दरं भवति	(३८१-३८८)	११५
३७. सांस्कृतिकीं रात्रिमासूते	(३८९-३९६)	११५-११६
३८. मिश्रणवेला	(३९७-४०२)	११६-११७
३९. उपेक्षा	(४०३-४०९)	११७-११८
४०. क्रोधशक्ति:	(४१०-४१३)	११८
४१. कृपाणधारा	(४१४-४१९)	११८-११९
४२. धैर्यम्	(४२०-४२७)	११९-१२०
४३. काम:	(४२८-४३१)	१२०
४४. परिचय-महिमा	(४३२-४३९)	१२१
४५. निन्द्यतायामाशा	(४४०-४४६)	१२२
४६. बहुमतम्	(४४७-४५१)	१२२-१२३
४७. अवमूल्यनम्	(४५२-४६०)	१२३-१२४
४८. नैपुण्योद्घोष:	(४६१-४७०)	१२४-१२५
४९. परस्परम्	(४७१-४८२)	१२५-१२६
५०. धिक् तान्	(४८३-४९२)	१२६-१२७
५१. किन्तु-शतकम्	(४९३-५९३)	१२७-१३६
५२. आर्या	(५९४-५९९)	१३६
५३. आशा	(६००-६१४)	१३७-१३८
५४. तिथि:	(६१५-६१९)	१३८

(पाठका एतदनुसारम् १०७—१३८ पृष्ठेषु पद्यसंख्यासंशोधनं कर्तुं प्रार्थ्यन्ते)

स्फूर्ति-सप्तशती

(१) राधा

(१—८)

भवबाधाया हर्त्री दात्री सा जीवनस्य धारायाः
उल्लासस्य प्रतिमा शश्वद्वितरेत् सुखं राधा ॥१॥

स्थावर-जंगम-विश्वं शुभ्रै र्भावैस्तरलयन्ती
कृष्णमयं संसारं रचयन्ती कैर्न राधिता राधा ॥२॥

कामानेषा सूते सर्वैर्भावैः प्रपूजिता सद्यः
गोलोके कृतवसतिः कृष्णेनाराधिता राधा ॥३॥

माधवकलाविलासैः कथं भवेन्मोहिनी सृष्टिः
यदि नो कुर्यात्स्वीयं कृपाकटाक्षं स्वयं राधा ॥४॥

निखिलाऽनन्दसमुद्रं विलासभासैस्तरलयन्ती
सुन्दरतासौभाग्याऽधारा राधा स्वयं राधा ॥५॥

नानाविधसांसारिक-जालैर्ये खेदमापन्नाः
तैर्वा मानसमध्ये कथं न संसाध्यते राधा ॥६॥

अहमहमिका कवीन्द्रैरारचिताऽस्ते यदीयपूजायाम्
मान्या जगतां धन्या हृदये देवी स्वयं राधा ॥७॥

वृन्दारण्यनिकुञ्ज - क्रीडारासेश्वरी जयति
निर्गुणमपि सकलगुणे परिणमयन्ती स्वयं राधा ॥८॥

(२) कृष्णद्वैपायनः

(६—२५)

कृष्णद्वैपायनतो हिमालयात् सम्प्रवृत्ता या
नानाकथानकानां गंगा तोषयति संसारम् ॥१॥

सा शेमुषी प्रणम्या यस्यां विपुलः कथालोकः
प्रादुर्भूय नितान्तं भूवलयं मोहयाञ्चक्रे ॥२॥

अगणितजीवनलहरीप्रवाहधारातरंगाणाम्
आकर्षकचित्राणां प्रदर्शिनी व्यासलेखनी धन्या ॥३॥

नानापुराणपाथोनिधिमध्ये द्वीपदर्शिनी सेयम्
श्रीकृष्णद्वैपायन-लेखनधारा नमस्याऽस्ति ॥४॥

विघ्नाद्रीणां वज्रे गणाधिपे लेखके जाते
निखिलः कथासमुद्रो निमिषैर्मर्यादितो जातः ॥५॥

ये चानन्ता वेदाश्चतुष्टयत्वेऽथ तान् गृह्णन्
वेदव्याससमाख्यां लयपर्यन्तां प्रसाधितवान् ॥६॥

व्यासस्याख्या तावन्नितरां लोकेषु जागृता जाता
अद्यापि तु दृश्यन्ते सहस्रशो व्यासरूपाणि ॥७॥

लोकोत्तरसच्चरिताः पुरुषा यन्नाभवन्तः स्युः
तत्तन्नाम च लोके सर्वेषामीप्सितं भवति ॥८॥

कमनीयः संसारो वेदव्यासेन निर्मितो दीप्तः
निखिलानां लोकानां श्लोकेष्वाभान्ति चित्राणि ॥९॥

सम्पूर्णं संसारं कर्मक्षेत्रे समाकर्षन्
पुण्यमहाभारतमथ रचयन् व्यासो न वन्द्यः कैः ॥१०॥

कौरवपाण्डवगाथा - प्रवाहमध्ये समानीता
सम्पूर्णेयं सृष्टिः प्रारंभाद् व्यासदेवेन ॥११॥
अष्टादशैः पुराणैर्निदर्शितान्येव सर्वाणि
सूक्ष्माणां स्थूलानां जगतां रूपाण्यनन्तानि ॥१२॥
जीवनधारा धन्या संजाता चेतनापुञ्जैः
असमचरित्रोन्मेषैर्व्यासस्येदं महद् दानम् ॥१३॥
सुचरितसहस्रविवरणलाभैर्धन्या सुवासिता धरणी
नम्रतरोऽयं लोको व्यासस्याराधनं कुरुते ॥१४॥
वेदे पुराणनिवहे दर्शनजलधौ च सेतुनिर्माणम्
व्यासकृतं तत् सर्वं मानवता तेन धन्यतमा ॥१५॥
वेदान्तसूत्ररचने दर्शनशास्त्रस्य सर्वस्वम्
संग्रथितं यद् दिव्यं निर्मथिता सा सुधैव ननु ॥१६॥
भक्तिमयी या धारा श्रीभागवते प्रवर्तिता दिव्या
भावानां संसारे घटना दिव्यैव सा सेयम् ॥१७॥

(३) मङ्गलम्

(२६—३४)

मङ्गलमेतत्सर्वं सैषा मंगलमयी सृष्टिः
निखिला मंगलवेला सोऽयं प्राभातिकः कालः ॥१॥
समये सर्वं जातं सर्वेऽप्युत्थानसंभाराः
आकर्षणपरिमाणा इमे अनन्ताः समाभान्ति ॥२॥

काचित् कमनीयतमा धारेयं विद्यते पुरतः
रचना सर्वापीयं नित्यं मङ्गलमयी भाति ॥३॥
असमा भावोन्मेषा सर्जनशक्तिस्तथा नवीनेयम्
मङ्गलभावे चेतः सर्वं नूनं निबध्नाति ॥४॥
परिपाकदशा प्राप्ता आकाशो निर्मलो नित्यः
तस्मिन् शब्दगुणत्वं सर्वे तत्रैव संभाराः ॥५॥
अवकाशा अपि निर्मलभावे संयोजयन्तीव
सैषा सर्वा सरणिर्नूतनतायाः पराकाष्ठा ॥६॥
आकृतयो या लब्धा दिव्यतराः सन्ति सर्वास्ताः
सैषा प्रसादमाला विश्वेशस्य प्रसादरूपैव ॥७॥
चरमे समीपभावे बाधानां पूर्णपरिहारः
क्षणमात्रेऽपि विलम्बे सर्वमिदं लुप्यते विश्वम् ॥८॥
कम्पनमिव नूतनमिदमाहो स्पन्दनमिदं कथितम्
कामे विरामशून्ये नूतनतासृष्टिराभाति ॥९॥

(४) प्रतिभा

(३५—४२)

प्रतिभे, रसनिर्झरिणी त्वं या जीवनसुधन्यताकरणी
तव विरहेऽन्धं सर्वं जगदिदमाभासमानं वा ॥१॥
प्रतिभे, प्रभा त्वदीयाऽनन्दसमुद्रे निमज्जयति
वाचां लहर्य एताः प्रतिपदमालिङ्गनानि यच्छन्ति ॥२॥
प्राणानां त्वं प्राणे, देवि प्राणेश्वरी यथा भवसि
सर्वं स्पन्दनजालं चालय माये, महामाये ! ॥३॥

त्वद्विरहेणैवान्धः पतितः कूपे तमोरूपे
पालय पालय पालय मातः कृपया त्वमेव हे प्रतिभे ॥४॥
एषोऽस्म्यहं चरणयोः पतितश्चाथो कृतज्ञश्च
देवि, प्रतिभे, भास्वरसाम्राज्ये, त्वत्कृपाभिक्षुः ॥५॥
त्वं चैतन्यसमुद्रोन्मथिता साक्षात् सुधालहरी
त्वत्स्पर्शमात्रसिद्धाः सर्वास्ताः सिद्धयो विपुलाः ॥६॥
नवनवसृष्टिप्रवीणे देवि, प्रतिभे, त्वदीयसंस्पर्शात्
घोरे पारावारेऽप्यसमाऽऽनन्दस्य दृश्यते लहरी ॥७॥
शान्तं पतितं चालससिन्धौ सर्वत्र शून्यतमदृष्टिम्
प्रतिभे, कणिकामात्रं तव दीनं दीप्तमातनुते ॥८॥

●

(५) उपनिषत्

(४३—५०)

उपनिषदिति शब्दोऽयं सिद्धान्तार्थे प्रयुक्तोऽस्ति
सिद्धान्ताविर्भावे कथितं "तत्रेयमुपनिषद् भवति" ॥१॥
प्रथमं सिद्धान्तानां स्फूर्तिः संजायते चित्ते
पश्चात् क्रियासु तेषां प्रयोगयोगः समायाति ॥२॥
वेदान्तेषु ग्रन्था उपनिषदिति वा समाख्याताः
परमात्मतत्त्वसाक्षात्कारे सिद्धान्तभूतास्ते ॥३॥
"आत्मा वा द्रष्टव्यः श्रोतव्यश्चाथ मन्तव्यः
अथ च निदिध्यासनमपि कार्यं तस्येति" ऋषिराह ॥४॥
कोऽसावात्मा ? तस्य च दर्शनमननादयः कथं वा स्युः?
सर्वेऽप्येते विषयाः साङ्गोपाङ्गाः समादिष्टाः ॥५॥

ऊहापोहाः सर्वे मतभेदाश्चाथ भाष्येषु
सम्यक् प्रदर्शिता वा मान्यतमैस्तावदाचार्यैः ॥६॥
सर्वापीयं सरणिः परमेशान्वेषणे दृष्टा
संसारे ज्ञानानां गौरवभूता प्रतिष्ठिता भवति ॥७॥
लोके विज्ञानानां विपुलं यत् यत् क्रियारूपम्
सर्वेषामपि तेषां मूलं सुविचारितोपनिषत् ॥८॥

(६) गीता

(५१—६०)

भारतसंस्कृतिमूला संसारेषु प्रदीप्ततमा
भानु-सहस्र-प्रतिमा विद्वद्भिर्मानिता गीता ॥१॥
जीवननवसंचारे नालोक्यं तत् समुन्नतं तत्त्वम्
यस्य हि परिचयदाने पश्चाद्भावं भजेद् गीता ॥२॥
षोडश-कलावतंसो योगीश्वर-वन्दितः स्वयं कृष्णः
उपदेष्टाऽसीद्यस्याः कं महिमानं परित्यजेद् गीता ॥३॥
सर्वागमस्वतन्त्रः शंकर इव शंकराचार्यः
प्रथमो यद्व्याख्याता प्राथम्यं सा लभेद् गीता ॥४॥
श्रीरामानुज-वल्लभ-मध्व-मुखैरेभिराचार्यैः
नव-नव-वाक्यालोकैर्नूनं नीराजिता गीता ॥५॥
श्रीमधुसूदन - वर्यैरभिनवगुप्तार्यपादैश्च
गणनातीतैरन्यैराचार्यैष्टीकिता गीता ॥६॥
गीतारहस्यकर्त्रा कर्मक्षेत्रेषु लोकमान्येन
अप्याधुनिकयुगेऽस्मिन् वीरैर्भावैः प्रपूजिता गीता ॥७॥

अरविन्देनाराद्धा महात्मना गांधिना च भृशम्
सर्वात्मना समीडित-चरणा साफल्यभूर्गीता ॥८॥
गीताप्रवचनकर्त्रा महीयसा मालवीयेन
राष्ट्रीयग्रन्थतया सर्वत्रोद्घोषिता गीता ॥९॥
निर्मलमन्तःकरणं प्रकाशपूर्णं च या कुरुते
जन्मनि जन्मनि यायात् सदा समाराध्यतां गीता ॥१०॥

(७) लोकमान्यतिलकः

(६१—६८)

गीताज्ञानसमादृतसर्वस्वं संप्रयोक्तारम्
श्रीलोकमान्यतिलकं को नामाद्यापि न स्मरति ॥१॥
भारतराष्ट्रविनाशकवैदेशिकपारतन्त्र्यमयकाले
गीताज्ञानं धृत्वा लोके यो माननीयोऽभूत् ॥२॥
राष्ट्रीये जागरणे प्रतीकभूतस्तु लोकमान्योऽयम्
शतशः कोटिजनानां वन्द्यो नेता महाविद्वान् ॥३॥
प्राचीनाचार्याणां सद्ग्रन्थान् सम्यगालोच्य
पाश्चात्यानां विदुषां ग्रन्थानाद्यन्तमालोक्य ॥४॥
भारतजीवनमार्गे प्रकाशदावं यथा विहितम्
गीतारहस्यरचने तेन तु नितरां प्रकाशितो लोकः ॥५॥
लोकोत्तरैश्चरित्रैः प्रमाणपूर्णैर्वचोभिः स्वैः
श्रीलोकमान्यतिलको नितरां वन्द्यः समस्तजनतायाः ॥६॥
केसरिनाम्ना पत्रं प्रकाशितं सत्वरं सम्यक्
भारतकेसरिरूपं स्वीकृतवानसमसाहसी वीरः ॥७॥

वन्दितदिव्यचरित्रः प्रभावसाराभिरामरमणीयः
बालो गंगाधारो मान्यः [सर्वैर्विदांवरेण्यतमः ॥८॥

(८) महात्मा गान्धी

(६९—७८)

कलौ युगेऽस्मिन् प्रथितो जगत्यां गौरण्डसाम्राज्यसमापकश्च
स्वातन्त्र्यसिंहासनबद्धरागो स वन्दनीयो नितरां महात्मा।

यो देशसेवाव्रतमादधानो धराधराधीशविकम्पनो यः
विलोपको दाम्भिकचक्रवर्तिनां सर्वत्र विश्वे प्रथितो महात्मा।

अमुं पुरस्कृत्य समस्तलोकाः शोकैर्विहीना गुरवस्तदासन्
श्रीकृष्णकालस्य तदा तदा स्मृतिः समेधिता येन स नो महात्मा।

दिव्योत्तमे दिव्यतरप्रभावे तस्मिन् क्षणाय प्रविलोकितेऽपि
यो विस्फुलिङ्गो व्यचरत्समन्तात्तत्प्रेरकं ज्योतिरसौ महात्मा।

आसन् यदा नेतृवराः सहस्रशस्ते ज्ञानविज्ञानमहाप्रवीणाः
सर्वेषु तेषु प्रथमोऽस्त्यचिन्त्यो सर्वैः सदा मान्यतमो महात्मा।

वर्षैः शतानामखिलं हि राष्ट्रं परैर्निबद्धं विगतस्वरूपम्
निभाल्य साकल्यमवाप तत्र साश्चर्यदृश्यो नितरां महात्मा।

असंभवं संभवमेव सर्वं श्वासे क्षणं निष्फलमत्र माभूत्
समस्तकालस्य नियामकोऽयं तदाऽभवत् प्रेमपरो महात्मा।

यः पीडितान् वा दलितान् विरूपान् श्रिया विहीनानपि जन्मनव
दृष्ट्वा जनांस्तद्हृदये विवेश सूक्ष्मेक्षणो वृद्धतरो महात्मा।
शक्तिस्वरूपानथ शक्तिपुञ्जान् संसारमात्रे विदितप्रभावान्
प्रेम्णा विहीनांस्तु घृणाप्रदीप्तान् कोणे चकार प्रसभं महात्मा
यः कालयात्रासु समेधितश्रीर्भवत्यलभ्योऽपि स वै महात्मा
तस्येतिहासावलि-मण्डितस्य संज्ञापरेयं प्रथिता- 'महात्मा'।

(६) श्रद्धा

(७६—१००)

जीवनमेतन्निखिलं भवति नितान्तं परिक्लिष्टम्
श्रद्धाऽभावे नितरां मालिन्यं तत्र जागर्ति ॥१॥
श्रद्धा केवलमेका जीवनमत्यन्तशुभ्रतमरूपे
प्रकटयति नाऽस्ति सा चेत्कष्टं संजायते सर्वम् ॥२॥
श्रद्धा जीवनमध्येऽमृततत्त्वं संप्रवाहयति
घोषयति कर्मजालं निमिषे निमिषे स्वयं दीप्त्या ॥३॥
श्रद्धाया रूपाणां गणना नो ध्यातुमपि शक्या
कणकणमध्ये विश्वे श्रद्धारूपाण्यनन्तानि ॥४॥
श्रद्धायाः साम्राज्यं यत्रैतद् दृश्यते विमलम्
निखिला सुखस्य धारा तत्र प्राप्या मनुष्येण ॥५॥
मा भूद्गुणलवलेशः केवलमात्रं तु श्रद्धैव
सर्वां गुणगणमालां तत्राविर्भावयति मधुराम् ॥६॥

प्रस्तरखण्डे येयं सर्वेशं प्रकटितं कुर्यात्
सा श्रद्धा ननु वन्द्या जीवनकाले परा संपत् ॥७॥
श्रद्धादरिद्रपुरुषस्त्वपि नन्दनकानने विचरन्
कीदृशमपि सामर्थ्यं प्राप्तुं नो वा समर्थः स्यात् ॥८॥
सेयं सर्वा धरणिर्निखिलः कालो विभूतयो विपुलाः
सङ्कल्पानां सरणिः श्रद्धाऽधारे प्रतिष्ठिता भवति ॥९॥
कल्याणानां सुषमा श्रद्धामात्रेण लभ्या स्यात्
तदभावे कालुष्याऽक्रमणं संजायते घोरम् ॥१०॥
नेत्रोन्मीलनकार्ये श्रद्धाया एव भूमिका निखिला
शिष्यत्वस्यावाप्तिः श्रद्धाऽभावे कथं वा स्यात् ॥११॥
सर्वे तुच्छतमास्ते भावाः संसारजालेऽस्मिन्
विद्युद्गत्या तूर्णं प्रयान्ति निखिलेऽपि जीवने नियतम् ।१२।
सर्वेषामथ तेषां निम्नतमानां प्रतीकारे
श्रद्धामात्रं शरणं मानवमात्रस्य संजातम् ॥१३॥
काले काले क्षीणा श्रद्धाया वीक्ष्यते धारा
तेन क्षोभः कश्चिद् हृत्पटले जायते विपुलः ॥१४॥
अघटितघटनानामपि घटयित्री सा वरेण्येयम्
हृत्कमलमध्यसंस्था सौरभमत्यद्भुतं किरति ॥१५॥
श्रद्धामात्रं केवलमेकं वा सम्पुटीकृत्य
निखिलं जीवनमिह खलु संसारे जायते सफलम् ॥१६॥
विश्वस्मिन्नतिगहने विभासमानाऽमृता लहरी
कामं प्रकाशमाना श्रद्धेयं सर्वमोहिनी वन्द्या ॥१७॥
नितरामाशादीप्तिर्विकसितरूपा विलोक्यते याऽसौ
सा सर्वा चिन्मयता श्रद्धासाम्राज्यरूपैव ॥१८॥

सर्वस्मिन्नपि देशे पूर्णश्रद्धामयाः पुरुषाः
द्वित्रा अपि चेद् दृश्यास्तैरुल्लासो भवेन्निखिले ॥१९॥
श्रद्धावानेकोऽपि प्रत्यक्षं कोटिशो मनुष्याणाम्
जागरणे पर्याप्तो भवति नितान्तं प्रकटदीप्तिः ॥२०॥
सा भूमिर्धन्यतरा यस्यां जन्म गृहीतवते
माता स्वीये दुग्धे श्रद्धाधारां निपाययति ॥२१॥
ज्ञाने कर्मणि भक्तौ सर्वे देशेऽथ कालेषु
श्रद्धादूरीकर्तुं नो कुत्रापीह शक्या स्यात् ॥२२॥

(१०) स्मृतिलीला
(१०१—१३३)

स्मृतिरेषा या मानवजीवनकाले तरंगिणी रम्या
तां तु विनैतज्जीवनमास्ते विक्षिप्ततायुक्तम् ॥१॥
यस्य स्मृतिर्विलुप्ता दीनोऽसौ विस्तृते जगति
यस्य स्मृतिर्विलसिता सर्वं सम्पन्नवैभवं तस्य ॥२॥
जन्मनि जन्मनि जातः स्वीयं स्मृतिवैभवं सम्यक्
यदि निध्यायति हृदये लास्यं सर्वत्र जीवने तस्य ॥३॥
नानादर्शनशास्त्रान्वेषणसंचारचारुपरिपाकाः
आचार्या रचनायां स्मृतितत्त्वं वर्णयामासुः ॥४॥
परिपाकजठरपतितैर्मनुजैर्नूनं यदविरामम्
जीवनकालः परितो विलोक्यते यत्प्रभावेण ॥५॥
स्मृतिशक्तिमाश्रयामस्तदा पठामोऽथ विद्यास्ताः
तस्यास्त्वभावकाले का विद्या, का तथा चोक्तिः ॥६॥

यत्प्रत्यक्षं ज्ञातं कदापि तस्यैव भासमानत्वम्
चेतसि संजातं चेत् कुतश्चिदुद्बोधकात् स्मृतिः सैषा ॥७॥
कस्योदबोधकतेयं कं प्रति संजायते कदा कुत्र
सर्वमनिश्चितमेतत् तेनैवाऽत्रास्ति रम्यतोल्लासः ॥८॥
निश्चितमथ चेत् सर्वं जडतारूपं तु निस्सारम्
नवताविलासरहितं जीवनमेतत् प्रजायेत ॥९॥
यदिदं यन्त्रमयं वा सर्वैः संभारसार्थैश्च
सम्पूर्णं विज्ञानं स्मृतिस्वरूपे पराक्रमते ॥१०॥
तत्तु मनोविज्ञानं प्रथितं विश्वे प्रखरशास्त्रमिदम्
स्मृतिवेलायामभिनवचित्रं चित्रे निवेशयति ॥११॥
यन्त्राणामग्रे यत् स्मरणं संजायते विपुलम्
यन्त्रैर्निखिलं तत्तत् शतशश्चित्रेषु दर्श्यते पुरतः ॥१२॥
सोवियतनाम्नि देशे यन्त्राणां वैभवं तादृक्
स्वीयं तत् स्मृतिचित्रं विस्मापयतीह दर्शकान् सर्वान् ॥१३॥
आनन्दात्परतत्त्वात्पृथग्भवे तस्य जीवस्य
सर्वं दुःखमयत्वं तस्माद्वा प्रच्युतिस्तस्य ॥१४॥
स्मृतिरेवास्ति समीपे यामाश्रित्यैव जीवोऽयम्
पुनरप्यनन्तरूपं स्वीयं प्राप्नोति भोगमोक्षेऽस्मिन् ॥१५॥
पर्यन्तस्मृतिरेषा या नाम्ना प्रत्यभिज्ञेति
काश्मीरेषु च तादृशदर्शनमास्ते समुद्भूतम् ॥१६॥
प्रत्यक्षानुभवे वा यद्यत् सर्वं समायाति
नीरूपे संसारे परिणतरूपं भवति तत्तत् ॥१७॥
स्मृतिशब्दो विख्यातो मन्वादिग्रन्थरत्नेषु
याथार्थ्येन तु निखिला या रचना सा स्मृतिः सर्वा ॥१८॥

आयातैव यदेयं मानसपटले स्मृतिः कापि
चन्दनविलेपनमयमानन्दं सर्वथा तनुते ॥१९॥
प्रत्यक्षानुभवेषु तु द्वन्द्वानामस्ति साम्राज्यम्
सुखदुःखोभयरूपा धारा प्रवहतितरां तत्र ॥२०॥
किन्तु स्मृतौ तु केवलमानन्दानां प्रकाशमयतैव
दुःखानामपि नूनं स्मृतिरानन्दं विलासयत्येव ॥२१॥
प्रत्यक्षे या काचिद्विलासमयताऽस्ति दुःखं वा
तस्य स्मृतौ न दुःखं सर्वं तत्पूर्वमेव गतम् ॥२२॥
कवितायाः संसारे स्मृतिरेषा रसपदे स्थित्वा
सहृदयहृदयान्सर्वानानन्दे वा निमज्जयति ॥२३॥
प्रत्यक्षैरथ नित्यं ये संस्कारा विनिर्मिताः सन्ति
संख्यायां ते विपुलाः स्थायिषु भावेषु परिगणिताः ॥२४॥
संचारिष्वपि तेषां गणना संजायते नूनम्
गहनत्वं सूक्ष्मत्वं तेषां तत्तद्विपर्यये हेतुः ॥२५॥
उद्बुद्धताऽथ तेषां विपुले वैचारिके विश्वे
स्मृतिरेव सर्वरूपा विभाव्यते नित्यमासीना ॥२६॥
उद्बोधकस्य तावत् संस्कारेणैव संयोगः
नितरां सूक्ष्मो यो वा स्मरणे तस्यैव कारणता ॥२७॥
पूर्वाऽनुभवाऽभावे स्मारकताया अभावे वा
स्मृतिरपि नूनं न स्यात् केन स्यात् कस्य वा च स्यात् ॥२८॥
अस्मिन् जन्मनि नितरां यो वाऽनुभवः स्मृतावस्ति
जन्मान्तरे तदीयं प्रत्यक्षत्वं विकल्पनीयं स्यात् ॥२९॥
जन्ममरणसरणीनां मोक्षं यावत्प्रवर्तमानत्वे
सर्वे भारतदर्शनमनीषिणः संवदन्ते नु ॥३०॥

सूक्ष्मशरीरादधिकं सूक्ष्मं यद् विद्यते शरीरं नः
तत्र तु सर्वाऽपीयं स्मृतिः स्थिता सूक्ष्मरूपेषु ॥३१॥

स्वप्ने दृष्टेऽद्भुततररूपं यद् यद् विराजतेऽनुभवे
सर्वं तत् स्मृतिरूपं जागृततो भिन्नमेव स्यात् ॥३२॥

स्मृतिसंसारे विचरणमथ चेन्न स्यान्मनुष्यस्य
सर्वा मधुधारेयं नूनं दूरीकृतैव स्यात् ॥३३॥

(११) संस्कृतभाषा चिरं जयति

(१३४—१६६)

प्रेमप्रकर्षभरिता विद्योतितवेदवेदाङ्गा
संसृतिशिवस्वरूपा संस्कृतभाषा चिरं जयति ॥१॥

संस्कारैरापूर्णा मान्या देवैरथापि देवेशैः
ऋषिभिर्महर्षिभिर्वा ज्ञातास्वादा चिरं जयति ॥२॥

प्राभातिकवेलावन्मधुरिमभरितां सुसम्पूर्णाम्
ज्ञानदिनेशोल्लसितां भाषां संस्कृतिमयीं नौमि ॥३॥

भारतभाभिर्भरितां भावोल्लासैस्तरङ्गितामेनाम्
दिव्यां संस्कृतभाषां को वा नोपासयेत्सुजनः ॥४॥

मानवधर्मविबोधक-तत्त्वैरापूरितां भाषाम्
भूतभविष्यद्भावैः सौख्यैरापूरितां स्तौमि ॥५॥

अष्टादशविद्यानां यस्यां जागर्ति नवनवोन्मेषः
रसमयभणिति-चमत्कृति-पूर्णा या द्योतते विश्वे ॥६॥

सर्वासां भाषाणां जननी जागर्ति जाह्नवीवेयम्
विश्वस्मिन्नेकत्वं बोधयतीयं सदा भाषा ॥७॥
सर्वं वेदात्सिध्यति नान्यत्रास्तीति चात्र यन्नास्ति
अवितथभणितिमयेयं भाषा कैर्नास्ति वन्दनीयतमा ॥८॥
यत्र जरारोगाद्याश्चिन्ता दूरे स्थिता भान्ति
नित्यरसरङ्गसुषमालसिता भाषा प्रणम्यास्ति ॥९॥
संस्कृतमिति शब्दोऽयं साधु सुधावर्षणं कुरुते
यत्रात्मा परमात्मा संस्काराश्चापि सम्मिलिताः ॥१०॥
संस्कृतभारतशब्दौ पर्यायत्वेन देशेषु
परिचीयेते नितरामन्योन्यं सर्वसंश्लिष्टौ ॥११॥
किं भारतमिति पृष्टे यत्र तु वेदाः पुराणानि
गीताऽस्ति कालिदासः सा भूरित्युत्तरं लभते ॥१२॥
किमियं संस्कृतभाषा ब्राह्मणभाषेति वक्तुमास्थेया
यद्वा शोषकभाषा वक्तुं शक्येयमाभाति ॥१३॥
नानाधर्मविधानैः सामाजिकपाशसंकुलितैः
जडतां प्राप्ता भाषा संस्कृतभाषेति केऽपि कथयन्ति ॥१४॥
वर्णाश्रमव्यवस्थानियन्त्रणे जागरूकेयम्
शूद्राणां दलितानामस्पृश्यानां विरोधमातनुते ॥१५॥
यद्यप्युपनिषदादिष्वौदार्यस्यापि दृश्यते गाथा
व्यवहारे किन्तु मनागलविवरान्नो बहिर्याति ॥१६॥
राज्ञां सामन्तानां छत्राधस्तात्सुपोषिता भाषा
कष्टव्याकुलितानां लोकानां क्वोपकारमथ कुर्यात् ॥१७॥
एते तु पूर्वपक्षा लेखनभाषणगता विलोक्यन्ते
तत्रोत्तराणि सततं विद्वद्भिः संप्रदत्तानि ॥१८॥

(उत्तरम्)

सत्यं संस्कृतभाषा ब्राह्मणभाषेति नास्ति सन्देहः
किन्तु ब्राह्मणशब्दो वर्णे रूढोऽत्र न ग्राह्यः ॥१९॥
यस्य ज्ञानपिपासा श्वासे श्वासे विलोक्यते सततम्
ज्ञानार्जनकर्मणि योऽमरतां स्वीयां विजानाति ॥२०॥
को वा ब्राह्मण इत्यपि संस्कृतभाषैव बोधयति
जातिब्राह्मणनिन्दा तत्राऽप्यालोकनीयैव ॥२१॥
ब्राह्मणवर्णाद् बाह्याः संस्कृतविद्यासु निष्णाताः
जगति नितान्तं दीप्ताः सन्तः किं नावलोक्यते ॥२२॥
किन्तु ज्ञानपिपासा तेषां नित्यं प्रजागर्ति
तस्माद् ब्राह्मणशब्दस्तेष्वप्याऽस्ते सुचरितार्थः ॥२३॥
प्राक्कालादद्यावधि तेषां ज्ञानस्य वाहिका सततम्
संस्कृतभाषा नूनं ब्राह्मणभाषाऽस्ति नास्ति निन्देयम् ॥२४॥
शोषकभाषाऽप्यास्तेऽज्ञानं यच्छोषयन्तीयम्
स्वीयं दिव्यं रूपं सर्वत्रैव प्रकाशयति ॥२५॥
अनभिमतास्तु विचारा भाषायां ये प्रकाश्यन्ते
तत्र तु गुणदोषा ये विचारकेष्वेव ते ज्ञेयाः ॥२६॥
काले बृहत्प्रवाहे संस्थाभेदे व्यवस्थासु
ये चाऽद्यत्वे दोषा गण्यन्ते ते पुरा गुणा गणिताः ॥२७॥
संस्कृतभाषा तेषां प्रकाशनस्यापि माध्यमीभूता
पश्चात्तद्विपरीतस्यापि विचारस्य माध्यमीभूता ॥२८॥
वर्णविरोधे शोषणकार्यविरोधे च रचनानाम्
संकलने नैवास्ते तत्रापीयं दवीयसी संख्या ॥२९॥
भाषाया वैशिष्ट्ये विरोभावोन्मिषन्तीनाम्
रचनानां परिगणना नितरां शोभावहा भवति ॥३०॥

राज्ञां सामन्तानां छत्राऽधस्तात्सुपोषितापीयम्
जनतन्त्रात्मकशासनपरिपुष्टा दृश्यतेऽद्यत्वे ॥३१॥

इयमपि गौरवगाथा भाषायाः संस्मृतौ धार्या
यद्विपरीताऽवस्थापद्धतयोऽप्याश्रयन्त्येनाम् ॥३२॥

रामायणमत्रास्ते रावणरचना अपि स्वच्छाः
ब्राह्मणनिन्दास्तुतयो दीनानां चित्रणं चाऽस्ते ॥३३॥

(१२) सहृदयसम्बुद्धिः

(१६७—१७४)

सहृदयधुरीण ! तुभ्यं समर्पिताः सर्वसौख्यकराः
रसमयभणितीनां वा विकस्वराः शब्दसंचाराः ॥१॥

त्वां दृष्टिपथं नीत्वा कविवर्याः लेखनीं करे कुर्युः
आस्वादयितुरभावे किं स्यात् कवितावराक्या वा ॥२॥

भवभूतिस्त्वां छन्दसि समानधर्मेति घोषयामास
तस्य तदेतत्पद्यं कण्ठेहारायितं जातम् ॥३॥

नूनं लेखकवर्याः सचेतसं त्वामनाराध्य
पदे पदे प्रस्खलिताः काव्यफलाद् दूरमुपयाताः ॥४॥

उद्याने कुसुमानां चित्रविचित्रः समुन्मेषः
सहृदयहृदयाभावे व्यर्थतमः का स्थितिस्तस्य ॥५॥

किं बहुना लोकेऽस्मिन् सहृदयताशून्यतोन्मेषे
वैभवभरितेऽप्यखिले दारिद्र्यस्यैव साम्राज्यम् ॥६॥

सहृदयसंश्रितचित्ताः कविगुरवः कालिदासाद्याः
आचन्द्रतारकं वा सुस्थिरयशसो विभासन्ते ॥७॥
सहृदयसमर्थनानामसमो महिमा समालोक्यः
यद्वशतः सृष्टिरियं क्षणदा नवतामुपागता निखिला ॥८॥

(१३) सहयोगः

(१७५—१९१)

एकेनैके युक्ते संख्यैकादशतमा भवति
सहयोगस्याभावे द्वित्वं वा केवलं तिष्ठेत् ॥१॥
क्षिप्रसमर्थनसरणिः कार्ये वा सत्वरो योगः
सहयोगेऽमृतधारा कापीयं पीयते पुरुषे ॥२॥
परमोऽयं व्यामोहो विषमा काचित् स्थितिः पुंसाम्
तावत् तिष्ठति यावत्सहयोगो नैव लब्धः स्यात् ॥३॥
कठिनात्कठिनं कार्यं सहयोगेनैव सिद्धं स्यात्
दृष्टान्तानां संख्या महती तत्राऽनुसन्धेया ॥४॥
सत्ययुगे ननु शक्तिर्भवति नितान्तं सुपरिपूर्णा
एकैकस्मिन्नपि वा नापेक्षा तत्र सहयोगे ॥५॥
कलियुग एष नितान्तं शक्तिपरिक्षीणता चात्र
सहयोगस्तत्राऽयं परमाराध्यः क्रियासिद्धौ ॥६॥
सहयोगसरणिरेषा यावद् यावद् दृढा भवति
नूनमकल्प्यं सर्वं प्रत्यक्षं जायते नित्यम् ॥७॥

नित्यं यत् साफल्यं तन्नूनं प्रेरकं भवति
कादाचित्के तस्मिन् कः स्यात् पुरुषार्थसंश्लेषः ॥८॥

तदिदं चित्रं विश्वे चराचरे भाति सहयोगे
यदि सहयोगो न स्याद् दृश्यं प्रलयस्य समुखस्थं स्यात् ॥९॥

देवैर्मनुजानां यः सहयोगः सोऽस्त्ययं यज्ञः
आहूतास्ते देवाः साहाय्यं प्रस्तुवन्त्येव ॥१०॥

अथ विद्यते विरोधः सहयोगस्यासमः शत्रुः
सम्पूर्णं कल्याणं तिरोहितं तेन वा भवति ॥११॥

येषां नित्यविरोधः सहयोगे सोऽपि शान्तिमातनुते
पुरातनाश्रमवर्णनचित्राण्यत्र प्रमाणानि ॥१२॥

परिवाराख्या संस्था सहयोगस्यासमं रूपम्
यद्वशतो विश्वस्मिन् जीवनधारा प्रवाहिता भवति ॥१३॥

शासनसंस्था सर्वा सहयोगाधारिता जयति
रक्षितमनया रूपं विश्वस्मिन् सभ्यतानां यत् ॥१४॥

यद्यपि तु 'योग' शब्दः सहभावं संव्यनक्त्येव
किन्तु निरुपपदकाये पतंजलिं वा परामृशमि ॥१५॥

जीवनमपि तु धरित्र्यां सहयोगादेव चायातम्
पालनपोषणवर्धनरूपा धाराऽपि सहयोगे ॥१६॥

एकं प्रमुखं कृत्वाऽन्ये वै सार्धं चलन्त्यत्र
परमप्रकृष्टभूतः सहयोगः सर्वकाम्यश्च ॥१७॥

(१४) कथा

(१९२—१९९)

गाथानामपि महिमा श्रेष्ठतरं रूपमाधत्ते
जनजनमानसमध्ये तरंगितेयं कथा भवति ॥१॥
रससृष्टिविरचनायां कथाः समस्ता इमा विपुलाः
रमणीयं संचारं चित्रविचित्रं पुरस्कुर्युः ॥२॥
नायकशौर्यकथानां बालानामुपरि तादृशी छाया
निपतति यावज्जीवनमेते रक्षन्ति भाण्डमिव ॥३॥
मानसिके संसारे सृज्यन्ते या नवा गाथाः
तासां प्रकृतिरतीवोन्मुग्धां छायां विलासयति ॥४॥
नो लभ्यं संसारे स्थानं तत्तत्कथाशून्यम्
यासु दृढो विश्वासः सर्वेषां जीवनं तनुते ॥५॥
रक्ताभेयं प्रकृतिर्जीवनरमणीव मोहयति
मन्दस्मितच्छटाभिर्गाथानां गुम्फनं कुरुते ॥६॥
कालानां कलनायामाकलनं लोकगाथानाम्
दूरस्थितमपि विश्वं सर्वत्रैकं विबोधयति ॥७॥
राष्ट्रचरित्रोद्याने गाथाकुञ्जो नितान्तमुत्फुल्लः
सौरभसरित्प्रवाहे संचारं नूनमादिशति ॥८॥

(१५) दृश्यावलिः

(२००—२०८)

नम्रतरः संचारो व्यवहाराणां विकस्वरां दीप्तिम्
सर्वेषु भावनानां कोमलतायाः करोति विस्तारम् ॥१॥

विलसितमेतदगाधे सुविस्तृते भावनाजगति
कामपि करोति मधुमयसुषमां सर्वां प्रकाममयीम् ॥२॥

वैपुल्ये यद्विलसति चैतदसामान्यरूपेषु
तद्वै निखिलं लोकं संचारेषु प्रदीपयति ॥३॥

नानारहस्यलास्यैर्विलसितमाभाति काननं पुरतः
सौगन्ध्यविस्तरोऽयं तस्यैवास्ते दिशासु सर्वासु ॥४॥

मधुरिमनवनिर्झरिणी रंगमयी वा प्रवाहशीलेयम्
लसति नितान्तं कान्ता तरंगिता यौवनोल्लासैः ॥५॥

सर्वं तदिदं निकटे कुसुमितभावे समर्पितं दृष्ट्वा
धन्यत्वं जागर्ति प्रकाशमायात्यहो भावः ॥६॥

नन्दनकाननसदृशीं कोटिगुणां शोभितां छायाम्
मण्डलभावे कलितां संपश्यन् को न मुग्धः स्यात् ॥७॥

नर्तनमिव गायनमिव कम्पनमिव हृत्तरंगेषु
वर्षणमिव हर्षाणां दिशती दृश्यावलिर्जयति ॥८॥

उत्साहे तरलत्वं विकस्वरोन्मादसंचारः
गरलाभं हीनत्वं विदूरयति काममुद्भ्रान्तम् ॥९॥

(१६) औदार्यम्

(२०९—२१६)

पठितं तथा च लिखितं पाठितमथ लेखितं चापि
वक्तृत्ता विख्याता वाग्मित्वं वा प्रशस्ततरम् ॥१॥

निखिला सहानुभूतिः पराक्रमाणां पराकाष्ठा
औदार्यस्याभावे धूलिप्रक्षेपमात्रं स्यात् ॥२॥
धनिकाः कलुषितकायाः कार्पण्येनैव संश्लिष्टाः
विषबीजं पुष्णन्तो विक्षोभं केवलं कुर्युः ॥३॥
विकसितकुसुमामोदः कियदौदार्यं नु शिक्षयति
मधुकरमाला निपतति परितः सा सौरभोद्भ्रान्ता ॥४॥
निन्दितनिःश्वासानां धारौदार्येण शून्यतरा
संकोचयति नितान्तं कमनीयं काव्यसंसारम् ॥५॥
प्रेष्ठश्रेष्ठवरिष्ठा अपि कार्पण्येन संपूर्णाः
कारुण्यं स्वीकर्त्तुं स्वप्नेष्वपि न क्षमन्ते ते ॥६॥
शारीरं मानसिकं बौद्धिकमपि तर्पणं कर्त्तुम्
येषां सविधे शक्तिस्ते धन्या एव संसारे ॥७॥
अङ्गुलिगणनीया अपि तादृशभावैरलंकृता एते
संसारे सुखयन्तो भूतलभूषणतमा जयन्त्येव ॥८॥

(१७) एकान्ताः

(२१७—२२५)

कोलाहलेन शून्या एकान्ता भावनाधौताः
वैचारिकविश्वस्मिन् प्रवेशमार्गा इमे धन्याः ॥१॥
एकान्तव्यसनितया प्रकृतिर्जागर्ति विश्वस्मिन्
विपुलतमं वा विश्वं प्रकाशमायाति चैकान्ते ॥२॥

एकान्ते चैतन्यं निर्मथितं स्वेन रूपेण
सन्दृश्यते समन्तात् नानारूपेषु चित्रेषु ॥३॥

एकान्तः सा कान्ता मोहयतीवाऽमृतास्वादैः
मथयतितरां मृतत्वे या वृत्तिर्जायते चित्ते ॥४॥

रङ्गे रङ्गे रिङ्गणरेखा रम्या तथैकान्ते
भव्या नव्या सरणिर्मिलतितरां वा तथैकान्ते ॥५॥

मानसपटले वर्षा चित्राणां विद्यते विपुला
नितरां प्रकर्षयोगो भवतितरां वा तथैकान्ते ॥६॥

अणुपरमाणुमहत्त्वं संघर्षाणां नवीनरूपाणि
एकान्तानां गाथां कथयन्तीवाऽमृतास्वादैः ॥७॥

भ्रान्तिर्नश्यति सद्यो निश्चयभावः समायाति
एकान्तानां लाभा नैकविधा जीवने दृष्टाः ॥८॥

मौनतमे वा गगने गंगा याऽस्ते तरंगिता नित्यम्
तस्या एवाऽवतरणकर्मणि दक्षास्तथैकान्ताः ॥९॥

(१८) मेघमाला

(२२६—२३३)

मेघानां यानेष्वारुह्य तु सततं पयोऽत्युच्चैः
घटयति जनताजीवनसंतरणं शुभ्रपाथेयम् ॥१॥

कविकुलगुरुरपि मेघे कान्ति कृष्णां समालोक्य
यक्षं जायामलकां रामगिरिं चापि कल्पयामास ॥२॥

सघना मेघच्छाया जलमिश्रा शीतसंचारा
घर्मप्रतप्तजनतानन्दकरी संततं जयति ॥३॥

आसृष्टेरारम्भादद्यावधि मेघडम्बरः सोऽयम्
बालान् वृद्धांस्तरुणान् कामिजनान् मादयत्यतुलम् ॥४॥

सौन्दर्यभूमिकेयं नीला जीमूतमालिका नभसि
कं वा जनं न कुरुते हर्षाकारं विमानमारूढम् ॥५॥

नीरदलीलाऽऽकाशे चित्रविचित्रा समाभाति
यत्र धरित्रीलीला सापत्न्यं द्वेषमातनुते ॥६॥

अलकावलीव सेयं विकीर्णवर्णा मनोहरा दृश्या
या सृष्टिनायिकायाः सौन्दर्यं दर्शयन्तीव ॥७॥

कल्पनकल्पलतेयं मेघानां मालिका नम्या
ईदृक्ता चेयत्ता यस्या गणिता न केनापि ॥८॥

(१९) मेघाः
(२३४—२४१)

मेघाः सन्ति कियन्तो नभसि समुद्रात् समुद्भूताः
जीवनसम्प्रेषणतो हर्षाद् वर्षा वितन्वन्ति ॥१॥

जाज्वल्यमानघर्माऽकाण्डं ताण्डवमहो शान्तम्
तप्तोऽयमपि समीरः सुतरां शीतो नु संजातः ॥२॥

घर्मांशुः कथमेवं प्रतपत्यविचारयञ्जगतीम्
प्रतिवर्षं सरणिरियं घर्मो मेघस्तथा पवनः ॥३॥

मृतकानामपि संख्या तापाल्लहरीं समाश्लिष्य
आकाशवाणिनादैः पत्रैरपि सूच्यते नूनम् ॥४॥

ये तापमूर्च्छिता अपि रक्षितवन्तः स्वमात्मानम्
ते ननु सुखस्य वर्षाः का अप्यसमाः करे कुर्युः ॥५॥

शोषणकररविकिरणान् स्थगयत्यम्भोदमालेयम्
नैवं यदि बोभूयाद् जीवनचिह्नं कुतोऽवशिष्टं स्यात् ॥६॥

नीचैस्तलप्रदेशात् क्षिप्रतरं वा समुद्भूय
उच्चादुच्चतरं तत्स्थानं मेघा द्रुतं प्रयान्ति ननु ॥८॥

अण्वस्त्राणां स्फोटे संसारे सर्वथा क्षुब्धे
अम्बुदमालापीयं कंचित् क्षोभं बिभर्त्येव ॥८॥

(२०) वेदना

(२४२—२४९)

मनसि विषमता वचसां निम्नोन्नतमार्गसंचारः
काये क्रान्तिविधुरता मूर्तिमती वेदना सेयम् ॥१॥

बहु बहु बहु करणीयं न किमपि संजायते नूनम्
सरणिर्नो लब्धा सा या करणीयेऽग्रसारयति ॥२॥

बहुभिर्बहु सम्पादितमेतद् यद् विद्यते पुरतः
लाभास्तेषामेषां नभःस्पृशो लोकनीयतराः ॥३॥

आसन्निमे विपन्नाः साश्रुमुखा दीनतायुक्ताः
किन्तु स्वेदोद्योगस्तानद्यत्वे विलासयति ॥४॥

अन्ये चासन् भरिताः सुखिनो भोगेषु संसिक्ताः
ते निम्नत्वे तेषामधिकृतभावेषु संस्थिता दृश्याः ॥५॥
एतानथ तान् सर्वान् दृष्ट्वैतच्चेतसा ध्येयम्
बहु करणीयं पुनरपि नैवात्मनि निम्नता धार्या ॥६॥
कार्यमये संसारे करणीयं सर्वमेवैतत्
सामान्यं वैशिष्ट्ये नायं क्षणसङ्ग्रहः कार्यः ॥८॥
कालः कियती मात्रा योऽसावाधारभूतो वा
तत्रोच्चावचभावा दृश्यन्ते न त्वरा काचित् ॥८॥

(२१) सिद्धस्थानम्

(२५०—२५७)

तदिदं सिद्धस्थानं प्रसन्नताभिः परामृष्टम्
नानासुषमामण्डितरूपं नित्यं मनो हरति ॥१॥
सूक्ष्माणां स्थूलानां रूपाणामत्र भाग्यानि
निर्मीयन्ते सततं नानारूपाण्यनन्तानि ॥२॥
चेतसि निर्भरत्वं वचसि च वाद्यामृतास्वादः
स्थानेऽस्मिन् सम्प्राप्ते सर्वेष्वन्तः समुद्भवति ॥३॥
शुभ्रा विचारसरणिः कल्याणानां समीपताकरणी
स्थानेऽस्मिन्नायासं विनैव सद्यस्तरङ्गिता भवति ॥४॥
चञ्चलतायाश्चित्रं व्यथयति यद्वा मनोजगत्सर्वम्
स्थानेऽस्मिंस्तल्लुप्तं तथा यथा नास्ति परिचयः
कोऽपि ॥५॥

गुणगणनवप्रकर्षस्त्वाधारवशः सदा सिद्धः
भारविवाक्यं तडिदिव स्थाने ह्यस्मिन् समुन्मिषति ॥६॥
सर्वेन्द्रियतोषकराः सम्भाराः सात्त्विका यत्र
स्थानं तदिदं दिव्यं वरदानं वा समालोक्यम् ॥७॥
दर्शं दर्शं यत्र त्वहो ध्वनिः केवलं हृदये
वर्षा इव हर्षाणां कुर्वन्निःसरति भावानाम् ॥८॥

(२२) स्वरलहरी

(२५८—२६६)

बाला काचित् स्वीयां स्वरलहरीं संविलासयति
सर्वेन्द्रियाणि मन्ये श्रोत्रे सद्यो विलीनानि ॥१॥
स्वरलहरीयं काचित् विषमान् भावान् विदूरयति
एकाकारां मुद्रामाविर्भावे विलासयति ॥२॥
एषा प्रभातवेला सैषा विभुता विलक्षणा भावाः
स्वरसंचारमधुरता मधुपूर्णोऽयं विभाति संसारः ॥३॥
लालितपालितवर्धितसरणिः सैषा स्वराणां या
अवरोहारोहक्रमनिःश्रेणीयं विलासमायाति ॥४॥
अधुनैवैकक्षणके स्वर्गे गमनं सदेहं वा
तनुते लहरी सेयं स्वरामृताऽस्वादसम्पूर्णा ॥५॥
सरिगमपधनिर्बन्धे प्रकम्पमानेव मधुमयी संवित्
रंगमयी चित्रमयी विभामयी वा विभासते धारा ॥६॥
रसमयनवनिर्झरिणी मानसगगने तरंगिता सेयम्
प्रीतिमयं संसारं प्रकाशयति सर्वसम्पूर्णम् ॥७॥

गन्धमयीयं पृथिवी स्वरसौगन्ध्येन सम्पूर्णा
स्वर्णे सौरभभावं निस्तन्द्रं प्रस्फुटं कुरुते ॥८॥
जीयादेषा लहरी निस्तन्द्रा छन्दसां माला
स्थूलतराः शब्दास्ते यत् सौन्दर्यं विलोपयन्त्येव ॥९॥

(२३) सा काऽपि

(२६७—२७४)

हंहो, तडिदिव वेगात् संयान्ती मधुमयं चित्रम्
चित्ते बिकिरन्तीयं मोहाम्भोधौ निमज्जयति ॥१॥
मधुकलशं नु वहन्ती वितरन्ती मधुमयं गन्धम्
सा गन्धवाहसहजा कस्मान्नो परवशा भवति ॥२॥
नेत्रमयं संसारं रचयन्ती वा पिपासयाऽकुलितम्
अधिदेवतेव तत्र स्थिता विशति मर्महृदयेषु ॥३॥
दैनन्दिनिकी चर्या क्षणदात्री वा क्षणलयं दधती
मनसा कर्णैर्निपेया रंगमयी चेतना कापि ॥४॥
मानसिके संसर्गेऽपि स्वर्गं करगतं दिशती
सर्वविभावैर्वलिता कलिता सुषमा लता काचित् ॥५॥
रूपाणां गन्धानां स्पर्शाणां संगमीभूता
अन्तःस्थितसंसारोद्घाटनपरमा परा संसत् ॥६॥
नियमानां सर्वेषां संहर्त्री नवनियमकर्त्री
रचनासंसारेषु प्रथमा सेयं स्वरालेखा ॥७॥

उपमानानां सैषा दारिद्र्यादेशिका नितराम्
अद्भुततरमिव रूपं दृष्टिपथे नूनमायातम् ॥८॥

(२४) दूरे-अन्तिके

(२७५—२८१)

अन्तिकतमस्थितिर्या सा बाधा रम्यतायां स्यात्
दूरतमा संस्थितिरपि रम्यत्वं नो विलासयति ॥१॥

परमं यद् रमणीयं समीपतमसंस्थितं भाति
तद् रमणीयमितीयं दृष्टिर्दूरान् निबध्नाति ॥२॥

सामीप्यातिशयादपि तस्य न रमणीयताऽनुभवः
तद् हृदये संजातोऽन्येषां हृदये यथा भवति ॥३॥

स्वीया यद्यपि सुन्दरभावे लभते परां काष्ठाम्
परकीयैव मनोज्ञा सततं चेतो निबध्नाति ॥४॥

दूरे चाथ समीपे यस्या स्थितिरीदृशी भूयात्
नितरां मनोज्ञरूपा चित्ते नूनं समादरं लभते ॥५॥

सौन्दर्यानुभवोऽयं दूरान्तिकसंगमेनैव
छायामसमां स्वीयां विस्तारयति प्रकामरमणीयाम् ॥६॥

जगदीश्वरसंस्थितिरपि मायाऽवरणेन दूरिता याऽसौ
सर्वाऽन्तिकतायामपि चरमानन्दस्वरूपाऽस्ते ॥७॥

(२५) ऊर्जा विद्युत्

(३८२—२८९)

विद्युल्लीला मीलितविभवैः सन्तोषिता भवति
सर्वेन्द्रियपञ्चामृतरूपा नगरस्य जीवनं सेयम् ॥१॥
ऊर्जा यन्त्रमयीयं सर्वं देशं विलासयति
नवनायिकेव परितो यद्वशतो भाति नगरीयम् ॥२॥
आकाशे या विद्युन्माला मेघेषु चञ्चला भाति
तादृशमपि चाञ्चल्यं यन्त्राधारा प्रकाशयत्येव ॥३॥
विद्युत्प्रकाशकार्ये काचाः सर्वत्र गोलकाकाराः
रंगानां संयोगस्तत्र तु दृष्टीर्निबध्नाति ॥४॥
अद्यत्वे यदि विद्युद्वैभवशून्यो भवेन्मनुजः
जीवनमस्ति तदात्वे सर्वं भारायितं भवने ॥५॥
क्षीणतमं ध्वनिमपि वा विद्युद्विस्तारयति कामम्
श्रोत्राणां तोषकरं रूपं विद्युद् विलासयति ॥६॥
शीतानां तापानां नियन्त्रणे वा पराक्रमते
स्पर्शमयः संसारः सर्वः करसंगतो भवति ॥७॥
मनसि च वचसि च काये कोटिगुणां शक्तिमादधती
विद्युदियं संसारे विज्ञानस्यासमा संपत् ॥८॥

(२६) रतिः

(२९०—३०४)

सुन्दरवाग्विस्तारेष्वथ सम्प्राप्तेषु सादरं मनसि
नूतनजीवनधारा प्रतिक्षणं मोदमावहति ॥१॥

मुदिते त्वन्तःकरणे सर्वा दृश्यावलिः सेयम्
स्वयमेव नूतनानां भावानां स्फोरणं कुरुते ॥२॥

दुर्दान्तैरथ सत्यैः पलायनं ये प्रकुर्वन्ति
जीवनसौगन्ध्यं ते वितरीतुं नैव जानन्ति ॥३॥

देहे राक्षसशक्तिर्मनसि विचारे च कोमलता
प्रागल्भ्यं सौन्दर्ये रोचकता चादृता काव्ये ॥४॥

हृदयस्योल्लासाश्चेत् प्राकट्यं नो विजानन्ति
का वा सार्थकता स्यात् तादृशलेखेषु लोकानाम् ॥५॥

प्रेम्णो रूपाणीमान्यपि सम्यग्वर्णितानि कविवर्यैः
येषां चरमोत्कर्षो विलोक्यते काव्यसंसारे ॥६॥

प्रेम परेश्वररूपं जीवनसर्वस्वभूतं च
यदि तन्नास्ति तदात्वे शून्यं तज्जीवनं जातम् ॥७॥

प्रेम्णोऽनन्ता धाराः प्रवाहिताः सन्ति सर्वत्र
स्वर्गे तथा धरायां पातालेष्वपि च निखिलेषु ॥८॥

चेतसि निर्मलधारा प्रेमारूढा परिस्फुरति
आर्द्रं तदिदं विश्वं सर्वं संजायते तया नूनम् ॥९॥

यत्रैवाऽस्मच्चेतः स्वत एवाबद्धतां याति
तत्रैव रश्मिरेषा प्रीतिपरानुभवमार्गगा जाता ॥१०॥

स्वीयसमर्पणबुद्धौ मनसि शरीरे च सम्प्रवृत्तायाम्
निर्वचनेषु सबाधा प्रेम्णोऽर्चिर्दृश्यतेऽगाधा ॥११॥

मनसो विज्ञानेषु प्रख्याता ये च विद्वांसः
निखिलेऽपि हि संसारे रतिभावं मूलमेवाहुः ॥१२॥

रतिरेवैषा विश्वं रतिरेवाऽस्तेऽथ विश्वतो व्याप्ता
प्रेम तदेव हि विमलं रतिभावे यत् सुसंनद्धम् ॥१३॥

सर्वेऽप्येते लोके रतिभावस्यैव साक्षिणः सन्ति
ये याता ये सन्ति ये चैवाग्रे भविष्यन्ति ॥१४॥

मनसोऽगाधसमुद्रे वैचारिकमन्दरैर्मथिते
या दीप्तिः प्रस्फुरिता रतिरेषा सा सुधा प्राप्ता ॥१५॥

(२७) जीवनम्

(३०५—३१८)

जीवनमायातं चेत् नूनमिदं भावनीयमपि
तस्य च परिपालनमपि संवर्धनमपि कार्यमेव स्यात् ॥१॥

जीवनतत्त्वानीमान्यागच्छेयुर्यदा काले
तेषां वा सर्वेषां स्वागतमथ कुर्महे सततम् ॥२॥

विषमैर्भावैर्भरिता दूरस्थितकामनाकुशलाः
एते वयं स्थिता स्मः किं जीवनमेतदेव ननु ॥३॥

नित्योत्सवेषु मिलिताः संतोषितसाङ्गसर्वस्वाः
संगठितशक्तिदीप्ता नम्रतराः कामभोगेषु ॥४॥

ये मानवा भवेयुर्जीवनमेतैर्विभावितं भवति
ते च यथार्थे रूपे सर्वस्वं व्याहरन्तीव ॥५॥

लक्ष्यात् स्वीयाद् भ्रष्टाः नानाविधकार्यसंलग्नाः
न किमपि कर्त्तुं लोके सामर्थ्यं जायते तेषाम् ॥६॥

कर्मणि कर्मणि नित्यं तेषामिच्छैव जागर्ति
लघुतरमप्यनुकर्त्तुं नैवास्ते कोऽपि संयोगः ॥७॥

ननु दुःखमेव तेषां भाग्ये सर्वत्र सन्दृश्यम्
सर्वैर्विभवैर्हीना नास्तितरां जीवनं तत्र ॥८॥

जीवनमिदमत्यन्तं जटिलतरं शीततापमयम्
स्थितिगतिसंयुतमखिलं विभावितं तत्त्वतो विज्ञैः ॥६॥

जडचेतनयोर्मध्ये संग्रामे जीवनोन्मेषः
निस्तन्द्रसान्द्ररूपं सर्वत्रैवं रचितमास्ते ॥१०॥

शतशतधारावर्षैः सन्तर्पितमप्यनेकपरिपुष्टम्
सीमासघनवनानां विभ्रंशकभावमातनुते ॥११॥

आकाशीयरहस्यान् ज्ञातुं ध्यातुं परं यतते
सृष्टीनां सर्वस्वं स्वात्मन्याधातुमीष्टे वा ॥१२॥

तज्जीवनमस्तीदं विरोधिभावोन्मिषन्तीनाम्
घटनानां संघट्टो जातानां जायमानानाम् ॥१३॥

नैष्ठिकतापरिपाके सर्वेऽप्येते समारम्भाः
कामं सन्तुष्टा अपि मूर्च्छामिकां प्रयच्छन्ति ॥१४॥

(२८) संघर्षः

(३१८—३२५)

संघर्षाख्यं तदिदं जीवनपरिचायकं तत्त्वम्
यत्र स्पन्दनमास्ते तत्रैवास्तेऽथ संघर्षः ॥१॥

एकाधिकसत्तायां संघर्षोऽनिवार्यतां भजते
एकोऽहं हि बहु स्यामित्यासीदादिमं रूपम् ॥२॥

संघर्षे रमणं वा मरणं वा जीवनं तदिदम्
नित्यं संघर्षमयं सैव स्यात्प्रेरणाभूमिः ।।३।।

संघर्षे शस्त्राणामुपार्जनं विजयदायकं भवति
शिक्षा-दीक्षा-गुणगणगरिमा शस्त्राणि सर्वाणि ।।४।।

संघर्षे साफल्यं भूपृष्ठे शत्रवः समाप्ताः स्युः
स्वीयप्रभाववशतः सर्वे मित्रत्वमाप्ताः स्युः ।।५।।

एतादृशसंघर्षे सर्वे सर्वत्र व्यापृता दृष्टाः
संघर्षाणां रूपं भिन्नं भिन्नं च सर्वत्र ।।६।।

ये निर्बलास्तु दीनाः पलायमानाश्च संघर्षे
तेषां पराजयो ननु निश्चित एवाऽस्ति दुःखकरः ।।७।।

जयशस्त्राणामर्जनमकर्मणि निरताश्च पुरुषशार्दूलाः
संघर्षेष्वथ सर्वेष्वसमं विजयं लभन्तेऽत्र ।।८।।

(२६) आवाहनम्

(३२६—३३३)

आवाहनमिदमसमं परमं तत्त्वं समुल्लसितम्
औदार्यधन्यताया यस्मिन्नास्ते विलाससंचारः ।।१।।

किञ्चित् किञ्चित् लब्ध्वा पुनरावाहनमभूत्तूष्णीम्
वैपुल्याधिगमोऽपि च तेन तु सुतरां निवेदितो भवति ।।२।।

आवाहनेन पूर्णः पुरुषः पुरुषोत्तमो जातः
कथमन्यथा विभावैः कमनीयत्वस्य सञ्चारः ।।३।।

चेतसि चेन्नम्रत्वं विनयः स्फूर्तिः समर्पणे सुमतिः
आवाहनसंभारा इमे तदा सत्यसंनिहिताः ॥४॥
अविनयशतप्रकर्षे नितरामेवाभिमानसंचारः
आवाहनसंभारे सैषा सर्वा क्षतिस्त्वसमा ॥५॥
चेतसि कमनीयत्वं विशृंखलं चेदितस्ततः पतितम्
तस्य समीकरणे यः श्रमस्तदावाहनं जातम् ॥६॥
सेवायामथ सर्वाप्यावाहनभूमिका भवति
गहनतमोऽयं धर्मः क्षेत्रे सर्वत्र दृश्यते विपुलः ॥७॥
प्रकृतिरियं मातृत्वे दृश्या परितोऽपि निर्मला भाति
ऐकान्तिकमेतस्या आवाहनमत्र संसाध्यम् ॥८॥

(३०) भाषा विवशा

(३३४—३४०)

भाषा भवत्यपूर्णा भावानां संप्रकाशने नियतम्
वर्ण्याणुतमोऽप्यंशो भाषायां संप्रकाशितो नो वा ॥१॥
यानि हिमालयरूपाण्यालोक्यन्तेऽथ भाषासु
कोटितमोऽप्यंशो वा पर्वतराजस्य तत्र नैवास्ते ॥२॥
वस्तूनां गुणधर्मा वस्तुगता वा प्रभावा ये
तत्रोदाहरणानामानन्त्यं सर्वतो दृष्टम् ॥३॥
कवितारसगणनायामद्याप्येतादृशा रसा दृष्टाः
येषां वर्णनकाले भाषेयं कुण्ठिता भवति ॥४॥

बीभत्स-करुण-रौद्रा भयानका वा रसा एते
भाषायां स्वल्पत्वादल्पतरोदाहृता दृष्टाः ॥५॥
येषामपि वा विषये 'बहु कथितम्' धीरियं भवति
उक्तात् सहस्रगुणितं वक्तुं तत्रावशिष्यते नियतम् ॥६॥
भाषाया अल्पत्वं तदिदं सर्वं विलोकयता
केनापि कविवरेण्येनान्यादृश्युक्तिरादृताऽर्यायाम्[1] ॥७॥

(३१) विवशता
(३४०—३४७)

काऽपि विवशता चित्ते दौर्बल्यं बोधयन्तीव
जीवेश्वरयोर्मध्ये भेदं विज्ञापयन्त्यास्ते ॥१॥
ईश्वर एव कदाचिद् दूरे स्याद्विवशतायोगात्
पतनोत्पतनं जीवा सेवन्ते विवशतापाशे ॥२॥
चैतन्यस्य समुद्रे लहरीरूपा विवशताऽस्ते
सर्वमहत्परिमाणं यद्वशतः संकुचितमास्ते ॥३॥
एकाकिनो न रमणं नानात्वे चादिमा तृष्णा
महतोऽपि यो महीयान् विवशः सोऽपीति सत्यमाभाति ॥
अथ पंचकंचुका वा पंचमला वाऽथ संस्काराः
स्वातन्त्र्येतरतत्त्वस्यैवाख्येयानि रूपाणि ॥५॥

---

१. आसंसारमुदारैः कविभिर्नूनं गृहीतसारोऽपि ।
अद्याप्यभिन्नमुद्रो विभाति वाचां परिस्पन्दः ॥

विवशीभावस्य पुनश्चरमा काष्ठा तु मृत्युरित्युक्ता
स्ववशे सर्वं नीत्वाप्यवशो जन्तुर्मरणकाले ॥६॥
स्ववशविहारः सर्वो यदि संसिद्धो जगति बोभूयात्
जगतः सर्वं रूपं नूनं परिवर्तितं निमेषे स्यात् ॥७॥
स्ववशे यद् वैवश्यं वैवश्येऽपि स्ववशभावः
ऐन्द्रं धनुरिव जीवनरूपं चित्रं समातनुते ॥८॥

(३२) प्रेरणा
(३४८—३५५)

प्रेरणभावः परमः श्रेयोमार्गे निवेशयति
प्रबलतरोऽपि विषीदति लाभकरप्रेरणाऽभावे ॥१॥
अग्रेसरीकरणमथ शक्तिमती प्रेरणा कुरुते
मित्राण्यथ गुरवो वा विपुलास्ते प्रेरणापुञ्जाः ॥२॥
आश्रयदातारो ये पुरायुगे प्रेरका आसन्
शासनमथ चाद्यत्वे नानाविधवैभवं दद्यात् ॥३॥
स्वीये मार्गे बाधां महतीं दृष्ट्वा जनाः क्षुब्धाः
अल्पीयस्यपि धारा प्रेरणरूपाऽत्र जीवनं दद्यात् ॥४॥
"मा भैरेवं कार्यं" "ननु तुच्छा विद्यते बाधा"
व्यथिताऽन्तरेऽमृतमयं वाक्यकदम्बं समाश्वसेत्सद्यः ॥५॥
उचितं पारिश्रमिकं ख्यातिप्राप्तिः समर्थनावाप्तिः
प्रेरणरूपाणीमान्यसमसमुल्लासदायीनि ॥६॥

कार्ये विषमां वृत्तिं समतायां या नियोजयति
यतः कुतश्चिल्लभ्या मानवमात्रेण प्रेरणाशक्तिः ॥७॥
देवाराधनरूपे नानादीक्षाविधानेषु
अध्यात्मप्रेरणया विश्वासे दीप्यते शक्तिः ॥८॥

(३३) वैज्ञानिकधारा

(३५६—३६८)

एषाऽस्ति काऽपि कुण्ठा या नूतनसेचने नितराम्
किमपि विरोधं तनुते तेनास्ते वा विरामोऽयम् ॥१॥
चिन्तनधारा सर्वा किञ्चित् किञ्चित् प्रकाशमायाता
सत्वरमेव समस्तं रूपं परितः समापयति ॥२॥
यस्मिन् देशे काले वयं स्थिताः स्मो न यदि तस्मिन्
चिन्तनसरणिरुदीयात् का सिद्धिः स्याद्विचारेषु ॥३॥
वैज्ञानिके युगेऽस्मिन् विज्ञानान्वेषितः पन्थाः
नाङ्गीकृतो यदि स्यात् दूरे स्यात् साधना निखिला ॥४॥
वैज्ञानिकधारा सा या वै कुण्ठां विदूरयति
यस्यां वृद्धिविलासा अद्यत्वे सार्थकाः सन्ति ॥५॥
सा पद्धतिर्नवीना यस्यां जागर्ति कोऽपि विश्वासः
रूपाणां निखिलानां धारा क्रमभावमायाति ॥६॥
यस्यां शृण्वन्ति जनाः श्रोतव्यं प्रेरिताः सन्तः
वक्तव्यमपि च निखिलं स्पष्टं सरलं तथा भवति ॥७॥

वैज्ञानिक-पद्धत्या कुण्ठा सर्वा विदूरिता भवति
निश्चयबुद्धेर्नूनं विकासभाषा समुल्लसति ॥८॥
वैज्ञानिकपद्धत्या सततं संचारशीलेन
सर्वा विकासरणिर्नित्यं सौम्याऽनुसन्धेया ॥९॥
यस्यां विचारकार्ये विरामधाराविरामः स्यात्
सा वैज्ञानिकसरणिर्मता समस्तेषु भावेषु ॥१०॥
नाना चिन्तनधारा विस्तारं यत्र दर्शयति
सामर्थ्यं विपुलतरं चित्ते विस्फारितं भवति ॥११
यद्वै सर्वं निर्मलमानन्दे संनिवेशयति
तन्नूतनमिह कथितं विमलतरं यन्मनः कुरुते ॥१२॥
आरादियमतिघोरा चिन्तारेखा विशोषयन्तीव
एतस्या निर्यासे नूतनतायाः समुल्लासः ॥१३॥

(३४) कुण्ठा

(३६९—३७४)

येनोन्नतिर्नितान्तं चरणं परिचुम्बते सततम्
मार्गा विस्तीर्यन्ते नो विहितस्तादृशोऽभ्यासः ॥१॥
भाषाया दारिद्र्यं न विद्यते हन्त कुत्रापि
नानाविधविषयाणामवलिः सर्वत्र दृश्यते ललिता ॥२॥
प्रोद्दामेच्छाशक्तेर्दारिद्र्यं दृश्यते किन्तु
कुण्ठाग्रस्तं चेतोऽभ्यस्तं पूर्णेन कालेन ॥३॥

स्वच्छन्दता च निखिला पूर्णविरामे समाप्नोति
स्वातन्त्र्यशून्यतायां किं कुर्यात्कोऽपि सुन्दरं यत् स्यात् ॥४॥

सर्वविधं चिन्तनमथ निबद्धभावे समायाति
रमणयीताविलोपः कुण्ठां वा केवलां दद्यात् ॥५॥

संस्कारैराबद्धा बुद्धिर्नैष्फल्यमादिशति
निगडितचिन्तनमेतद् बलिवर्दभ्रमणरूपं भोः ॥६॥

(३५) निषेधकाव्यायितम्

(३७५—३७८)

पठितं पठितुं दृष्टं यद्दर्शनीयमत्रासीत्
सम्प्रत्यस्ति नितान्तं चलनीयञ्चाग्रिमोद्देशे ॥१॥

विजयपराजयभावे परिणतिरुग्रा मनःपटले
नैवाऽनुभवव्यालैरास्वाद्या रक्षणीया सा ॥२॥

येयं करालदंष्ट्रा भीषणतां सम्प्रदर्शयति पुरतः
भग्ना सती तथैषा प्रकोष्ठसौन्दर्यवर्धिनी भूयात् ॥३॥

गगने येषां पादौ क्षितौ सदा कुत्सिता दृष्टिः
तेषां चरितं सर्वं निषेधकाव्यायितं भवति ॥४॥

(३६) पुरातनं सुन्दरं भवति

(३७९—३८६)

कीदृशमपि वा तत्स्यात् घोरतरं वा कुरूपं वा
अद्यतनात्तुलनायां पुरातनं सुन्दरं भवति ॥१॥
प्रत्यक्षतः कदाचित्संसर्गो नो विजायते तस्य
स्मृतिमात्रे सुलभं तद् रेखाचित्रेषु दृश्यते विविधम् ॥२॥
मिश्रितमेतन्निखिलं चाद्यतनं भासते पुरतः
कष्टेनाऽपि हि तत्र स्वीयं पदमर्पितं भवति ॥३॥
यद्यत्पुरातनं वा यस्मिन्कालेऽद्यतनमासीत्
मिश्रितभावाऽनुभवो नूनं तस्याऽपि तत्राऽसीत् ॥४॥
कालेन शोधितं तद्रूपं तस्यैव भासते चित्ते
कष्टस्य मिश्रणं तद् दूरीकृतमेव कालेन ॥५॥
'ताजमहल'-निर्माणे यादृक् कष्टं समुद्भूतम्
कर्मकराणां नित्यं नैवाऽस्ते तत्पुरोऽद्यत्वे ॥६॥
पूर्वं दुःखाऽनुभवः संजातोऽप्यद्य संस्मृत्या
सौरभमसमं चित्ते निवेशयत्येव मधुपूर्णम् ॥७॥
निखिलपुरातनरूपस्यास्ते स्मृत्यैव सम्बन्धः
मनसः क्रियया तस्मात् पुरातनं सुन्दरं भवति ॥८॥

(३७) सांस्कृतिकीं रात्रिमासूते

(३८७—३९४)

सायं प्रातर्यदिदं कौमार्यं सुस्फुटीभवति
बन्धं भित्त्वा छित्त्वाऽविर्भूतं तद्विभासते पुरतः ॥१॥

श्वासे श्वासे प्रवहत्युद्दामोन्मादमालेयम्
स्तुतिशतकैरप्राप्या निन्दितवैभवयुता चास्ते ॥२॥
कण्टकजालैरावृतसर्वाङ्गी सा निषिद्धधाराऽपि
शूद्रकराजसभायामास्ते चाण्डालकन्येव ॥३॥
नहि नहि नहि कुर्वाणा सर्वां स्वीकृतिमियं वहती
आकृत्याऽप्रतिमा तत् कृष्णं रूपं स्फुटीकुरुते ॥४॥
नन्दनवनसाम्राज्यं नित्यनवीनं समादिशती
काले मिलिन्दमालां विक्षोभयतीव भासते मधुरा ॥५॥
पौनःपुन्यैरपि या नित्यनवीनां श्रियं वहती
दृश्या नूतननिर्णयगरिमाणं स्थूलयन्तीव ॥६॥
भाग्यसहस्रै रचितसर्वस्वा दीप्ततररेखा
स्थितिगतिरञ्जितकाया सांस्कृतिकीं रात्रिमासूते ॥७॥
नन्दितसहस्रकिरणैरर्धोन्मादैरभीष्टदा नित्यम्
विचरति हतभाग्यानां कायोन्मत्तेषु काननेषु चिरम् ॥८॥

(३८) मिश्रणवेला

(३९५—४००)

न पुरुषमनसो रूपं नारी मनसा विभासते तुल्यम्
पुरुषस्य धैर्यहानिर्नारीमनसस्तथा दृढता ॥१॥
संयममयता यासौ नारीकाये समुल्लसति
पुरुषाणां व्यूहोऽसौ दीपे शलभायितो दृष्टः ॥२॥

स्वर्णरजतनिर्झरिणी वहतितरां कान्तिमयकाये
निर्णयकर्मणि निरताः स्वयं निमग्ना सदा दृष्टाः ॥३॥

रूपं दर्शं दर्शं कर्णे कर्णे मनुष्याणाम्
वाणी समुच्छ्वसति सा निःश्वासो नैव निर्याति ॥४॥

नैराश्यधूम्रमयता दर्शकमनसो विराममादिशति
दुःखानां च सुखानां मिश्रणवेलेयमाभाति ॥५॥

"किं वा कथितवतीयं भवतः कर्णे मुखं दत्त्वा"
स्मितविस्मारितहृदया एते ज्ञातुं समुत्सुका जाताः ॥६॥

(३९) उपेक्षा

(४०१—४०७)

ज्ञानार्जने निकामं समुपेक्षा वा कृता काले
दुष्फलमेतदतीवोन्मथयत्यद्यापि यन्नितराम् ॥१॥

एताः पिपीलिका अपि गजभावे परिणता दृष्टाः
मामुपहसन्ति मन्ये संकुचितं सर्वभावेन ॥२॥

कामं निमीलिताक्षस्तिष्ठाम्येवं क्षिपन् कालम्
अद्यापि कापि सरणिर्नो लब्धा या सुखं देयात् ॥३॥

गलितं पलितं सर्वं रूपं हीनं तथा च नो जातम्
कृत्ये नवीनता का संजाता सद्विधानेषु ॥४॥

अधिगतयाथातथ्या शान्ता एते महात्मानः
रूपेणैव नितान्तं मामाकर्षन्ति वर्षासु ॥५॥

सामीप्यं चैतेषाममन्दमानन्दमादातुम्
सम्प्रेरयति नितान्तं विषमं भावं विदूरयितुम् ॥६॥
पर्वतमाला गगने मण्डलमाबध्नती दृष्टा
हृष्टा तथा च पुष्टा कुरुते मनसोऽसमां दृढताम् ॥७॥

(४०) क्रोधशक्तिः

(४०८—४११)

क्रोधोऽयं समुदाये शक्तिं प्रबलां प्रबोधयति
विगतक्रोधरयाणां का सिद्धिर्जीवनेषु स्यात् ॥१॥
सिंहः क्रोधवशान्ननु निखिलां सुषमां समाप्नोति
क्रोधाऽभावे न स्यात् तस्मिन्नसमश्चसत्कारः ॥२॥
ये वर्तमानकाले भूतं भव्यं करे कुर्युः
क्रोधावेशस्तेषां विख्यातः सर्वलोकेषु ॥३॥
क्रोधो जीवनचिह्नं वह्नौ दाहो यथा भवति
राष्ट्राणामितिहासा युद्धेष्वाधारिताः सन्ति ॥४॥

(४१) कृपाणधारा

(४१२—४१७)

कालान्धकारपटलीसंछादितमेतदङ्गणं मनसः
दीपा अप्याशानां निर्वातास्ते विरोधिभिर्वातैः ॥१॥

श्वासप्रश्वासानां गतागतैरेवमनुमेया
जीवनसरणिः काचित् खद्योतानां प्रकाशरेखेव ॥२॥

शिथिलतरं संवृत्तं गात्राणां सन्धिबन्धनं तदिदम्
भूलुण्ठितमिव सर्वं विभावनीयं पुरस्तान्मे ॥३॥

हाहाकारं कृत्वा काचिद् बाला करोति रोमाञ्चम्
विस्मृतमेव यदनया मनोगतं सर्वमाकूतम् ॥४॥

एषा कृपाणधारा कोपाविष्टे करे कृष्टा
नयनारुणिमविभावं समर्पयन्ती पुरःस्थितैवास्ते ॥५॥

सर्वसमर्पणशीलं मामप्येवं समासाद्य
विभुता ननु प्रयाता कस्यां दिशि नैव जानामि ॥६॥

(४२) धैर्यम्

(४१८—४२५)

धैर्यभ्रंशे शान्तिर्दूरं गच्छति समीकृता याऽसीत्
आगच्छति दुःखानां क्लेशानां वा परीपाकः ॥१॥

आश्रितजनसंमर्दः सहसैवोत्थानमायातः
कामं प्रवहति निमिषैर्विषमैर्भावैरलं ज्वलितः ॥२॥

घंटानादो विवशीभावानां द्योतितो भवति
तत्राऽभ्यासविपुलता नूनं संदृश्यते बहुधा ॥३॥

आयातेन च तेनैवेदृशमारोपितं विषं बीजम्
वल्ली दग्धा सेयं बीभत्सं रूपमातनुते ॥४॥

तृणवन्मत्वा यदिदं नाशितमासीत्सुसाम्राज्यम्
चित्रचरित्रं मत्वा केवलमेतस्य दर्शनायासः ॥५॥

अल्पतरप्राणानामीदृशमहिमा - समुद्योतः
कलुषीकुरुते दिव्यं सरोवरं दर्शनीयचरम् ॥६॥

क्षणमात्रे या हानिः संजाता सत्यसन्धीनाम्
न ज्ञायते कदाचित् भूयोऽप्यासां समागमः स्याद्वा ॥७॥

भ्रमविभ्रमसंचरणे शक्तिर्या नाशिता दिव्या
तां वा प्रत्यानेतुं विकटश्रमसाधना योज्या ॥८॥

❀

(४३) कामः

(४२६—४२९)

कामात्मता प्रशस्ता नाभिमता जीवने क्वाचित्
नो लभ्यं संसारे निखिलेऽस्मिन् कामशून्यत्वम् ॥१॥

समुचिकामनिषेवणरूपोऽयं मध्यमो मार्गः
संसेव्यते निकामं जीवनसंसिद्धिकामेन ॥२॥

मर्यादानां बन्धो विश्वासे नैष्ठिकी धारा
स्वच्छन्दकामचारं नियमे स्थापयति सम्पूर्णम् ॥३॥

सोऽयं वा तटबन्धस्तटिनी कामस्य संयता येन
तेन समाजे जीवनमास्ते नितरां सुसम्बद्धम् ॥४॥

(४४) परिचय-महिमा

(४३०—४३७)

गुणगणपरिगणनायां गुणसाम्राज्याभिषेकवेलायाम्
परिचयगुणमद्यत्वे सर्वश्रेष्ठं विजानीयात् ॥१॥

दयया पूर्णोऽपि स्यात् प्रभावपूर्णोऽपि शमदमैः सर्वैः
त्यागी भवेद्विवेकी परिचयहितो न पूज्यते लोकैः ॥२॥

साक्षात्कारावसरे चामन्त्रितसर्वयोग्यतायुक्तः
यदि परिचयेन शून्यो न तमां विनियुज्यते श्रेष्ठैः ॥३॥

"जानाम्यहं तमेनं" "पुत्रोऽयं तस्य तस्य किल बन्धुः"
अध्यक्षोऽपि तदात्वे कथयति "तेनैतदर्थमहमुक्तः ॥४॥

श्रेणी चास्य तृतीया प्रमाणपत्रे विलिखिताऽस्ते
अनुभवशून्योऽपि पुनः परिचयबलतो वृतो भवति ॥५॥

श्रीभगवानपि पूर्वं स्तोत्रध्यानादिसत्क्रियालाभैः
परिचयपूर्वकमेव प्रवर्तते वा वरप्रदानेषु ॥६॥

परिचयमहिमाऽनन्तः हीनस्तेनाऽमृताऽस्वादे
सद्यो बहिष्कृतः सन् नैवाप्नोत्यादरं क्वापि ॥७॥

तस्मात्सर्वं त्यक्त्वा परिचयवृद्धिंकरोपायान्
अन्वेषयन्ति धीरास्तेनैवैषां समुल्लासः ॥८॥

❀

(४५) निन्द्यतायामाशा

(४३८—४४४)

निन्द्यप्रवाहे पतितः पुनरुत्थानं च कामयते
तेनाऽपि न भेतव्यमुत्थानं तत्करे संस्थम् ॥१॥
क्षणनिश्चयसंचयने यदि लग्नः प्रोज्ज्वलं ध्यायेत्
सद्यः कृपाप्रवाहः सम्प्राप्यो वा परेशितुस्तेन ॥२॥
निन्द्यानपि स्वभावान् स्वीकर्तुं नो स्वतन्त्रता चास्ते
सर्वं त्वेतदतीवोन्मिषितं परमेशितुर्मंस्थाः ॥३॥
निन्द्याऽचरणे तोषो यदि भूयात् तत्र नो हानिः
केवलमीशेच्छायाः संस्मरणं तत्र काम्यतरम् ॥४॥
अन्तःस्थितसज्ज्योतिर्यथा यथा चालयति नित्यम्
निन्द्ये वाऽथ पवित्रे मार्गे तन्मङ्गलं सर्वम् ॥५॥
रावणसदृशा नैके येऽन्तःस्थेनैव निन्द्यतममार्गे
संचालिता अपि पुनः प्रापुर्जगदीशसामीप्यम् ॥६॥
सर्वमपीदं विश्वं निन्द्यं वा शंसनीयं वा
महतो महीयसोऽस्यैवेच्छा लीलायितं भवति ॥७॥

(४६) बहुमतम्

(४४५—४४९)

सम्प्राप्ते स्वातन्त्र्ये सर्वमकाव्यायितं जातम्
आसीद्यत्तु ससीमं सीमाभङ्गः कृतस्तत्र ॥१॥

निखिलमनर्थकमेतद् राजा राज्यं च वर्णाश्च
अस्पृश्यता च धर्मः सर्वमसम्बद्धमेवाऽद्य ।।२।।

स्वातन्त्र्ये सम्प्राप्ते बन्धनसामान्यसंन्यासः
संजातो न यदि तदा स्वातन्त्र्यमनर्थकं जातम् ।।३।।

बन्धन-भङ्गः कार्यो यदि किमिदं बन्धनं नाम?
देशः? शासक-परिषद् ? न्यायालयसंविधानादि ?' ।।४।।

प्रश्नानामेतेषामद्यत्वे त्वेकमुत्तरं ध्येयम्
बहुमतमथ यत्राऽस्ते तत्सर्वं सम्मतं नाम ।।५।।

(४७) अवमूल्यनम्

(४५०—४५८)

देशस्यादर्शाणामवमूल्यनमत्र यज्जातम्
राष्ट्रस्वरूपलोपस्तेन क्रमशो विलोक्यते नित्यम् ।।१।।

शौर्यस्वरूपनाशो गौरवभावस्तथा नष्टः
विद्याविलासकान्तिर्गता तथा भारतीयानाम् ।।२।।

जीवनमप्यवशिष्टं भृतिकार्ये वेतनाऽवाप्तौ
सामूहिकः स्वभावो जनतायाः सत्वरं नष्टः ।।३।।

यान्त्रिकविज्ञानेषु प्रबलतमैस्तैर्विदेशीयैः
जाङ्गलिकं विद्रूपं साधितमस्मत्सुपुरुषाणाम् ।।४।।

ऐक्यास्वादविहीना एकैकस्मिंस्तु संकुचिताः
एतद्देशे मनुजा मानवरूपादपि भ्रष्टाः ।।५।।

अवमूल्यनमीदृशमथ मानवधर्मस्य संजातम्
विश्वगुरुत्वे संस्थितमेतद् राष्ट्रं विपन्नमभूत् ।।६।।
स्वीये राष्ट्रे सर्वे प्रथमश्रेणीपरिगणनयोग्याः
मध्यमनिम्नश्रेण्यां सर्वे ते स्थापिता आंग्लैः ।।७।।
वर्गाणां देशेऽस्मिन् रूपं तैस्तादृशं गठितम्
स्वातन्त्र्येऽपि तदेतत्सौख्यकरं शासकानां वा ।।८।।
सत्यान्नीतिर्दूरा कर्तव्यं दूरतरभूतम्
स्वार्थमयः सन्तोषः केवलमेकः समाभाति ।।९।।

(४८) नैपुण्योद्घोषः

(४५९—४६८)

नैपुण्येनैवैषा चर्या काचित्समादिष्टा
यद्वशमायातोऽयं चक्रभ्रान्तः पतामि न चलामि ।।१।।
निपुणोऽयमिति ख्यातिर्विगुणत्वं वा विरूपत्वम्
क्षमताया राहित्यं मयि नित्यं संनिवेशयति ।।२।।
'अग्रे इमे स्थिता ये निपुणतमा वन्ध्यतायुक्ताः
मूर्खास्ते, ज्ञानं मे नैपुण्योद्घोषलाभोऽस्ति ।।३।।
अद्याऽहं कोऽप्यसमः संजातस्तादृशो जगति
यस्य कलामात्रं वा शेषे सर्वत्र सन्दृश्यम् ।।४।।
जाड्यातिशयमिदं यन्मामेते सर्वसंसिद्धम्
शुभ्रप्रभावपूर्णं द्विषन्ति मन्दा जलं पीत्वा ।।५।।

पश्यतु काले प्राप्ते समागते किञ्चिदधिकारे
एतांस्तु चूर्णयित्वा कृतकार्योऽहं भविष्यामि ।।६
ज्ञास्यन्त्यन्येऽपि जना मत्साधं यो विरुध्येत
का भूयात्तस्य गतिरित्यालोचनपरो भवामि ननु ।।७।।
भूयान् कालो नित्यं व्यत्येत्येवं विचारेषु
परितोद्घोषितनैपुण्यस्य फलं तन्मया प्राप्तम् ।।८।।
भतृहरिर्ज्वररूपेणैतादृशवर्णनं कृतवान्
यदि सत्यं नो जाने ज्वरोऽयमस्तं गमिष्यति वा ।।९।।
अधुना तूक्तविचारैस्तरङ्गितं मे भवत् स्वान्तम्
सुखसाम्राज्यं लभते त्ववसरमात्रे प्रतीक्षा मे ।।१०।।

(४९) परस्परम्

(४६९—४८०)

अहमत्र त्वं तत्र स्थित्वा सर्वं समासाद्यम्
कः पृच्छति को हेतुः पृच्छेदपि मुद्रणीयं तत् ।।१।।
विद्वत्तायाः सरणिः सोऽहं विद्वत्सु मूर्धन्यः
त्वं मामेवं घोषय नूनमहं त्वां तथैव कर्तास्मि ।।२।।
स्वल्पेऽस्मिन्नधिकारक्षेत्रे चैवं परस्परं कार्यम्
क्षत्रमिमं वर्धयितुं विवशाः सर्वे भजन्तेऽस्मान् ।।३।।
एवं कृते कतिपयैर्दिवसैस्तादृक् स्थितिर्भविता
त्वमहं चाऽस्मिल्लोके विषयेऽस्मिन् सूर्यचन्द्रौ स्वः ।।४।।

त्वं मामाह्वय नैजे चाह्वानेऽहं सदाऽह्वयामि त्वाम्
भूयानेवं भूयादुभयोरप्यावयोर्लाभः ॥५॥

लाभकरं सर्वं स्यात् नो लाभो यत्र तत्त्याज्यम्
मूर्खाः प्रलापशूराः शममेष्यन्त्येव सर्वेऽपि ॥६॥

यदि ताडनसहने वा लाभः कुत्रापि दृश्येत
स्वर्णावसरं मत्वा सोढव्यास्ते समाघाताः ॥७॥

प्राप्तेऽवसरे त इमे आघातास्तीव्रसत्कारैः
अस्मान् कृतार्थयेयुर्धार्यं वा निश्चयेनैतत् ॥८॥

देशस्वतन्त्रतायाः सङ्ग्रामे सम्प्रवृत्ते वा
लुण्टाका अपि ये वा कारागारे गताः सुखं तेषाम् ॥९॥

तेऽपि लभन्ते वृत्तिं प्रमाणपत्रं प्रदर्शयित्वा स्वम्
कारागारे स्थितिरथ तस्मिन् कालेऽर्थदायिनी जाता ॥१०॥

गोप्यं सर्वं गोप्यं गोपनमुद्रा न परिहार्या
नन्वनयैव जनानां हृदयेष्वातंकलाभः स्यात् ॥११॥

निखिलं यत्र स्पष्टं तत्रापि तु गोपनीयतरम्
निखिलं रहस्यजातं कल्पनयैव प्रकल्पनीयं स्यात् ॥१२॥

(५०) धिक् तान्

(४८१—४९०)

धिक्कारास्तान् विद्वन्मन्यान् नूनं महादर्पान्
विनयस्य तु नो दृश्यं यत्रेदं लेशमात्रमपि ॥१॥

नानाकुण्ठाग्रस्तानन्र्थकरणे परमदक्षान्
स्वीयाचरितमहत्त्वोत्कीर्तनमात्रे परं लग्नान् ॥२॥
अन्ये कीटपतङ्गाः सर्वे इति ये सदाऽस्थेयुः
धिक् तान् वारं वारं घृणास्पदं ते न सन्देहः ॥४॥
स्वेनोच्चं वर्गं ये दृष्ट्वा बकवद् विनम्राः स्युः
वारं वारं धर्षितपूर्वा अपि तेषु गच्छेयुः ॥३॥
विद्याऽभासाऽधिगमो येषां श्वासेषु धर्ममादध्यात्
स्वसदृशमण्डलमध्यस्थितिरेषां प्रेयसी भूयात् ॥५॥
विष्ठानिर्मितिसदृशा दुर्गन्धानां महागेहाः
धिक्कारयितुं योग्या मनसा वाचा च कर्मणा वापि ॥६॥
अन्तर्बहिश्च मिथ्या भाषणलेखनमथापि वा मिथ्या
मिथ्या येषां जननी मिथ्यैवास्तेऽथ जीवनं तेषाम् ॥७॥
प्रातर्येषां दर्शनमास्ते भोजनविलोपकरम्
सायं तन्निद्राया लोपकमास्ते तु धिग्धिक् तान् ॥८॥
धार्मिकचिह्नाऽक्रान्तान् जपमालानर्तने शूरान्
वाग्व्याहारे देवान् कार्ये रक्षःस्वरूपान् धिक् ॥९॥
अन्येषां श्रमरचना स्वीयेति ख्याप्यते यैर्वा
तान्धनयशःपिशाचान् सर्वेषामस्तु धिङ् नित्यम् ॥१०॥

(५१) किन्तु-शतकम्

(४९१—५९०)

दिव्यचरित्रावलिभिर्मण्डितमेतज्जगत्त्रयं किन्तु
व्यालावलिरपि सर्वं नाशयितुं सोत्सुका लोके ॥१॥

संन्यासिनो निकामं संलग्ना मार्गदर्शने किन्तु
मठनिर्माणकुशलता तेषां गूढं प्रकाशयति ॥२॥
सर्वविधसौख्यजननी भाषा सुमुखाद्विनिर्गता किन्तु
कर्मणि विपरीतत्वं सर्वेषां मारकं भवति ॥३॥
ज्ञानालोको नूनं सन्मार्गे प्रेषयति किन्तु
व्यवहारजटिलतेयं दूरीकुरुतेऽथ सन्मार्गात् ॥४॥
सर्वेऽप्येते संघा शक्तिं विपुलां समाश्रिताः किन्तु
विस्फोटकता तेषां प्रबन्धशूलायिता भवति ॥५॥
आराधना नितान्तं शान्तं कुरुते मनः किन्तु
नानाऽडम्बरमाला व्यथितं सर्वं मनः कुरुते ॥६॥
सर्वोच्चपदप्राप्तिर्जाता सन्तोषदायिनी किन्तु
लालाटिकबाहुल्यं नाटकमसमं समादिशति ॥७॥
आदर्शानां जननी सेयं भारतवसुन्धरा किन्तु
रूढीनामुन्मादो दूरीकर्तुं न शक्योऽस्ति ॥८॥
ग्रन्थानां बाहुल्यं ग्रन्थागारेषु लोक्यते किन्तु
तत्राऽडम्बरमात्रं नानारूपाणि धारयति ॥९॥
'विद्या विनयं यच्छति' विख्यातं सर्वदा किन्तु
विनयाऽभावोत्पत्तौ विद्यैवाऽद्याऽस्ति कारणीभूता ॥१०॥
वार्धक्ये संशान्तं भवति नितान्तं मनः किन्तु
दीर्घाऽभ्यासवशादिव कौटिल्यं नैव विजहाति ॥११॥
कारणसामग्रीयं सिद्धा सर्वार्थदायिनी किन्तु
संसर्गदूषणं तद् घोरं सर्वं विनाशयति ॥१२॥
नानाविधसंस्कारैः सुसंस्कृतोऽयं सुतः किन्तु
जीवति पितरि समस्तं मृतसंस्कारं समीहते तस्य ॥१३॥

ऐक्यं नाम रसायनमसमं बलवर्धकं किन्तु
स्वार्थमयं विषमुल्बणमद्यत्वे तद्विलोपयति ॥१४॥
रामेण नाशितोऽभूत् राक्षसवर्गः परः किन्तु
कलिकालेऽसौ नितरां समुन्नतोऽखर्वगर्वेण ॥१५॥
दूरीकृतदुरितानां संसारे पूज्यता किन्तु
दुरितानां नेतारो न न्यूनास्ते च बलवन्तः ॥१६॥
लक्ष्मी कृपां कृतवती सौख्यं जातं परं किन्तु
रोगाणां बाहुल्यं व्यथयति निर्दयतया चेतः ॥१७॥
निखिले लोके व्याप्तं धवलतरं सद् यशः किन्तु
द्रव्याऽभावो विषमो जीवनमुन्मूलयति वेगात् ॥१८॥
आशालता समन्तात् प्रसरति सौरभमयी किन्तु
प्रतिबन्धकसद्भावः प्रबलतरं शोषणं कुरुते ॥१९॥
दुग्धेन पूरितं तत् पात्रं पुरतो विलोक्यते किन्तु
मृतमक्षिकाविलोकनविक्षेपोऽत्रापि संजातः ॥२०॥
नानाविधकामानां पूर्तिः संजायते किन्तु
अधिकाऽधिकं समीहा तेषां नाशयति संसारम् ॥२१॥
कठिनपरिश्रमकरणे संलग्नास्ते जनाः किन्तु
परिचयहीनाः सन्तो साफल्यं नो लभन्तेऽत्र ॥२२॥
नाना चुनावचर्चाविरोधिकोलाहलः किन्तु
सत्तापक्षे विजयो जनताऽभीष्टो विपरिणमते ॥२३॥
सर्वेऽपि राष्ट्रभाषासमर्थका स्युर्नराः किन्तु
तामिलनाडुविरोधो तस्या ग्रहणेऽभवद्राहुः ॥२४॥
अर्थोन्नतिर्विशिष्टा देशे प्रविलोक्यते किन्तु
सच्चारित्र्यविलोपो नैराश्यं घोरमादिशति ॥२५॥

द्रव्याऽभावे भ्रमणं नैवाभीष्टं भवति किन्तु
मा भूत्क्रयशक्तिः सा नयनसुखं को निवारयति ॥२६॥
जगदीश्वरः समन्ताद् व्याप्तो विद्योतते किन्तु
सघनतरावरणानां पटली तं दूरयति नित्यम् ॥२७॥
सत्याग्रहे समस्ता शक्तिः केन्द्रीकृता किन्तु
विपुलप्रचाररचनासिद्धौ तस्याः फलं प्राप्तम् ॥२८॥
मन्दिरदर्शनवेलासंगमनं सात्त्विकं किन्तु
वक्षोजदर्शनानां रजोमयी तुष्टिरेवेयम् ॥२९॥
दिव्या मूर्तिरियं ते विष्णो, सर्वाघनाशिनी किन्तु
पादत्राणविलोपो[1] नूनं दुःखाकरो जातः ॥३०॥
जनतासेवकभावो नितरां मोदावहः किन्तु
अहमहमिकेयमत्राप्यायाता कलिकला विषमा॥३१॥
सेवाकार्यनियुक्तो वर्गः सुखमेधते किन्तु
मतदाताऽसौ राजा शुष्को दीनश्च हीनश्च ॥३२॥
ध्वनिविस्तारकयन्त्रं वाग्वरदानोपमं किन्तु
अतिचारस्तत्रत्यो कर्णे शूलायितो भवति ॥३३॥
संख्यातीतसफलता गणिता शासनगता किन्तु
दस्यूनामपि गणना संख्यातीतैव संजाता ॥३४॥
धर्मो देशो राष्ट्रमिति शब्दाः प्रोन्नताः किन्तु
धूर्तमुखैर्निर्गमनादेते सर्वे निरर्थका जाताः ॥३५॥
सर्वत्र संविधाने नेतारो व्याकुलाः किन्तु
स्वगृहनिधानं तेषामापणचर्चावहं जातम् ॥३६॥
आद्योपान्तविभेदः सिद्धान्ते विद्यते किन्तु
सत्तासाधनसुषमा तेषामप्यैक्यमातनुते ॥३७॥

---

१. मन्दिरे दर्शनकाले

विषवृक्षोऽपि विवृद्धः स्वयमच्छेद्यो मतः किन्तु
मधुरतमोऽपि सुवृक्षो नाशित एवाऽस्ति चरणेन ॥३८॥
जनतन्त्रात्मकपद्धतिरत्यन्तं निर्मला किन्तु
जनचारित्र्यसुदृढता यावन्नास्ते तदा हानिः ॥३९॥
सर्वं रहस्यभूतं परितोऽप्येतद्विलोक्यते किन्तु
सुस्पष्टं प्रत्यक्षं निखिलञ्चैतद्विपरिणमते ॥४०॥
सर्वा सरणिः सेयं सौरभसारार्चिता किन्तु
सैरिभलीला परितो व्याप्ता नो वाञ्छनीयाऽस्ते ॥४१॥
शतशो निभृतैर्यत्नैः कृष्णधनं सञ्चितं किन्तु
दस्यूनामाक्रमणे शुक्लधनञ्चापि निर्यातम् ॥४२॥
गौडोऽयं द्रविडोऽयं मैथिल इति वाग्मिता किन्तु
हिन्दुरयं वा सम्यङ्नाद्यत्वे द्रष्टुमीहास्ते ॥४३॥
हिन्दूमुस्लिमहरिजनठाकुरकायस्थगणनिका किन्तु
निर्वाचनपरिचर्चा 'मानव' इति नैव जानाति ॥४४॥
सर्वापत्तिनिवारकमन्त्रः संसाधितः किन्तु
सर्वापद्विनिवृत्तौ जीवनवैयर्थ्यमपि जातम् ॥४५॥
भाषणसरणिरियं ते नितरां मोदावहा किन्तु
मादकवस्तुसुयोगस्तत्राऽस्ते कारणं न भवान् ॥४६॥
रामभरतयोश्चरितं कथाप्रवाहे श्रुतं किन्तु
कालेऽस्मिन् श्रीरामो भरतं निर्वासयति दूरे ॥४७॥
नानानाटकरचने कालो व्यतियापितः किन्तु
पर्यन्ते निर्वाहो नो कर्तुं पारितो भवता ॥४८॥
न्याय्यं सर्वं दातुं समीहते सत्वरं किन्तु
तस्य समीहा केवलमास्ते भोजनसमीहैव ॥४९॥

नाट्यं यावज्जीवनमनेन नित्यं कृतं किन्तु
नाट्यं कर्तुं सोऽयं सर्वानन्यान्निषेधयति ॥५०॥
एतावत्तव नाट्यं सफलं संचिन्तये किन्तु
पर्यन्तदर्शकानां का स्थितिरास्ते त एव जानीयुः ॥५१॥
देवीभक्तः पूर्वं कृष्णे भक्तिं प्रदर्शयति किन्तु
यत्राऽस्ते गुडसत्ता पिपीलिकास्तत्र गच्छन्ति ॥५२॥
आसीत्सर्वा शक्तिर्नेयं नूत्ना समागता किन्तु
यावत्तु विनायासं कार्यं सिद्धं न हानिः सा ॥५३॥
कथनीयं तत्कथितं न मनागालोचितं किन्तु
दीनदयालुः सोऽयं तिलस्य तालं विनिर्माति ॥५४॥
विद्वन्! भवदीयेयं वार्ता मोदावहा किन्तु
परमलघीयानंशो ननु तस्याः साधितो भवता ?५५॥
नवनवकाव्यविरचने स्फूर्तिः संजायते किन्तु
मुद्रापणदौरात्म्यादुत्साहो नाशितो भवति ॥५६॥
विपुलधनव्ययकरणे शासनमेतत्सुसक्रियं किन्तु
चिक्कणविधिपरिचर्या मूलं निखिलं विशोषयति ॥५७॥
अध्ययनमननचिन्तनपरायणाः सन्ति ते किन्तु
न्यायालयस्य बाधा तेषां प्रतिबन्धिका भवति ॥५८॥
सा संविधानभाषा स्पष्टा सरला समीपगा किन्तु
न्यायालयवाक्कलहे जटिलं रूपं प्रकाशयति ॥५९॥
नानाऽनुष्ठानैरथ पदमेतत्प्राप्तमपि किन्तु
न्यायालयनिर्णयतः पुनरपि मूषकगतिर्जाता ॥६०॥
गमनागमनैर्नित्यमध्यक्षः सेवितः किन्तु
हा तत्स्थानान्तरणं कार्यात्पूर्वं हि सञ्जातम् ॥६१॥

संस्कृतसुधीसमाजे धनलाभो दृश्यते किन्तु
क्रयशक्तिर्लुप्ता सा सेवाभावोऽपि लुप्तोऽयम् ॥६२॥
संस्कृतसाहित्यमिदं समुज्ज्वलं दृश्यते किन्तु
व्यवहारादतिदूरे स्थितिरेषा तस्य कालेऽस्मिन् ॥६३॥
विद्वांसस्तु निकामं विद्याभ्यासे रताः किन्तु
धूर्ताऽधिपत्यभावस्तापं तेषां समातनुते ॥६४॥
नानासत्काराणां विदुषां स्यात्पात्रता किन्तु
अर्धं तव मम चार्धमित्येषा धूर्तता तत्र ॥६५॥
आदर्शपुरुषगाथा विमलं कुरुते मनः किन्तु
विपरीतेऽस्मिन् काले सा सर्वा मूर्खता कथिता ॥६६॥
कीर्तिः समुज्ज्वलासीदेतद्देशस्य सा किन्तु
वानरगणबाहुल्याद्विलोपिता पूर्णरूपेण ॥६७॥
सा राजनीतिरसमा देशेऽस्मिन् साधिता किन्तु
धनपदहरणं दाराहरणं चाद्यास्ति नीतिरवशिष्टा ॥६८॥
निष्ठावन्तो लोकाः सन्त्येवाद्यापि ते किन्तु
साधनविहीनतायामवसरलाभं प्रतीक्षन्ते ॥६९॥
आकाशवाणिलहरी निनादभाषा समुज्ज्वला किन्तु
विद्युत्संचरबाधा धारां सर्वां विखण्डयति ॥७०॥
चलच्चित्राणामवलिर्दृश्यं काव्यं समद्भुतं किन्तु
सर्वं निषेधकाव्यं विधिरूपेणैव परिणमते ॥७१॥
प्रातःकाले पत्रे[1] जातं विश्वस्य दर्शनं किन्तु
हत्या लुण्ठनकार्यं व्यभिचारश्चेति संक्षेपः ॥७२॥
सस्योत्पत्तिनिमित्तं जलमार्गा निर्मिताः किन्तु
गगने मेघाऽभावे श्रमव्ययो केवलं जातौ ॥७३॥

---

१. समाचारपत्रे

पूगीफले निकामं गणपतिरभ्यर्चितः किन्तु
विघ्नाग्निकाण्डकाले गणपतिरपि तत्र निक्षिप्तः ॥७४॥
नानादर्शनसरणिर्विख्याता तेजसा किन्तु
कलहोऽनुयायिवर्गे गौरवमसमं विलोपयति ॥७५॥
चिन्ताक्लान्ते चित्ते शब्दस्फूर्तिर्न जायते किन्तु
घटनानुभवपिपासा नवतां नूनं विलासयति ॥७६॥
किञ्चित्किञ्चिच्चलनं लक्ष्यं प्रति सम्मतं किन्तु
विपरीततरे मार्गे धावनमपि मारकं भवति ॥७७॥
नित्यमियं जपसरणिः करमालावर्तनं किन्तु
मार्गे तरुणीदर्शनवेलायां विस्मृतिर्जाता ॥७८॥
क्षणिकोऽनुभवोऽप्यतिशयमानन्दं प्रेषयति किन्तु
यावज्जीवनबाधा नेयं साधारणी काचित् ॥७९॥
पञ्चावयवी भाषा शुकवद् रटितैव सा किन्तु
ज्ञाने कियती वृद्धिर्जाता नालोचितं सम्यक् ॥८०॥
संभोगतः समाधिं विनिर्दिशन्त्येव ते किन्तु
पारेसमुद्रमास्ते तेषां स्थितिरन्तिमे काले ॥८१॥
क्षुद्रस्वार्थे पङ्के विनिमग्नास्ते जनाः किन्तु
स्पृश्याऽस्पृश्यविवेके सन्त्येवाद्याऽपि निष्णाताः ॥८२॥
अतिशयगोप्यं पत्रं कार्यालयतः समागतं किन्तु
बहुविधबहुजनसविधे तदिदं पत्रं गतं पूर्वम् ॥८३॥
नयनस्मितमाधुर्यं मोहयतीवान्तरं किन्तु
मधुरा कृपाणधारा सेयं स्याद्वा न जानामि ॥८४॥
लीलायितदेहलतां भवतीं पश्यामि हा किन्तु
स्तब्धीभूय नितान्तं यद्वा तद्वा विचिन्तयामि ननु ॥८५॥

शयनं शान्तं सुखदं मोदकरं वा भवति किन्तु
श्रमसरणिरेव नूनं सुखदं शयनं समादिशति ॥८६॥
नारीणां कोमलता विख्याता सर्वथा किन्तु
वृद्धकुमारीचित्ते कठोरता नैव तुलनार्हा ॥८७॥
बालानामपि बाला एतेषां सुस्थिताः किन्तु
संज्ञाऽद्यापि च तेषां व्यवहारे "ब्रह्मचारी जो" ॥८८॥
एकस्यापि प्रश्नस्याशयमपि वेत्ति नो किन्तु
छात्रोऽयं न न्यूनान्सप्तत्यङ्कान् समीहते नम्रः ॥८९॥
पूर्णेन न्यायेनैवोत्तरपुस्तकपरीक्षणं किन्तु
सर्वेऽनुत्तीर्णा इति परीक्षको नायमतियोग्यः ॥९०॥
उच्चोच्चतमग्रन्थाः कक्षानिर्धारिताः कितु
प्रश्नोत्तरी सुदूरं तान् सर्वान् प्रक्षिपत्यद्य ॥९१॥
अध्यापकैरतितरां शास्त्राण्यालोडितानि वा किन्तु
छात्रविवेकाऽभावे बुद्धौ जीर्णानि जायन्ते ॥९२॥
बालो नवविद्यालयमध्येऽध्येतुं प्रवेशितः किन्तु
व्ययपरिचर्चां श्रुत्वा कापि शिरोवेदना महती ॥९३॥
नव्यं पादत्राणं समीहतेऽयं सुतः किन्तु
तस्य तु पादत्राणं शिरसि पितुर्वेदनाऽभिनवा ॥९४॥
एकस्यां यात्रायां कार्यं बहुधा कृतं किन्तु
मार्गव्ययोऽपि पञ्चस्थानेभ्यः प्राप्त एव ननु ॥९५॥
मार्गव्ययस्तु प्रथमश्रेण्या सम्प्राप्त एव वा किन्तु
'प्लेटफार्मटिकिट' मध्ये सर्वा यात्रा सुसंजाता ॥९६॥
अवसरसहस्रलाभो वित्तीयो जायते किन्तु
पणकानामपि काले प्राणान् दातुं सुसन्नद्धः ॥९७॥

भाषामात्रविभेदे राज्याद् राज्यं विभिद्यते किन्तु
एकं तदिदं राष्ट्रं भावनया ज्ञायते नित्यम् ॥९८॥
तुच्छात्तुच्छतराणामथ संख्या वर्धते किन्तु
गौरवगाथानामिह भाण्डागारः समुल्लसति ॥९९॥
भूभारदूरणार्थं भगवानायात्यसौ किन्तु
भारोऽपि तादृशः स्यात्सोढव्यो यो भवेन्नैव ॥१००॥
मृत्योरनन्तरं स्यात्कापि गतिश्चर्चिता किन्तु
जीवननवसाफल्यं पापेभ्यो नो विदूरयति ॥१०१॥

(५२) आर्या

(५९१—५९६)

आर्या सैषा रम्या यदि प्रसादं करोति तन्मन्ये
भावाऽभावाऽभावः सत्वरमेवाऽत्र जागर्ति ॥१॥
संस्कृतवाक्संरम्भे लोके संक्षीणतामाप्ते
आर्या वाक्यविलासैर्भरतितरां वा मनो हर्षैः ॥२॥
प्रकृतिकुमारीसुषमा सुन्दरभावाभिसाररमणीया
विश्वसमादृतसारा त्रिभुवनजयिनी जयत्यार्या ॥३॥
कासारेषु नितान्तं सन्दृष्टं यत् सुगन्धपरिपूर्णम्
पीतं यच्च नितान्तं पानीयं तेन तुल्यार्या ॥४॥
नाना — नवसंचारैर्नूतनभावार्थसंभारैः
कस्यान्तःकरणे बत विलोभनं नो करोत्यार्या ॥५॥
प्रातः सुषमाकाले कापि नवीना स्मृतिः स्फुरति
रात्रावथ काऽप्यन्या काले काले नवीनाऽर्या ॥६॥

(५३) आशा

(५९७—६११)

आशायाः संसारे सर्वे भावाः प्रपूरिताः सन्तः
कामपि सुषमां दिव्यां जीवनपटले समर्पयन्तितराम् ॥१॥
यद्यप्याशादास्यं सर्वेषां दासतां नयति
आशा यदि दासी स्यान्निखिलो लोकस्तदा दासः ॥२॥
एतादृशभणितीनां मर्मविदः केऽपि ये सन्ति
ते पुरुषार्थोपेताः संसारे वन्दनीयाः स्युः ॥३॥
इतरेषां सर्वेषामाशादेवी सदा वन्द्या
तस्याश्छायायामथ सर्वे ससुखं विराजन्ते ॥४॥
आशा सदा प्रणम्या सा कर्तव्येषु योजयति
तस्यां जागर्तितरां सर्वो लोकः परा संपत् ॥५॥
आशाऽकाशविहीनाः किञ्चिन्नैवाऽत्र जानन्ति
सुखदुःखात्मकविश्वे सैषा प्राणान्विधारयति ॥६॥
परमोच्चशिखरसंस्था ये पुरुषाः सन्ति संसारे
तेऽपि निमेषनिमेषेष्वाशापाशाञ्चिता दृष्टाः ॥७॥
आशा जीवनमूलं सैवाशा जीवनस्य सर्वस्वम्
कियती धरणी पूर्णा सर्वाप्याशासुगन्धेन ॥८॥
दारिद्र्यान्वितकाया नानाऽभावैः परामृष्टाः
आशाचरणनिपतिता जीवनभाषां समालपन्तितराम् ॥९॥
मानापमाननिबिडे प्रातर्मार्गे भ्रमन्ति ये केचित्
सायं सर्वं सुस्थं स्यादित्येवाभिकाङ्क्षन्ति ॥१०॥
ईश्वररूपा चेयं सर्वेषामन्तरे प्रजागर्ति
पशवः स्युर्मनुजा वा सर्वं विश्वं समावृणोत्याशा ॥११॥

दैवी चैषा सततं जागरिता स्वान्तराले चेत्
दर्शयति मार्गमखिलं जीवनसंचारकं पुण्यम् ॥१२॥
मिन्दा याऽथ कृताऽस्ते गीतासु ग्रन्थरत्नेषु
सर्वा साऽथ दुराशारूपाणामेव विज्ञेया ॥१३॥
कादम्बरीप्रकरणे शुकनासस्योपदेशेषु
लक्ष्मीर्विनिन्दिताभून्नो लक्ष्मीः किन्त्वलक्ष्मीः सा ॥१४॥
लक्ष्मीरूपं तदिदं चाशायाः परिणतिर्भवति
यैवाशा परिपूर्णा सैव समासादिता लक्ष्मीः ॥१५॥

(५४) तिथिः

(६१२—६१६)

संवत्सरप्रतिपदा तिथिरत्यन्तं समादृता जयति
सर्वविधमङ्गलानां विधायिका मातृशक्तिरिव ॥१॥
सर्वसमृद्धिमयीयं संवत्सरसौख्यमयरूपा
जयति नितान्तं दिव्या हर्षैर्जीवनमहः समृद्धिमती ॥२॥
मनसस्तन्द्रां नितरां दूरीकुर्याद्विधेयाच्च
सर्वसमृद्धि नितरां सर्वे तुष्टा भवन्तु विनयेन ॥३॥
यद्वा गतं तु सर्वं पुनरागच्छेत्तदेव निकटतरम्
नागतमद्यावधि यत् तद्वै भूयात् परेश्वरीकृपया ॥४॥
अवरुद्धं यत्कार्यं परिपूर्णं सुप्रसन्नतया
सर्वं तद्बोभूयान्मा भूयात् कापि वा हानिः ॥५॥

राजस्थानम्

(प्रणेता—डा० रमाकान्त शुक्लः)

यद्विदुषां वीराणां धनिनां श्रमिकाणां च निधानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(१)

शिलादेवि - गलताजी - बालाजी - श्रीनाथद्वारैः ।
एकलिङ्ग - पुष्कर - कौलायत - करणी - रामद्वारैः ॥
रामधाम - रणछोड़ - साँभरा - सर्वेश्वर - जयकारैः ।
श्रीद्वारकाधीश - लोहार्गल - प्रभृतितीर्थपरिवारैः ॥
त्रिविधतापतप्तेभ्यो नित्यं यद्ददाति शमदानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(२)

बप्पारावल - राणासाँगा - गोरा - बादल - वीरैः ।
सिंहप्रताप - सदृशरणवीरैः - सन्धापालनधीरैः ॥
दुर्गावती - पद्मिनी - हाड़ीरानी - विश्रुतवृत्तैः ।
अङ्गीकृतसुव्रतजौहरनारीणां दिव्यसुचरितैः ॥
यद्विदधाति जगज्जनतायाश्चारित्रस्योत्थानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(३)

डिङ्गल-पिङ्गल - वयणसगाई - काष्ठपुत्तलीनृत्यैः ।
रत्नपरीक्षा - प्रस्तरखण्डन - ढोला-मारू - वृत्तैः ॥
अणुविस्फोटपरीक्षण - पुस्तकभाण्डाराणुविकासैः ।
आर्हत - वैदिक - धर्मप्रचारैर्विविधकलानां हासैः ॥
यद्ददाति तैस्तैश्च विशेषैर्निजवैभवप्रमाणम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(४)

तप्ते यन्मरुदेशे मधुरा 'मत्तीराः' रसपूर्णाः ।
यस्य 'राबड़ी' लोकप्रसिद्धा आस्वादैरापूर्णा ।।
यन्मरुभाषाबद्धवाङ्मयं शोधकमोदविधायि ।
दुग्धसारशष्कुलीसेवनं यस्य च तृप्तिविधायि ।।
यन्मालिन्या बीकानेर्यां सिद्धं तुलाविधानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ।।

(५)

'अस्मि प्रेमप्रमत्ताहं मम पीडां वद न कश्चित्' ।
'गिरिधरपुरतो नर्तिष्यामि रोत्स्यति मां नहि कश्चित्' ।।
'मम तु केवलं गिरिधरगोपो नान्यः कोऽपि जगत्याम्' ।
इत्येवं वचसा मनसा कर्मणा रताया भक्त्याम् ।।
अमृतं कृत्वा विषं पिबन्त्या यन्मीरायाः स्थानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ।।

(६)

घघरा - कञ्चुक, बिन्दुशाटिका-गोटावृतिवसनानाम् ।
कटक-बोरला-नूपुर-नथली - वलयाङ्गद - रशनानाम् ।।
टड्ड - बाटे - बँगड़ी - कंगन - चूड़ा - हथफूलानाम् ।
टीका-झुमका-हँसलो - टिकली-कटिका-रमझोलानाम् ।।
विच्छित्त्या भरितं यत्तनुते चारुत्वस्य वितानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ।।

(७)

कज्जलकलितललितनयनानां मँहदीरक्तकराणाम्
धृतविविधाभषणवसनानां लोकरीतिपरकाणाम् ॥
दूर्वालङ्कृतकरकमलानामचनगीतपराणाम् ।
वालानां सौभाग्यवतीनां धृतमस्तककलशानाम् ॥
उपचारैर्विविधैर्विलसति यस्मिन् गणगौरविधानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(८)

मुरकी - कमरी - पगड़ी - धोती - धौड़ीपादत्राणैः ।
लसिता यस्य जना शोभन्ते नित्यं श्मश्रूत्थानैः ॥
अश्मखण्डने मूर्तिविरचने शोभनगृहनिर्माणे ।
यस्य श्रमिका नित्यं निरता मार्गाणां च विधान ॥
प्रकृतिकोपदलिता अपि नित्यं विदधति देशोत्थानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(९)

गिरिधरशर्मचतुर्वेदोपमविद्वद्रत्नैर्लसितम् ।
मञ्जुनाथमथुरानाथोपमकविवरवैभवलसितम् ॥
वाँकीदास - सूर्यमल्लागरचन्दयशोभिर्लसितम् ।
काँकर - झावरमल्ल - सबा-रांगेय - गुलेरी-लसितम् ॥
विद्याधरमहितं यद् धत्ते ज्ञानमथो विज्ञानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(१०)

हल्दीघाटी - चेतकशौर्यं स्मारं स्मारं यस्य ।
अर्बुदलोकोत्तरसौन्दर्यं दर्शं दर्शं यस्य ॥
अगणितवीराणां कलगाथाः श्रावं श्रावं यस्य ।
अभिनवकुल्याजलसञ्चारं लोकं लोकं यस्य ॥
अवसन्नस्यापि जनस्य मनो लभतेऽद्भुतमुत्थानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(११)

क्षणे क्षणे या नवतां धत्त कण कणे कलगानम् ।
गृहे गृहे या कमलां धत्ते पदे पदे सम्मानम् ॥
दिनं दिनं या पर्व विधत्ते जनं जनं सोल्लासम् ।
नयने नयने लीलां धत्तेऽधरेऽधरे च सुहासम् ॥
एवंभूता पाटलनगरी यस्यानन्दनिधानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(१२)

पवनप्रासादेन[1] वैद्यविदुषां नैपुण्यविलासैः ।
चन्द्रप्रतोल्या[2] चतुष्पथैरथ रम्योपवनविलासैः ॥
चित्रविचित्रनामपट्टैरापणिकोदारसुमार्गैः ।
आगन्तूनां वित्तहराणामापणिकानां भागैः ॥
लसिता यज्जयपुरी विधत्ते वृद्धं जनं युवानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

१. हवामहल २. चाँदपोल

(१३)

घर्मच्छायापीतश्यामा क्वाप्यरावली रम्या ।
क्वापि कुरङ्गाली चलचरणा रोमंथिनी विलोक्या ।।
क्रमेलकानां क्वचिदपि मानवकार्यार्थं सहयोगः ।
दृश्यः क्वचिदपि गोण्डवणानां रूपस्वरसंयोगः ।।
यस्मिन् दृश्यं क्वापि नृत्यगीतानां मधुरविधानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ।।

(१४)

दिलवाड़ा-गोविन्द-विहारी-मन्दिराणि दिव्यानि ।
राजसमन्दं बालसमन्दं स्थानान्यथ भव्यानि ।।
आमेरे बीकानेरे जैसलमेरे दुर्गाणि ।
जोधपुरोदयपुरामेर - जल - झील - काच - महलानि ।।
श्वेतरक्तपाषाणानथ धत्ते यत्ताम्रनिधानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ।।

(१५)

अर्थिकामपूरणं विधत्ते यत्र गरीबनिवाजः[१] ।
भूमण्डले समस्ते व्याप्तो यद्व्यापारिसमाजः ।।
यस्य श्रमिका जगत्प्रसिद्धाः सत्वरकर्मविधाने ।
यस्य च धनिका जगत्प्रसिद्धा धर्मार्थं धनदाने ।।
रणाङ्गणे यद्वीरस्तनुते ह्यनुपमशौर्यवितानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ।।

---

१. अजमेरस्थितः ख्वाजा

(१६)

असमयवृष्टिं दुर्भिक्षं वा भूमेरूषरतां वा ।
वह्निवातभूकम्पावर्षणजनितानुपद्रवान् वा ॥
पेयजलाभावं पशुचाराभावं वस्त्राभावम् ।
समुचितशिक्षावसराभावं वृत्तिनिश्चयाभावम् ॥
जेतुं यतते श्रमबलतो यन्नित्योत्साहनिधानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(१७)

यद्वर्णयितुं यज्ज्ञापयितुं शब्दास्तिष्ठन्त्यल्पाः ।
यस्य द्रष्टुं वैभवमखिलं ह्यपेक्षिता वै कल्पाः ॥
यस्य झील - वापिका - सागरान् को वा मातुं शक्तः ?
विजयस्तम्भं यस्य चोन्नतं को विस्मर्तुं शक्तः ?
नानादेशसमायातानां विहगानां यत्स्थानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

देववाणी-संस्कृतम्

(श्री लक्ष्मण प्रसाद गौतमः, भरतपुर-चितवन-नेपालस्थः)

(१)

विना संस्कृतं शोभते नैव शिक्षा, विना संस्कृतं नैव रम्या सभा च ।
विना संस्कृतं चारुता तत्र का स्याद्यथा भामिनी भूषणैर्वर्जिता स्यात् ॥

(२)

सदा रक्षिका संस्कृतेः रक्षिता या, नवीनां सदा चेतनां सन्ददाना ।
सदा भूतले भातु सा देवभाषा, सदा पूरयेत् सर्वसंसारकामान् ॥

(३)

इयं देवभाषा मृता नापि वृद्धा, वृथैवाज्ञलोकैर्मृतोदीरितेयम् ।
इयं नूतनोल्लासदात्री समेषाम् सदा भूतले भातु मे देवभाषा ॥

(४)

पुराणैश्च वेदैश्च पीयूषकाव्यैस्तथा नाटकैः सर्वसाहित्यरत्नैः ॥
सदाऽलङ्कृता भातु मे देवभाषा, सदा विस्तृता ह्येधतां राष्ट्रभाषा ॥

(५)

इयं देवभाषा सुरम्या सुगूढा, इयं देववाणी सदा मोददात्री ।
इयं शान्तिसंस्थापने सुष्ठु दक्षा, सदा भूतले भातु सा देवभाषा ॥

(६)

इयं पुण्यदा कीर्तिदा बुद्धिदा च, इयं सौख्यदाऽऽनन्ददा वित्तदा च ।
इयं भूतले मानवं देवकर्त्री, सदा भातु मे संस्कृतं देवभाषा ॥

(७)

सदा पठ्यतां पाठ्यतां देववाणी, सदा गीयतां पीयतां देववाणी ।
सदा भूतले भात्वियं देववाणी, सदाऽऽह्लादयेन्मानसं संप्रविष्टा ॥

(८)

अहा संस्कृतं संस्कृतं देववाणी, सदा राजते भारते पुण्यभूमौ ॥
यथा ह्यम्बरे भाति सोमार्करश्मिस्तथा भूतले भातु मे देववाणी ॥

अर्वाचीनसंस्कृते समीक्षार्थं प्राप्तानि पुस्तकानि

१. वाणी-विलसितम् प्रधानसम्पादकः : डा० गयाचरण त्रिपाठी। सम्पादकौ : डा किशोरनाथ झा, डा० जगन्नाथ पाठकः। प्रकाशक: गंगानाथ झा-केन्द्रीयसंस्कृतविद्यापीठम्, मोतीलालनेहरूपार्क, प्रयागः-२।

२. रतिमन्मथनाटकम् (जगन्नाथपण्डितविरचितम्) : प्रधान सम्पादकः डा० गयाचरण त्रिपाठी। सम्पादक : डा० जगन्नाथपाठकः। प्रकाशकः : गङ्गानाथझा-केन्द्रीयसंस्कृतविद्यापीठम्, चन्द्रशेखर आजाद पार्क, प्रयागः २११००२।

३. श्रीकृष्णलीलातरङ्गिणी (वेलङ्कोण्ड-रामरायकवि-विरचिता) सम्पादकः डा० प्र० ग० लाले। प्रकाशकः उस्मानिया विश्वविद्यालयः, हैद्राबाद।

४. एकावली (विद्याधरकृता, मल्लिनाथकृत 'तरल' -समन्विता) सम्पादकः डा० पुल्लेल रामचन्द्रुडु। प्रकाशकः संस्कृत-विभागः, उस्मानियाँ विश्व-विद्यालयः, हैदराबादः।

५-७. संस्कृत-शिशु-गीतम्, संस्कृति-सुधा (पद्यकाव्यम्), ईशस्तोत्रम्। प्रणेताः डा० सुभाष वेदालङ्कारः। प्रकाशकः अलङ्कार प्रकाशन, जयपुर-४

८. संस्कृतगीताञ्जलिः प्रणेता : डा० सुभाष वेदालङ्कारः। प्रकाशकः मनीषा प्रकाशन, जयपुर-३०२००४।

९. चुटकुला-शतकम् : लेखकः आचार्य रामदयालुः। प्रकाशकः संस्कृत-सेवा-संस्थानम्, ३२३० लाल दरवाजा, बाजार सीताराम, दिल्ली-६।

१०. साहित्यसुधालहरी (निबन्ध-समुच्चयः) लेखकः तट्टानरसिंहाचार्यः। प्रकाशकः कल्पवल्ली पब्लिकेशन्स, गूडूरु, कृष्णा जिला, पिन-५२११४६ (आन्ध्रप्रदेशः)।

११. चन्द्रहासचरितम् : संस्कृतअनुवादकर्ता तट्टानरसिंहाचार्य। प्रकाशकः कल्पवल्लीपब्लिकेशन्स, गूडूरु, (आन्ध्र प्रदेशः)।

१२. श्रीमन्दाक्रान्तास्तोत्रम् (श्रीभगवतीस्तवः) प्रणेताः श्रीमदमृतवाग्भवः। हिन्दीअनुवादकारः डा०बलजिन्नाथपण्डितः। प्राप्ति-स्थानम् : डा० भवानीशंकर त्रिवेदी, जी-१८, दिलशादकालोनी, शाहदरा, दिल्ली।

—सम्पादकः

देववाणी-परिषद्वार्ता

देववाणी-परिषदः षष्ठं वार्षिकाधिवेशनं सम्पन्नम्

देववाणी-परिषदः पञ्चदिवसाभिव्यापि षष्ठं वार्षिकमधिवेशनं २१-१-१९८३ तमेशवीयायां तिथौ दिल्लीविश्वविद्यालयस्य टैगौर-सभाभवने समारब्धं भूत्वा २५-१-१९८३ तमे दिनाङ्के सन्ध्यायां 'श्रीराम सेण्टर फार आर्ट एण्ड कल्चर, नयी दिल्ली-११०००१' इत्येतदाख्ये प्रेक्षागृहे सम्पन्नतामगमत् ।

समारोहस्योद्घाटनं भारतसर्वकारस्य शिक्षामन्त्रालये संस्कृतोप-परामर्शदाता डा० सी० आर० स्वामिनाथन्महाभागो व्यदधात् । उद्घाटनसमारोहे राष्ट्रियसंस्कृतसंस्थानस्य निदेशकः डॉ० रामकरण-शर्ममहाभागो विशिष्टातिथित्वेन समुपातिष्ठत् । वार्षिकविवरणं प्रस्तुवता देववाणी - परिषन्महासचिवेन डा० रमाकान्त शुक्लेन सूचितं यत्परिषद् तस्मै विदुषे **'पण्डितराजजगन्नाथ-पुरस्कारं'** समर्पयिष्यति यः संस्कृतग्रन्थस्य फ़ारसीभाषायाम् अरवी-भाषायां वा अरवी-फारसी-ग्रन्थस्य च संस्कृतभाषायां सफलमनुवाद विधास्यति । परिषदा संस्कृताशुलिपेर्विकासार्थं योजनैका दिल्ली प्रशासनद्वारा भारतसर्वकारस्य शिक्षामन्त्रालयेऽनुदानार्थं प्रेषिता । महासचिवेनेदमपि सूचितं यद् उत्तरप्रदेशसंस्कृताकादम्या १९८१ तमेशवीयेऽब्दे परिषदा प्रकाशिताश्चत्वारो ग्रन्थाः पुरस्कृता ।

परिषदोऽध्यक्षेण डा० कृष्णकान्तशुक्लमहाभागेन स्वाध्यक्षीये भाषणे दिल्ल्यां संस्कृताकादम्याः स्थापनाया आवश्यकता रेखाङ्किता । तेन विश्वविद्यालयस्तरे संस्कृतविभागेषु संस्कृतमाध्यमस्य विलोपे चिन्ता व्यक्ता, संस्कृतसंस्थानां योजनानां पारस्परिकसमायोजनस्य आवश्यकता च सविशेषं प्रतिपादिता । डा० शुक्लेन भारतसर्वकारस्य शिक्षामन्त्रालयाय, लेखकेभ्यः संस्कृतग्रन्थप्रकाशनार्थं दीयमानस्यानु-दानस्य राशिं शतप्रतिशतं कर्तुमग्रिमरूपेण च दातुं, परामर्शोऽपि दत्तः ।

उद्घाटनसमारोहानन्तरं 'संस्कृत-समूह-गान प्रतियोगिता' प्राथमिक-माध्यमिक-वरिष्ठमाध्यमिक-उपाधिस्तरेष्वायोज्यत यत्र छात्रैश्छात्राभिश्च राष्ट्रभक्तिपरकाणां गीतानां ससङ्गीतं प्रस्तुतिः कृता। प्राथमिकस्तरे 'उत्तमनगरनयीदिल्लीस्थकमलपब्लिकस्कूलेन', माध्यमिके स्तरे 'हरिनगरनयीदिल्लीस्थ—महाशयचूनीलालसरस्वतीबालमन्दिरेण', वरिष्ठमाध्यमिके स्तरे 'अरविन्दमार्गनयीदिल्लीस्थमदर्स इन्टरनेशनल स्कूलेन' उपाधिस्तरे च 'रमेशनगर-नयीदिल्लीस्थ मोतीनाथ संस्कृत-महाविद्यालयेन' प्रथमं स्थानं लब्धम् ।

२२-१-१९८३ तारिकायां टैगौर-सभाभवने 'सद्यःपद्यपाठप्रतियोगिता' आयोज्यत। दिल्ल्यामियं प्रतियोगिता अनायोजितपूर्वा आसीत्। प्रतियोगिनां वाचनशक्तेः श्लोकपठनशैल्याश्च परीक्षणमस्यां प्रतियोगितायां जातम् । उपाधिकक्षास्तरीयैः प्रतियोगिभिः मिनटद्वयपूर्वं प्राप्तानां संस्कृतपद्यानां वृत्तप्रकृत्यनुसारं पाठोऽस्यां प्रतियोगितायां प्रस्तुतः। अस्यां प्रतियोगितायां दिल्लीस्थानां श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठ - मोतीनाथसंस्कृतमहाविद्यालय - विश्वनाथसंस्कृतमहाविद्यालय-इन्द्रप्रस्थमहिला-कालेज-सेण्टस्टीफेन्सकालेजानां छात्राः समुपातिष्ठन् ।

२२-१-१९८३ तारिकायामेव 'अक्षरश्लोकम्' इत्येतन्नामधेया स्पर्द्धाऽप्यायोजिता जाता यत्र हंसराजकालेजस्य प्रज्ञाचक्षुश्छात्रः श्री परमहंसः प्रथमं स्थानमवाप ।

२३-१-१९८३ तारिकायां 'टैगौर - सभागारे' राष्ट्रियसंस्कृतसंस्थान निदेशक-डा॰ रामकरणशर्ममहाभागानामध्यक्षतायाम् अखिलभारतीयं संस्कृत-कविसम्मेलनमायोजितं वभूव यत्र पं॰ विष्णुकान्त शुक्ल-डा॰हरीराम आचार्य-पं॰ ओगेटिपरीक्षित शर्म-डा॰ वासुदेवकृष्णचतुर्वेद-पं॰ रघुनाथप्रसादचतुर्वेद-डा॰ राजदेव मिश्र-डा॰ उमाकान्त शुक्ल-डा॰ सुधाकराचार्य त्रिपाठि-श्री ओमप्रकाशत्रिवेदि-श्री इच्छाराम द्विवेदि-डा॰ रुद्रदेव त्रिपाठि-डा॰ हर्षनाथ मिश्र-डा॰ सत्यपाल नारङ्ग-श्री चन्द्रप्रकाश शर्म-श्री रामेश्वराचार्यमहाभागैः सरसाः कविताः प्रस्तुताः । अस्मिन्नवसरे विशिष्टातिथिरूपेण

सम्प्राप्तैः जबलपुरविश्वविद्यालय प्राक्तनकुलपतिभिः साहित्यवाचस्पतिडा०प्रभुदयालुअग्निहोत्रीमहाभागैः डा० रमाकान्तशुक्लरचितस्य 'जय भारतभूमे !' इत्येतन्नामधेयस्य संस्कृतकाव्यस्य प्रकाशनोद्घाटनम् (विमोचनम्) अपि कृतम् ।

२४-१-१९८३ तारिकायाम् 'आर-६, वाणी विहार, नयी दिल्ली-११००५९' इति स्थाने 'आचार्यश्रीब्रह्मानन्दशुक्लस्मारकव्याख्यानमालायाः' अन्तर्गतं 'संस्कृत-साहित्यस्य चतुर्वर्गसाधकता' इति विषयमवलम्ब्य डा० प्रभुदयालु अग्निहोत्रीमहाभागैः वैदुष्यपूर्णं सरसं सारगर्भितञ्च व्याख्यानम् कृतम् ।

२५-१-१९८३ तारिकायां राष्ट्रीयसंग्रहालयसभागारे समापनगोष्ठी आयोजिता बभूव यत्र डा० सी० आर० स्वामिनाथमहाभागैः पुरस्कारवितरणं कृतम् ।

२५-१-१९८३ तारिकायां ६.३० वादनवेलायां सायंकाले 'श्रीराम कला संस्कृति केन्द्रे' डा० रमाकान्तशुक्ललिखितं पण्डितराजजगन्नाथजीवनपरकं 'पंण्डितराजीयम्' इतिनामधेयं संस्कृतनाटकं श्रीमत्याः कमलिनीदत्तमहाभागायाः निर्देशने प्रस्तूयत यत्र कु०शशिबाला गुप्ता कु० भवानी अय्यर-कु० भारती भाटिया-श्री विश्वनाथशर्म-श्रीबलदेवानन्दसागर-श्रीप्रमोददुआ-श्रीरमणकुमारशर्म-प्रभृतिभिः कलाकारैः विविधा भूमिकाः निर्व्यूढाः । अस्य नाट्कस्य संगीतनिर्देशनं श्री छोटेलालमहाभागेन कृतम् । अस्मिन् नाट्यसमारोहे विशिष्टातिथिरूपेण भारतसर्वकारशिक्षासंस्कृतिमन्त्रालये अपरसचिवः डा० कपिला वात्स्यायनमहाभागा समुपातिष्ठत् । अस्मिन्नवसरे भारतीयबीजनिगमाध्यक्षेण श्री के० पी० ए० मेनन महाभागेन 'स्मारिका' अपि समुद्घाटिता । नाटकप्रेक्षावसाने डा० रामकरणशर्ममहाभागैः राष्ट्रिय संस्कृतसंस्थानतः नाट्यकलाकाराणां प्रोत्साहनार्थमेकसहस्ररूप्यकात्मकराशेर्दानस्य घोषणा कृता ।

२४-१-१९८३ तारिकायां परिषदो निर्वाचनमण्डलसमज्यायाम् आचार्यरमेशचन्द्रशुक्लमहाभागाः आगामिवार्षिकाधिवेशनं यावदध्यक्षत्वेन निर्वाचिता अभूवन् ।

राष्ट्रपतिपुरस्कृतसंस्कृतविद्वदभिनन्दनं, 'श्रीबदरीशसुप्रभात'स्य प्रकाशनोद्घाटनम्, संस्कृतनाट्यकलाकारसत्कारश्च

देववाणी-परिषदा 'दि शंकर एकेडमी फार संस्कृत कल्चर एण्ड क्लासिकल आर्ट्स'—'शङ्करविद्याकेन्द्र'—'इन्द्रप्रस्थीयसंस्कृतपरिषत्'-'संस्कृतसेवासंस्थान' - संस्थानां सहयोगेन २-४-१९८३ तारिकायां नयीदिल्लीस्थे 'भारतीय-विद्या-भवने' समुत्सव एक आयोज्यत यत्र भारतराष्ट्रपतिपुरस्कृतानां संस्कृतविदुषामभिनन्दनम्, डा० सी० आर० स्वामिनाथप्रणीतस्य पण्डितरघुनाथशर्मव्याख्यातस्य देववाणी-परिषत्प्रकाशितस्य च 'श्रीबदरीशसुप्रभातम्' इत्याख्यस्य स्तोत्रकाव्यस्य प्रकाशनोद्घाटनं, देववाणीपरिषदः षष्ठवार्षिकाधिवेशनावसरे २५-१-१९८३ तारिकायां प्रस्तुतस्य 'पण्डितराजीयम्' इति नामधेयस्य संस्कृतनाटकस्य कलाकाराणां सत्कारश्च समनुष्ठीयन्त ।

उत्सवस्यास्य मुख्यातिथिपदं भारतीयसर्वोच्चन्यायालयन्याय-मूर्तयः श्री रङ्गनाथमिश्रमहाभागाः अध्यक्षपदं च आइ० सी० एस० सेवानिवृत्ताः श्री सी० एस० रामचन्द्रन्-महाभागाः अलञ्चक्रुः ।

विशिष्टातिथिरूपण शिक्षासंस्कृतिमंत्रालयस्य अपरसचिवपद-मधितिष्ठन्ती डा० कपिलावात्स्यायनमहाभागा समुपस्थिता ।

उत्सवेऽस्मिन् डा० सी० आर० स्वामिनाथ-विद्यावाचस्पति श्री अमीरचन्द्रशास्त्रि-आचार्य रमेशचन्द्रशुक्ल-श्री के० गणेशन्-श्री एन० के० शेषन्-आचार्य रामदयालु शास्त्रिभिरभिभाषितम् । अभिनन्दित-विदुषां पक्षतः श्रीजगदीशशर्ममहाभागैरभिभाषितम्, श्रीभालचन्द्र-शास्त्रीकरम्बेलकरमहाभागैः वेदमन्त्रपाठः कृतः । इतः पूर्वमाचार्य-महादेवशर्मणां शिष्यैः सामूहिकवेदपाठोऽनुष्ठीयत ।

अस्मिन्नवसरे पुण्यपत्तनाद् अभ्यागतेन 'शारदा'-सम्पादकेन पण्डितवसन्तगाडगीलमहोदयेन एतादृशायोजने हर्षोऽभिव्यक्तः ।

(प्रस्तोत्री—रमा शुक्ला)

देववाणी-परिषदः षष्ठवार्षिकाधिवेशनस्य उद्घाटनसमारोहः (वामतो दक्षिणमासीनाः) उद्घाटनकर्ता डा० सी० आर० स्वामिनाथन् भारतसर्वकारस्य शिक्षामन्त्रालये उपशिक्षापरामर्शदाता (संस्कृते), विशिष्टातिथिः डा रामकरण शर्मा, राष्ट्रियसंस्कृतसंस्थाननिदेशकः, डा० कृष्णकान्त शुक्लः परिषदध्यक्षः, डा० रमाकान्त शुक्लः परिषन्महासचिवः, (सुरभारती-वन्दनां कुर्वन्ती स्थिता) श्रीमती सरोज साहनी (२१-१-१९८३)।



'पण्डित

'पण्डितराजीयम्' : लवङ्ग्याः सखी (कु० भारता भाटिया) रोगग्रस्तां लवङ्ग परिचरति । पण्डितराजः (बलदेवानन्दसागरः) चिन्ताग्रस्तस्तिष्ठति (२५-१.८३

'पण्डितराजीय'स्य कलाकाराणां सत्कारः मुख्यातिथिः सर्वोच्चन्यायालय-न्यायमूर्तिः श्री रङ्गनाथमिश्रमहाभागः नाटकनिर्देशिकां श्रीमतीं कमलिनीदत्त-महाभागां सत्करोति (२-४-८३) ।



राष्ट्रपतिपुरस्कृतसंस्कृतविदुषामभिनन्दनम् : मुख्यातिथिः न्यायमूर्तिः श्रीरङ्गनाथमिश्रः 'राधाकृष्णरसायन'कर्तारं श्रीओट्टूरउण्णिनम्बदिरीपादमुत्तरीयार्पणेन सम्मानयति (दक्षिणतः) देववाणीपरिषन्महासचिवः डा० रमाकान्त शुक्लः। (२-४-१९८३)

समारोहाध्यक्षः श्री सी० एस० रामचन्द्रन् श्री भालचन्द्र शास्त्री वामन



'श्रीबदरीशसुप्रभात'स्य ग्रन्थप्रकाशनोत्सवे (वामतो दक्षिणम्) मुख्यातिथिः सर्वोच्चन्यायालयन्यायमूर्तिश्रीरङ्गनाथमिश्रः प्रकाशिते ग्रन्थे हस्ताक्षरं कुर्वन्, समारोहाध्यक्षः श्री सी० एम० रामचन्द्रन्, देववाणी-परिषदो महासचिवः डा०ः रमाकान्त शुक्लश्च (२-४-१९८३)



मुख्यातिथिः लेखकाय डा० सी० आर० स्वामिनाथाय हस्ताक्षरीकृतं 'श्रीबदरीशसुप्रभातम्'समर्पयति (२-४-१९८३)।

अर्वाचीनसंस्कृतम्

(R. N. 34554/79)

❀

१. प्रकाशन का स्थान — नयी दिल्ली

२. प्रकाशन की आवधिकता — त्रैमासिक

३. मुद्रक तथा प्रकाशक का
नाम, राष्ट्रीयता तथा पता — डा० रमाकान्त शुक्ल
(देववाणी-परिषद्, दिल्ली-कृते)
भारतीय
६, वाणी-विहार, नई दिल्ली-११००५९

४. सम्पादक का नाम,
राष्ट्रीयता तथा पता — डा० रमाकान्त शुक्ल
भारतीय
६, वाणी-विहार, नई दिल्ली-११००५९

५. उन व्यक्तियों के नाम और पता
जो इस पत्रिका के मालिक या
साझेदार हैं अथवा जो इसकी
सारी पूँजी के एक प्रतिशत से
अधिक के हिस्सेदार हैं। : देववाणी-परिषद्, दिल्ली
६, वाणी-विहार, नयी दिल्ली-११००५९

मैं, डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद् दिल्ली
प्रकाशक

देववाणी-परिषदा प्रकाशिताः ग्रन्थाः

१.	अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (प्रथमखण्डः) (सं० : डा० रमाकान्तशुक्लः)	रु० १५.००
२.	,, ,, ,, (द्वितीयखण्डः)	रु० ३०.००
३.	,, ,, ,, (तृतीयखण्डः)	रु० ३०.००
४.	कर्णभूषणम् (डा० सी० आर० स्वामिनाथन्)	रु० ५.००
५.	भाति मे भारतम् (डा० रमाकान्तशुक्लः)	रु० ४०.००
६.	श्रीकृष्णचरितम् (डा० रमेशचन्द्रशुक्लः)	रु० ३०.००
७.	सुगमरामायणम् ,, ,,	रु० ३५.००
८.	हरविजयस्य साहित्यिकमध्ययनम् (डा० कृष्णकान्तशुक्लः)	रु० ६०.००
९.	श्रीमदप्पयदीक्षितचरितम् (डा० हरिनारायणदीक्षितः)	रु० २०.००
१०.	भारतस्वातन्त्र्यसंग्रामेतिहासः (डा० रमेशचन्द्र शुक्लः)	रु० ३५.००
११.	सदाशयसमुच्चयः (पं०टी०वी० परमेश्वर अय्यरः)	रु० १५.००
१२.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
१३.	मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा)	रु० २०.००
१४.	रघुवंश : एक विश्लेषण (,, ,,)	रु० २०.००
१५.	अभिज्ञानशाकुन्तल : एक विश्लेषण (,,)	रु० २०.००
१६.	कालिदास की कला और संस्कृति (भाग २) (लेखक : डा० देवीदत्त शर्मा)	रु० ६०.००
१७.	जय भारतभूमे ! (डा० रमाकान्तशुक्लः)	रु० ३०.००
१८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्डः) (सं० : डा० रमाकान्त शुक्लः)	रु० ३०.००
१९.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
२०.	साधारणीकरण और समानान्तर चिन्तन की पूर्वपीठिका (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
२१.	अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्र शुक्लः)	रु० २०.००
२२.	भट्टनायक और अभिनवगुप्त की साधारणीकरण-विषयक अवधारणा (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
२३.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००

प्राप्तिस्थानम्

'देववाणी-परिषद्, दिल्ली', ६ वाणी-विहारः, नयी दिल्ली-११००५९

(दूरभाष . ५५३२०६)

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)
पञ्चमवर्षे तृतीयोऽङ्कः
१५ जुलाई १९८३

प्रधानसम्पादकः
डा० रमाकान्तशुक्लः
एम० ए०, पीएच० डी०, साहित्याचार्यः
सांख्ययोगाचार्यः

प्रकाशिका
देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९
(भारतम्)

परामर्शदातृमण्डलम्

(१) डा० रामसुरेशपाण्डेयः (२) डा० कृष्णकान्त शुक्लः
(३) डा० उमाकान्त शुक्लः (४) डा० सुलेख चन्द्र शर्मा

विषय-सूची

विषयः	लेखकः	पृष्ठाङ्कः
१ सम्पादकीयम्	सम्पादकः	१५५-१५८
२. स्कूक्तिसप्तशती (समस्यापूर्त्तय, नानाच्छन्दांसि, गीतानि)	डा० शिवदत्तशर्मा चतुर्वेदी प्रवक्ता, साहित्य-विभागः, प्राच्यविद्यासङ्कायः, काशी हिन्दू विश्वविद्यालयः, वाराणसी	१५९-१८८
३. पूर्णकुम्भः (ललितनिबन्ध संग्रहः)	पं० विष्णुकान्तशुक्लः हिन्दीविभागाध्यक्षः, जे०वी०जैन पोस्ट ग्रेजुएट कालेजः, सहारनपुरम् (उ० प्र०)	१८९-२०६
४. ग्रन्थसमीक्षणम्		२४७-२५०
५. देववाणी-परिषद्वार्ता	रमा शुक्ला	२५०

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् रु० 20-00 (भारते)
पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription
Rs. 20.00 (In India)
5 Dollars or 2 Pounds (Abroad)

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नई दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहार, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (५/३) । प्रधानसम्पादकः—डा० रमाकान्त शुक्लः । प्रकाशनतिथिः १५-७-१९८३ ।

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य पञ्चमवर्षे तृतीयोऽङ्कः पाठकानां करकमलेषु समर्प्यते। अस्मिन्नङ्के डा० शिवदत्तशर्म चतुर्वेदप्रणीतायाः 'स्फूर्तिसप्तशत्याः' अवशिष्टभागः, साहित्याचार्य - साहित्यरत्न - एम० ए० (हिन्दी-संस्कृत) प्रभृत्युपाधिभूषितेन सहारनपुरस्थ जे० वी० जैन (स्नातकोत्तर) कालेजे हिन्दी-विभागाध्यक्षेण किञ्च देववाणी-परिषदः प्रतिष्ठितसदस्येन पण्डित-विष्णुकान्तशुक्लेन विरचितो ललितनिबन्धसङ्ग्रहः 'पूर्णकुम्भः', ग्रन्थ-समीक्षणं, देववाणी-परिषद्वार्ता च प्रकाश्यन्ते।

डा०शिवदत्तचतुर्वेदमहाभागस्य परिचयोऽस्माभिर्गताङ्के प्रदत्त आसीत्। तत्रैव स्फूर्तिसप्तशत्या आर्याभागमवलम्ब्य संक्षिप्ता चर्चा कृतासीत्। अत्रावशिष्टांशमवलम्ब्य विचारः क्रियते। अस्मिन्नंशे आर्यावृत्ते निबद्धा 'परिवेशः' इतिशीर्षककविता, समस्यापूर्तयः, नानाच्छन्दांसि गीतानि च विलसन्ति। 'समस्यापूर्ति' नाम्नी विधा संस्कृतसाहित्ये बहोः कालात् लब्ध-प्रतिष्ठा विद्यते। विंशशताब्द्यामपि संस्कृतजगति समस्यापूरणमलोकप्रियं नास्ति। प्रायः समस्यापूरणे चमत्कारं जनयितुं कविर्यतते। डा० चतुर्वेद-महाभागेन अनेका समस्या पूर्णाः। तासु 'वारिवाहः' 'शरन्नितान्तम्', 'वसन्तः', 'वाणी-विलसितम्', 'राजते राजनीतिः', 'वसुन्धरा', 'गणपति', 'लम्पटाः', 'कालिदासः', 'प्रणामाञ्जलिः', 'यज्ञोपवीतम्', 'वन्दामहे', 'प्रीतिमुत्पादयन्तु' 'भवानी', 'चातुरी', वेदाभिधानं महः', 'का कथा', 'नारी', 'गुणानां गणः', 'परीक्षा', 'न हसितमथो नापि रुदितम्', 'सङ्गमः', 'नामापि न ज्ञायते', 'को विहातुं समर्थः'—इमाः समस्या अत्र संकलिताः। 'का कथा'

इत्येका समस्यापूर्तिदिङ्मात्रमुदाह्रियते यत्र हिन्दी-उर्दू-संस्कृतशब्दानां प्रयोगेण चमत्कारं जनयति कविः; पश्यन्तु विदग्धाः—

'वल्ला' केऽपि वदन्ति काव्यपठने केचित् 'कमालं' पुनः
प्रोच्चैश्चारु रटन्ति पद्यसुषमासम्मोहिताः सर्वशः ।
'क्या खूब्' इत्यनुघोषयन्ति कतिचिद् 'ओफ्फो' स्तथा चापरे,
केचित्त्वत्र वदन्ति मुक्तमनसा 'क्या बात है' 'का कथा' ।।

(अर्वाचीनसंस्कृतम् ५/३, पृ० १६७)

'नाना छन्दांसि' इति शीर्षकान्तर्गतम् 'अनुकरणम्', 'वन्दामहे', 'दयामयी', 'दर्शनम्' इत्येताश्चतस्त्रः कविताः सन्ति यत्र क्वचित्कविः महेश्वरं स्तौति, क्वचिद्भाग्यलक्ष्मीं स्मरति, क्वचिच्च जङ्गमदेवताया दर्शनं करोति । 'गीतानि' इति शीर्षके द्वादश गीतानि सन्ति तद्यथा—'सुषमापारावारम्', 'संस्कृतस्नेहिनां स्वागतम्', 'क्रान्तिकारिणी कविता', 'धिङ्मेघ' ! 'सर्वं जानीमः', 'महत्त्वं', 'धन्या धरा ममेयम्', 'नूतनम्', 'तानि पदानि', 'समय-प्रवाहः', 'किं चिन्त्यते' इति । एतेषु गीतेषु संगीतपरकता, मनोरमभावपेशलता च साक्षात्कर्तुं शक्यते । कविः मातृभूमिं वन्दमानो लिखति—

ममतानिधानभूमिः गीताप्रधानभूमिः ।
गुरुताप्रयाणभूमिः धन्या धरा ममेयम् ।।

० ० ०

शैलेन्द्ररम्यरम्या तटिनीतरङ्गनम्या ।
देवैरपि प्रणम्या धन्या धरा ममेयम् ।।

(अर्वाचीनसंस्कृतम् ५/३, पृ० १८३)

अथ 'पूर्णकुम्भं' तद्रचयितारञ्चावलम्ब्य किञ्चित्संकेत्यते । पण्डित-विष्णुकान्त शुक्लः स्वर्गीयाचार्यश्रीब्रह्मानन्दशुक्लात् श्रीमत्यां प्रियम्वदादेव्यां १९-१०-१९४२ तारिकायां उत्तरप्रदेशस्य'बुलन्दशहर' जनपदान्तर्गते 'खुर्जा' नाम्नि नगरे समुत्पन्नः । आबाल्यादेव हिन्दी-संस्कृत-काव्यानां पठने, कण्ठी-करणे निर्माणे चास्य महानुभावस्य रुचिर्ददृशे । शालप्रांशुर्महाभुजोऽयम्

'अक्षरश्लोक' कर्मणि सिद्धः। आबाल्यादेवायं महानुभावः वेदमन्त्रान्त्याक्षरी-श्लोकान्त्याक्षरी - संस्कृतनाटकाभिनय - वादविवादप्रतियोगितादि - कार्यक्रमेषु सोल्लासं भागं जग्राह । 'साप्ताहिक हिन्दुस्तान'-'कादम्बिनी'-'मनोरमा'-प्रभृतिहिन्दी-सावधिकपत्रेषु प्रकाशिताः शुक्लमहाभागस्य हास्य-व्यङ्ग्यपूर्णा लेखाः यथा पाठकैरश्लाघ्यन्त तथैव 'स्वरमङ्गला'-'संविद्'-'विश्वसंस्कृतम्' 'अर्वाचीनसंस्कृतम्'-इत्येवमादिषु संस्कृतपत्रेषु प्रकाशिता लेखा अपि पाठकैः सहर्षं सानन्दं च पठिताः। १९८१ तमे वर्षे प्रकाशिता 'स्फाटिकीमाला' इत्येतन्नाम्नी मुक्तककाव्यरचना अस्य विशिष्टा कृतिः यद्विषये मया 'अर्वाचीनसंस्कृत'स्य चतुर्थवर्षीये द्वितीयेऽङ्के संक्षिप्ता चर्चा कृतासीत् । इयं रचना उत्तरप्रदेशसंस्कृतादम्या पुरस्कृताप्यजायत ।

'पूर्णकुम्भः' श्रीशुक्लस्य दशललितनिबन्धानां संग्रहः। 'ललितनिबन्ध'-नाम्नी विधा हिन्द्यां पर्याप्तं प्रसिद्धा । अस्मिन् निबन्धसङ्ग्रहे लेखकेन स्व-लोकावेक्षणजन्यव्युत्पत्त्याः प्रकाशनं कृतम् । यात्रावृत्तान्त-रिपोर्ताज-व्यङ्ग्य-लेख-प्रत्यक्षवर्णन - दैनन्दिनी - प्रभृतिगद्यविधानामत्र दर्शनं कर्तुं शक्यते। संस्कृतसाहित्ये इमा विधाः नवीना एव सन्ति ।

एषु लेखेषु श्रीशुक्लस्य निर्भीका शैली अवलोकनीया । नाशित-स्वास्थ्यान्, शीलरहितान्, कृत्रिमजीवनान् स्वदेशयूनो यथायं धर्षयति न तथा प्राय आधुनिका लेखकाः कर्तुमुत्सहन्ते । क्वचिदभिधयैव सर्वमपि वक्तुकामोऽयं लक्ष्यते। आधुनिकविषयपरिग्रहणेन साकं पूर्वप्रतिष्ठापितामलङ्कृतां गद्य-शैलीमप्ययं सादरमुद्वहति । उत्कलिकाप्रायस्य, चूर्णकात्मकस्य वृत्तगन्धिनश्च गद्यस्य यथावसरमनेन प्रयोगो विहितः। 'विवेकानन्दशिला' शीर्षके निबन्धेऽधो-दत्तं भुजङ्गप्रयातवृत्तगन्धिगद्यं नूनं पारम्परिकीं प्रौढिं समभिव्यनक्ति पण्डित-विष्णुकान्तशुक्लस्य :—

'गतायां निशायां चलन्ति प्रवाताः सुगन्धानुयाताः। मनांस्येषु भूयो रमन्ते नराणाम्। तथैवोदिते सूर्यदेवे समन्ताज्जनाः स्नानकृत्यं विधायार्चयन्ति

स्तुतीनां सुघोषैः कुमारीम् । सुमन्त्रैः प्रबुद्धा विशुद्धैः सितैर्वस्त्रखण्डैः सिताभाः शिखाजालजीर्णाः कियन्तश्च यज्ञोपवीतैस्तथाऽनेकदेशप्रदेशस्मृतिज्ञानपूर्णाः समायान्ति द्रष्टुं नदीनां पतीनां त्रयाणामिहैकत्वमन्योन्यबन्धुत्वमित्थं शिलोच्चासनस्था असंख्यातदेशप्रियाः सर्वशुद्धाः सुभक्ताः । न चात्र क्वचिल्लोभमोहो न हिंसा । इहैवास्मदीयोऽभिलाषो मनोभावपुष्पाणि गुप्तानि कर्तुं समर्थो न जातः । न चास्माच्छिलाखण्डतो गन्तुकामो न कोऽपीति जाता मती रम्यभावा ।'

प्रकृति-नगर-मन्दिर-पर्वत-आपण-मेलापक-वरयात्रा-प्रभृतीनां वर्णनेषु रचनाकारस्य सूक्ष्मेक्षिका, लोकानुभवः नव्यभव्यशैलीकर्तृत्वं च समीक्षकैः साक्षात्कर्तुं शक्यन्ते । पूर्णकुम्भस्य रसास्वादनार्थं सहृदयाः सादरमामन्त्र्यन्ते ।

पण्डितविष्णुकान्तशुक्लः 'पूर्णकुम्भ'-रचनार्थं सादरं सस्नेहं च समभिनन्द्यते ।

'ग्रन्थसमीक्षणे' कासाञ्चिद् अर्वाचीनसंस्कृतरचनानां संक्षिप्तपरिचयो दीयते । देववाणी-परिषद्वार्तायां परिषदः कार्यकलापानां विवरणं दीयते ।

कृपालवः पाठकाः कुत्रचिज्जाताः मुद्रणत्रुटीः संशोधयितुं सादरं प्रार्थ्यन्ते ।

१५ जुलाई १९८३ विदुषामाश्रवः
६, वाणी-विहारः, रमाकान्त शुक्लः
नयी दिल्ली-११००५९ प्रधानसम्पादकः

(५५) परिवेशः

(६२०—६२६)

इतिहासे दीनानां गाथा नो विद्यते लिखिता
पूर्णप्रभावमहिता गाथा एवात्र लिख्यन्ते ॥१॥
वैपुल्यं दीनत्वे तिष्ठति नैवात्र सन्देहः
विरलतमत्वं पूज्यं भवति तथा चेतिहासानाम् ॥२॥
दूषितमथ शुभ्रं वा चरित्रजातं यदेव सम्प्राप्तम्
तत्सर्वं परिवेशे विलोकनीयं विचार्यं वा ॥३॥
सामान्येऽथ विशेषे परिवेशः सर्वसामान्यः
कारणभूतो विदितस्तस्यैवास्ते विशेषत्वम् ॥४॥
निम्नतरे परिवेशे सर्वो निम्नो भवत्येव
भिन्नेऽथ तत्स्वरूपे वैचित्र्यं जायते नृणाम् ॥५॥
परिवेशोऽयं नितरां कारणभूतः समृद्धौ वा
दारिद्र्ये वा नाना समुन्नतौ वाऽथ पतने वा ॥६॥
ह्रास-विकास-कलायां नियमावलिरेव कापीयम्
कर्ममयी सुविचित्रा पुरातनी नूतना चैव ॥७॥

समस्यापूर्तयः

(५६) वारिवाहः

(६२७)

सदोन्नतः प्रावृषि कान्तकायो निरीक्षितोऽनन्तजनैरमन्दम्
रसे रसां मज्जयति प्रकामं निकामहृद्यः किल वारिवाहः ॥१॥

(५७) शरन्नितान्तम्

(६२८—६३१)

नैकर्तवो यद्यपि सप्रभावा जगन्ति नूनं परिपोषयन्ति
सर्वेषु तेष्वस्ति विशेषरम्या शुभ्रेण वेषेण शरन्नितान्तम् ।१।
दिव्यच्छटाच्छादितदिग्विभागा व्योमान्तरालेषु विशेषशुभ्रा
लोकानशेषानपि मोहयन्ती संदृश्यतामद्य शरन्नितान्तम् ।२।
कासारमालासु विलोकनीयं जलं यदा सज्जनचित्तशुभ्रम्
आकाशकाये सितमेघमाला नूनं तदैवाऽस्ति शरन्नितान्तम् ३
नवीनसञ्चारणमादिशन्ती मनोमयप्राणमयप्रपञ्चे
आज्ञाप्रदाने कुसुमायुधाय कृतप्रतिज्ञेव शरन्नितान्तम् ।४।

(५८) वसन्तः

(६३२)

उन्मादयत्यतितरां रमयत्यजस्रं
सञ्छादयत्यथ च दैन्यदरिद्ररेखाम् ।
आयाति लोचनपथं शिशिरान्तलग्नो
गुञ्जद्द्विरेफकलितो ललितो वसन्तः ॥१॥

(५९) वाणीविलसितम्

(६३३—६३८)

नवीनोन्मेषाणां सदनमथ रम्योपनिषदां
निधानं सौजन्यामृतरसभराणां पुनरिदम् ।
पिधानं मोहानां करणगणसन्तर्पणपर-
मसारे संसारे शरणमिह वाणीविलसितम् ॥१॥

प्रबोधानां पन्था निरतिशयमाभाति कठिनो
विलोपो यत्राऽस्ते मधुरिमभराणां विलसताम् ।
इदं तु प्रत्यग्रप्रमुदितरसास्वादभरितं
कवीन्द्राणां मन्ये लसति नववाणीविलसितम् ॥२॥

विरोधोन्मत्तानां समविषमभावे निपतनम्
महानेतॄणां किं किमपि मतिमत्त्वप्रकटनम् ।
विलासाः पत्राणां नवनवविचारैः प्रखरिताः
सचित्रा लोक्यन्ते तदुपरि च वाणीविलसितम् ॥३॥

न सत्कारे द्रव्यं विहितमधुना नूतनयुगे
न मिष्टान्नादौ वा व्ययकरणमावश्यकतरम् ।
स्फुरच्चञ्चत्कक्षे ऽनलपविभूषादिभरिते
सतां साद्धिः सङ्गे परममिह वाणीविलसितम् ॥४॥

स्फुरद्युद्धोन्मादे खरतरकरालास्त्रजटिले
मिथो म्लाने चित्ते भवति विकटं दृश्यमतुलम् ।
प्रहारेभ्यः पूर्वं नवनवसमारोपकरणं
कदाचित्साम्मुख्ये प्रखरतमवाणीविलसितम् ॥५॥

शिवे वीरे चञ्चद्रणकवचसंभारलसिते
प्रदग्धं प्रोद्युक्ते गरलनिकरान् शत्रुनिवहान् ।
समायातो दीप्तो निजरचनया भूषणकवि-
स्तदीयं तत्काव्यामृतमसमवाणीविलसितम् ॥६॥

(६०) राजते राजनीतिः

(६३९—६४२)

यदीयाऽस्यरङ्गेषु लास्यं विधत्ते
मनोहारिणी काऽपि वाणी विचित्रा
सदा नूतनोदन्तजालैर्निबद्धा
ध्रुवं तेष्वियं राजते राजनीतिः ॥१॥
कदा कुत्र कस्याऽस्ति किं गोपनीयं
कदा वाऽपि कुत्राऽस्ति किं चित्रणीयम्
विचारप्रकारेषु ये सावधाना
जनास्तेष्विय राजते राजनीतिः ॥२॥
समाचारपत्रेष्वसङ्ख्येषु यस्याः
स्वरूपाणि घोराण्यथो मोहनानि
लसन्तीह नित्यं जनान्दोलनानां
समुत्थापिका राजते राजनीतिः ॥३॥
काले ह्यस्मिन्कराले जडिमविरसताद्वेषजालैरराले
प्रोद्यत्कौटिल्यजाले कथमपि मनसा मुष्टिमेयैः प्रपन्ने
ये लोकाः सन्ति नानाविधपरिचरणे जागरूका नितान्तं
तेष्वेवेयं सुतुष्टा परिचितविभवा राजते राजनीतिः ॥४॥

(६१) वसुन्धरा

(६४३—६४५)

तुङ्गशैलसुषमासमन्विता स्नापिता सुविमलैर्नदीजलैः
दुर्लभैः सुमफलैः प्रपूजिता नम्यतेऽनुदिवसं वसुन्धरा ॥१॥
रम्यतानिवहपूजिता क्वचित् रौद्ररीतिभिरभिष्टुता क्वचित्
मोहयत्यतितरां मनांसि नः सर्वभावभरिता वसुन्धरा ॥२॥
ग्रीष्मभीषणतराऽपि शीतला कोमलाऽरिपृथुकण्टकैर्युता
रम्यतामुपगताऽपि भीषणा चर्चिता कविवरैर्वसुन्धरा ॥३॥

(६२) गणयति

(६४६—६४७)

जनानामाक्रोशो गगनतलमप्यास्पृशतु वा
प्रभावानां मुद्राऽनुदिनमभिवृद्धिं व्रजतु वा ।
तदेतत्सर्वं नो गणयति मनागप्यनुपमा
प्रजातन्त्रे नीतिर्बहुमतमिहैकं गणयति ॥१॥
क्व वार्ता बाणानामथ च धनुषां नाऽस्ति गणना
गतास्ते खड्गाद्या न खलु समरे तेऽद्य किमपि ।
इदानीं राष्ट्राणां कटुकलहजाले प्रवितते
रणे नीतिः सम्यक् प्रलयपरमाणून् गणयति ॥२॥

(६३) लम्पटाः

(६४८—६४९)

ननु तावदिह प्रगल्भवाचां
कविता कामपि भावनां नवीनाम् ।
अभिसारयति प्रवीणताया-
मिति सज्जा रसपानलम्पटाः ॥१॥

कविता वनितेव भूषिताङ्गी
कमनीया यदि लभ्यते कदाचित् ।
शतशोऽपि विगर्हणां सहामो
ननु तस्यां वयमत्र लम्पटाः ॥२॥

●

(६४) कालिदासः

(६५०—६५२)

काव्ये यदीये कमनीयताया
वेद्यान्तरस्पर्शविहीनरूपम् ।
चकास्ति लोकोत्तरभावराशि-
पुञ्जः प्रणम्यो भुवि कालिदासः ॥१॥

यदीयजन्मोत्सव एष नूनं
श्रीकृष्णजन्मोत्सवतुल्य एव ।
साहित्यसेवारसिकेषु मान्यो
विभूतिरीशस्य हि कालिदासः ॥२॥

विद्योत्तमाया विशदः प्रयासः
काव्याङ्गनायाः कमनीयहासः ।
हंसः प्रसन्नो रसदीर्घिकाया
प्रत्यूषवन्द्यः किल कालिदासः ॥३॥

(६५) प्राणामाञ्जलिः

(६५३)

अद्यत्वे नहि भोजनेषु सरसा वार्ता क्वचिल्लभ्यते
नो वा पुष्कलदक्षिणा परिचिता सा दृश्यते सत्क्रिया।
कस्याऽप्यागमने न वाऽस्ति नियतो भावेषु रम्यादरः
शिष्टः केवलमेक एव विकलः शुष्कः प्रणामाञ्जलिः ॥१॥

●

(६६) यज्ञोपवीतम्

(६५४)

यत्तावद्भारतीयां जनगणनमितां संस्कृतिं शुभ्रधारां
सर्वाकारेण सम्यक् कथमपि विधृतामग्रपूज्यां करोति।
येनाऽस्ते वेदरक्षा सुखसुमतिकृता भाग्यरक्षा यदीये
क्षेत्रे गण्या सुरक्षात्मककवचमयं तद्धि यज्ञोपवीतम् ॥१॥

●

(६७) वन्दामहे

(६५५)

कालोत्तापितशेमुषीविगलितग्रन्थाभिरामोद्भटान्
प्राचीनाक्षरमालिकाप्रपठने वाचालभावं गतान्।
कार्याऽधिक्यवशात्कदापि नियते कार्ये न दत्तादरा-
न्नानायानचणान्नवीनविदुषो दृष्ट्वैव वन्दामहे ॥१॥

●

(६८) प्रीतिमुत्पादयन्तु

(६५६)

नेत्रे मित्रे मम भवति यदा सन्मुखे तत्स्वरूपं
कर्णौ संस्फीतवर्णावमृतनिगरणे सावधानौ भवेताम् ।
बुद्धिं चित्तं तथाऽन्यान्निखिलसहचरान् प्रार्थये भावनम्रः
कस्मिंश्चिच्चिद्विलासे मम करणगणाः,प्रीतिमुत्पादयन्तु ॥

●

(६९) भवानी

(६५७)

सर्वत्र संस्मृतिपथं त्वरितं गतैव
कामानहो कृतधियां परिपूरयन्ती
माता समस्तजगतां वचसामगम्या
स्नेहप्रपूर्णमभितः कुरुते 'भवानी' ॥

●

(७०) चातुरी

(६५८—६६०)

अपारसौभाग्यतरङ्गवीची-
चयेषु सम्पादितलोकमाधुरी ।
वाराणसीगाङ्गपयोनिमज्जने-
ष्वासाद्यते सा निखिलैव चातुरी ॥१॥

इतः प्रसिद्धं नु ततोऽपि सिद्धं
कार्यं समस्तमं परितोऽपि सिद्धम् ।
सिद्धेर्नवस्थानगवेषणायां
विलोकनीया महतां हि चातुरी ॥२॥
शाखाप्रशाखासु चरन् यथा त्व-
माभासि भूयो भगवन् पुरो मे ।
तत् पत्रपत्रे गमनेषु नूनं
विलोकनीयाऽस्ति ममाऽपि चातुरी ॥३॥

●

(७१) वेदाभिधानं महः

(६६१)

यस्याग्रे सततं समस्तजगतां नम्रं शिरो जायते
सर्गादौ भुवनेषु या सुमनसामाह्वानभाषाऽभवत् ।
विज्ञानेष्वपि जृम्भितेषु नितरां यस्याऽस्ति चर्चा नवा
तद् भूयात् सततं विपद्विदलने वेदाभिधानं महः ॥१॥

●

(७२) का कथा

(६६२)

'वल्ला' केऽपि वदन्ति काव्यपठने केचित् 'कमालं' पुनः
प्रोच्चैश्चारु रटन्ति पद्यसुषमासंमोहितः सर्वशः ।
'क्या ख़ूब्' इत्यनुघोषयन्ति कतिचिद् 'ओफ़्फ़ो' स्तथा चापरे
केचित्त्वत्र वदन्ति मुक्तमनसा 'क्या बात है' 'का कथा' ॥

(७३) नारी

(६६३—६६४)

जनयति लालन-पोषणपरा परामर्शसंगता भवति
वर्धयति मानमसमं सर्वं सम्पादयति नारी ॥१॥
असमैर्भावोन्मेषैश्चैतन्यं शतगुणितयन्ती
कवितायां रसधारावर्षारूपा परा नारी ॥२॥
मातेव रक्षति शिशूनिव पाति सर्वान्
सन्मार्गमादिशति कुप्यति चाऽहितेषु ॥
राष्ट्रस्य रक्षणविधाविह जागरूका
साम्राज्यमादिशति दीप्ततमा हि नारी ॥३॥

(७४) गुणानां गणः

(६६५—६६८)

साहित्ये सुकुमारभावभरिते प्राप्नोति संख्यां त्रयीं
सांख्ये प्राकृतवैकृतेऽपि च तथैवायं समाख्यातितः ।
न्याये कर्कशवाग्मितापरिणते प्राप्नोच्चतुर्विंशती-
मानन्त्यं भजते सुधीषु सततं सोऽयं गुणानां गणः ॥१॥
लोके सन्मतिसूक्तिविभ्रमभरैः प्रीतिं परां बोधयन्
सोल्लासं नवभावनामुखरितं काव्यं समाराधयन् ।
तथ्यामप्यमृतोपमामभिनवां विद्यां मुदा साधयन्
हे विश्वेश, सदैव वृद्धिमयतां सर्वो गुणानां गणः ॥२॥

यस्याङ्गीकरणेन पूर्वपुरुषास्तुच्छं सदा मेनिरे
स्वीयं जीवनमप्यसौ ननु तदैवासीत्सुदीप्तप्रभः।
अद्यत्वे विगुणैर्विनिन्द्यचरितैर्व्याप्ते महीमण्डले
लीनः क्वाऽपि महाब्धिगह्वरतले सोऽयं गुणानां गणः॥३॥

(७५) परीक्षा

(६६८—६७५)

एकाग्रतेयं विषमा तथापि
सद्यो द्वितीया समुपस्थितेयम्।
कथं नहि क्षीणबला भवेम
दैनन्दिनी यत्र भवेत् परीक्षा॥१॥

पूर्वं त्रिवारं भवतिस्म वर्षे
मासत्रये षट्सु च वर्षपूर्तौ।
वारद्वयं सा नियतं तु नित्यं
जातेति सत्यं विषमा परीक्षा॥२॥

नोदेति शब्दावलिरत्र रम्या
न चापि भावावलिराविरास्ते।
छन्दांस्यथो दूरतरं प्रयान्ति
गोष्ठीकवीनां निकटा परीक्षा॥३॥

किं जीवनं किञ्च वनं नितान्तं
किं मोहनं विश्वजगत्प्रपञ्चे।
का वा कथा यत्र मनःसमाधिः
सर्वाऽपि सैषा वितता परीक्षा॥४॥

के नाम पाठ्यक्रमसंन्निविष्टा
ग्रन्थाः कथं कुत्र मिलन्ति सर्वे।
एकस्तु मासो ह्यवशिष्ट एव
देया ततः कापि मया परीक्षा ।।५।।

प्रश्नोत्तरी या मिलिता सती द्राक्
गुरून् विकल्पे क्षिपतीह सम्यक्।
निरीक्षकाश्चाक्षिचये निलीना
यस्यां सखे साऽभिमता परीक्षा ।।६।।

जगत्त्रयं वा विजितं मयेदं
सिद्धिः समस्ताऽपि वशीकृतेयम्।
यदा मया सर्वविमोहिनीय-
मुत्तीरिता श्रेष्ठतमा परीक्षा ।।७।।

कामं प्रकाण्डा अपि शास्त्रसार-
सर्वस्वभाजोऽपि जना लसन्तु।
ते किन्त्वयोग्याः पददानकाले
नोत्तीरिता तैस्तु यतः परीक्षा ।।८।।

●

(७६) न हसितमथो नाऽपि रुदितम्

(६७६—६७८)

अवस्थास्तिस्रो या जगति विदिता जागृतिरथो
सुषुप्ति स्वप्नाख्याः सकलमिह तास्वेव लसितम्।
तदा जाग्रत्स्वप्ने हसितमपि तत्राऽस्ति रुदितम्
सुषुप्तौ तूप्नेयं न हसितमथो नाऽपि रुदितम् ।।१।।

सदा दैन्याद्रीणां शिखरपतनं मृत्युकरणं
समन्तादापीनं प्रबलतरदुर्दान्तदलनम् ।
मृते देहे सद्यो नवविकसितं शल्यकरणं
तदेतद् दृष्ट्वाऽस्ते न हसितमथो नाऽपि रुदितम् ॥२॥
विवेके केषाञ्चिद् हसितमिव जायेत रुदितं
क्षुधार्तानां लोके रुदितमयमेवाऽस्ति हसितम् ।
समृद्धे संसारे हसितहसितं सर्वहसितं
विपत्तिग्रस्तानां न हसितमथो नाऽपि रुदितम् ॥३॥

(७७) संगमः

(६७६—६८१)

संगमः सर्वसौख्यप्रदः स्नेहिनां
संगमः सज्जनानां सदा प्रीतिदः ।
सारभूतो धरित्रीतले चेतसां
चेतनाभिः समं नूतनः संगमः ॥१॥
नेतृणामुच्चसेवाव्रतैः संगमः
तस्कराणां पुनस्तैरहो संगमः ।
तत्र केषां तु कारागृहैः संगमः
नैव भूयात् प्रभो तादृशः संगम ॥२॥
अद्य सारस्वतस्रोतसां संगमः
काव्यलोकेश्वराणां महासंगमः ।
कामवर्षी भवेच्छन्दसां संगमः
नित्यमेवाऽस्तु देवेदृशः संगमः ॥३॥

(७८) नामापि न ज्ञायते

(६८२)

वेदोद्घोषपुरस्सरं स्तुतिकथाऽऽलापो हि न श्रूयते
सत्या वाग्विलयं गता नहि पुनर्दाक्षिण्यमालोक्यते ।
काव्यानां भणितिः स्वभावसरसा कुत्रापि नाऽश्रोयते
सौजन्यस्य कलौ युगे ननु सखे नामापि न ज्ञायते ॥१॥

●

(७९) को विहातुं समर्थः

(६८३—६८५)

उत्कोचानामिह शबलताऽनन्तरूपेषु दृश्या
यत्रोत्कोचप्रबलतरता तत्र भोग्या विलासाः ।
अद्योत्कोचः शिव इति हरिर्वाथ देवो हनूमान्
चञ्चद्रूपं द्रविणमतुलं को विहातुं समर्थः ॥१॥

सद्यो जातं विगतविभवं पूरुषं सान्त्वयन्तम्
स्वल्पं दुग्धं लघुतरसितापत्रचूर्णादियुक्तम् ।
किञ्चिल्लावण्यसुपरिकरं पात्रसंक्षेपसारम्
चायं पेयं गरमगरमं को विहातुं समर्थः ॥२॥

श्यामश्यामां गरलतरलां विस्फुरन्नेत्रराजिं
वाचालां वा कथमपि न कोऽप्यादरात् स्वीकरोति ।
किन्तु स्मेरां सरसमधुरैरक्षरैरालपन्तीं
वामां मुग्धां करतलगतां को विहातुं समर्थः ॥३॥

●

नाना छन्दांसि

(८०) अनुकरणम्

(६८३—६९०)

अनुकरणगुणं भजे नितान्तं
चरमविकासितभावनाऽभिरामम् ।
बहुविभवनिवेदकं पुरस्तात्
प्रथमतरं पुरतः प्रकल्पितानाम् ॥१॥

अनुकृतिरसमा भवेत् प्रकामं
भवति च सा किल मूलतोऽपि धन्या ।
अवहितविभवोऽथ चेन्नितान्तं
सहृदयतां समुपागतोऽनुकर्ता ॥२॥

अनुकरणमिहास्ति सर्वमेतत्
न खलु विहाय तदुद्गमः कथञ्चित् ।
भवविभवपराभवेषु भाषा-
परिसीमाऽनुभवेषु तत् समस्तम् ॥३॥

अनुकृतिकुशला जयन्ति विज्ञा
विषमतरेष्वपि सावधानभावाः ।
परमतनिरतामपि स्वविद्यां
स्ववशतरामवतारयन्ति सद्यः ॥४॥

अनुकृतिपरिशिक्षणेषु बालाः
प्रथमतरामिह शेमुषीं श्रयन्ते ।
तदनु बहुविधां पठन्ति विद्यां
परिपठितां च सुपाठयन्ति तान्ताम् ॥५॥

इह खलु निजतामुपागताना-
मनुकरणावलिचित्रमण्डितानाम् ।
करचरणविभिन्नचेष्टितानां
भवति चमत्कृतिरात्मधन्यतायाम् ॥६॥

नियमविधिवशाज्जडीकृताना-
मपि नियतं महिमा प्रकाशितः स्यात् ।
यदि विलसति तत्र कापि रम्या-
ऽनुकृतिमयी प्रतिभा प्रभा पुरस्तात् ॥७॥

इदमनुकरणं जगत् प्रसूते
भवति च तत्परिपालने प्रवीणम् ।
प्रथमपरिचये भवेत् कदाचित्
निबिडतराऽपि विभा विभावितानाम् ॥८॥

●

(८१) वन्दामहे

(६९१—६९५)

वन्दामहे विवशमात्मनि संस्थिताय
कस्मैचिदप्यतितमां समुपेक्षिताय ।
प्रोद्दाममानमदपाटनपीडिताय
ज्ञानाभिमानदमिताय महेश्वराय ॥१॥

तस्मै नमो मम जडत्वविमुद्रिताय
आपद्गतेन तु सदा मनसा नताय ।
सौख्ये कदाचिदपि नो मनसि स्थिताय
स्पष्टाक्षरैरपि भृशं विनिषेधिताय ॥२॥

एतावतीष्वपि घृणासु सुसंस्थिताय
दुर्वृत्तभावमहितेऽपि कृतास्पदाय ।
दुर्दान्तदस्युहृदयेऽपि विराजिताय
सद्विप्रयोगकरणाय नमः शिवाय ॥३॥

सर्वैर्विरुद्धमतिमद्भिरुपासिताय
रामेण रावणकरैरपि पूजिताय ।
पूतैश्चिरन्तनतरैरसकृन्नुताय
विद्राविराक्षसगणैरपि वन्दिताय ॥४॥

वन्दामहे सरसवाक्पठितस्तुताय
चित्तैकपात्रभरिताय विचारकाय ।
सम्यग् विबोधनकराय सदैव धैर्य-
मालाप्रदाय परमाय महेश्वराय ॥५॥

●

(८२) दयामयी

(७००—७०३)

नितातं प्रभातायितायां रजन्यां
नमामः स्मरामो हृदिस्थां नवीनाम् ।
कृपापूरसर्वस्वसौभाग्यसारां
विपञ्चीसमालोचिकां भाग्यदेवीम् ॥१॥

अद्यापि तां सर्वगुणप्रधान-
शोभाभिरामां मनसा प्रपद्ये ।
या संस्मृतैवाखिलदेहभाजा-
मन्तःस्थिता पूरयतीह कामान् ॥२॥

सा कापि शक्तिः परमार्थसार-
सौगन्ध्यविश्वाभरणायमाना ।
कामान्मदीयानपि पूरयन्ती
प्रादुर्भवन्ती सततं नमस्या ॥३॥

ते धन्यतां प्राप्य तदा पुरस्ता-
दुत्तालनृत्यं परिदर्शयन्ति ।
कामोन्मिषन्नेत्र निमीलनोत्थां
विद्युल्लतां ये खलु नर्तयन्ति ॥४॥

(८३) दर्शनम्

(७०४—७०६)

हे दर्शनार्थिनि तवैव नु दर्शनार्थं
दूराच्चलन्निह सुमन्दिरमागतोऽस्मि ।
त्वं दर्शनं कुरु मुदा स्थिरदेवताया
मद्दर्शनं भवतु जङ्गमदेवतायाः ॥१॥

त्वद्दर्शनेन नितरां परिलुप्यते मे
दोषान्धकारपटली त्वयि संविलीना ।
दोषाकरा त्वमसि यत्कवलीकरोषि
सर्वेन्द्रियाणि मम चक्षुषि केवलेऽस्मिन् ॥२॥

शृङ्गारहाटकमयी सकलाङ्गयष्टि-
रेषा तवैव निखिला ननु कोमलाङ्गि ।
त्वं चातकं मम मनो नितरां कृशत्व-
मायातमेतदिह तर्पय हर्षवर्षैः ॥३॥

गीतानि

(८४) सुषमापारावारम्

(७०७)

मेघे मेघे वाते वाते-
अन्धकारसंभारे,
तुहिनकणानां कम्पनसारे-
ऋतुवैभवविस्तारे,
लोकयामि मम कोमलमानस-
गतमरालसंचारे
सुषमापारावारमपारं
सर्वेश्वरपरिवारे ।

●

(८५) संस्कृतस्नेहिनां स्वागतम्

(७०८)

संस्कृतस्नेहिनां कुर्महे स्वागतम्
तैर्वदान्यैस्तु सत्यापितं जीवनम्

संस्कृतस्योन्नतिं कामयन्ते जनाः
संस्कृतं प्रोन्नतं तत्र का कामना
आत्ममात्रोन्नतौ तत्तु सम्भावितम्
संस्कृतस्नेहिनां कुर्महे स्वागतम् ।

दिव्यनाम्नामृषीणां कवीनामहो
वाक्यधारामृतं सत् सरः संस्कृतम्
अद्य तेषां स्मृतावेव सुस्वागतम्
संस्कृतस्नेहिनां कुर्महे स्वागतम् ।

संस्कृते सत्यनिष्ठाऽस्मदीया भवेत्
ग्रन्थसार्थस्य बुद्धौ विलासो भवेत्
तादृशानां क्षणानामहो स्वागतम्
संस्कृतस्नेहिनां कुर्महे स्वागतम् ।

संस्कृतं कल्पवृक्षात्मकं सेवितं
भारते तस्य सर्वोन्नतं जीवनम्
सा तडित्तादृशी यत्र विश्वं नतम्
संस्कृतस्नेहिनां कुर्महे स्वागतम् ।

दुर्दशा चेन्मदीयान्वहं कारणम्
अर्थलाभे मया योजितं संस्कृतम्
संस्कृतं भुक्तमेवाऽस्ति नो सेवितम्
संस्कृतस्नेहिनां कुर्महे स्वागतम् ।

(८६) क्रान्तिकारिणी कविता

(७०९)

कविता क्रांतिकारिणी भविता
अव्यवस्थितः कवितासविता ।

अद्येदं विश्टृङ्खलं सर्वम्
लुण्टाकानां गर्वमखर्वम्
नैव रक्षिता गेहे दयिता
कविता क्रांतिकारिणी भविता।

धवले दिवसे दस्युनिनादः
मारकास्त्रनिचयानां नादः
नैव दर्शनीयः कोऽप्यविता
कविता क्रांतिकारिणी भविता।

किंवाऽत्रापि करिष्यति कविता
प्रश्नः क्रियते का वा नवता
भूषण - तुलसीदास - दिनकरैः
किं वा कृतमपि नास्ति विज्ञता ?
आस्तामभितोऽनलः प्रभविता
कविता क्रांतिकारिणी भविता।

(८७) संस्कृत-कविता

(७१०)

जयति नितान्तं संस्कृतकविता नूतनगन्धरसाला
रसपिच्छिलपन्थानमलंकुर्वन्ती ललिता बाला ॥

प्राचेतसवैभवभरभरिता रामकथाया मञ्जुलसरिता
लक्षलक्षकण्ठेषु प्रत्यहं सुखस्वरं निर्झरिता
मातुर्वक्षोरुहयोरेषा मणिमयमेदुरमाला
जयति नितान्तं संस्कृतकविता नूतनगन्धरसाला ॥

व्याससमुद्रे रसतरङ्गिते भणितिसहस्रैरलं गुञ्जिते
जन्मसफलता दृष्टिगोचरीभवति स्थावरजंगमाञ्चिते
रेखा भावानां सुस्पष्टा सरला तथा ह्यराला
जयति नितान्तं संस्कृतकविता नूतनगन्धरसाला ॥

कालिदास-भवभूतिमनोज्ञा भारवि-माघ-ललितहर्षज्ञा
बाण-दण्डि-पाण्डित्यविलासैरलंभावना भरितप्रज्ञा
रसपिच्छिलपन्थानमलंकुर्वन्ती ललिता बाला
जयति नितान्तं संस्कृतकविता नूतनगन्धरसाला ॥

●

(८८) धिङ् मेघ !

(७११)

धिक् क्रियसे रे मेघ ! नितान्तम्
एषु दिनेषु विलोकय रे त्वम् मारकोऽसि जनताया नित्यम्
विष्णुपदं तव पापैः क्रान्तम्
भग्नस्तव मर्यादाबन्धः धूमयोनिरसि नितरामन्धः
स्थानं सर्वं क्लेशक्लान्तम्

अद्यावधिरसि कविभिरीडितः मन्ये तस्मात् गर्वपीडितः
तवापि महिमा मतपत्रान्तम्

अयि भोः कपटवेशसंन्यासिन् पीडितार्तजनतापरिहासिन्
खण्डं खण्डं भवसि सहान्तं धिक्क्रियसे रे मेघ नितान्तम् ।।

●

(८९) सर्वं जानीमः

(७१२)

न खलु वयं सर्वं जानीमः सर्वं किं न किमपि जानीमः
किञ्चिज्ज्ञाने खलु सञ्जाते गजमदान्धताऽस्मासु नितान्तम्
मुधा विवादो भृशं रोचते ननु कपोलवादने नितान्तम्
कलियुग एष वयं जानीमः सर्वं किं न किमपि जानीमः ।
यशसां सम्प्राप्तिर्या जाता ज्ञानं तत्र कारणं नैव
शतशो जनास्तादृशा लोके विख्याता ये श्रमं विनैव
स्तोकेऽनल्पफलं जानीमः सर्वं किं न किमपि जानीमः
समयो देयः संमिलने चेदुच्चतरा मानवा विधेयाः
आदर्शाणां कथा विधेया मनसि सदा भिन्नता विधेया
मूलं मन्त्रमिमं जानीमः सर्वं किं न किमपि जानीमः
नासीदेषोऽस्माकं पन्थाः हेयोऽयं वा दलितः कन्थाः
सर्वेषां संमिलने तावत् सत्यं शिवं सुन्दरं मंस्थाः
विज्ञायापि न वा जानीमः सर्वं किं न किमपि जानीमः ।

●

(९०) महतां महत्त्वम्

(७१३)

अहो महतां महत्त्वम् ।

पीवरत्वं यानवत्त्वम् तत्र निबिडं निश्चलत्वम्

अहो महतां महत्त्वम् ।

भाषणे निखिलं कवित्वम् अवसरे तीक्ष्णं पवित्वम्

अहो महतां महत्त्वम् ।

अग्रतो ननु वैदिकत्वम् पृष्ठतस्तु धनुर्धरत्वम्

अहो महतां महत्त्वम् ।

घोषणासु विवेकवत्त्वम् पालनेषु सरीसृपत्वम्

अहो महतां महत्त्वम् ।

वर्तमाने भोगवत्त्वम् आयतेरथ निश्चितत्वम्

अहो महतां महत्त्वम् ।

मध्यरात्रिषु कर्मठत्वम् सभामध्ये तन्द्रितत्वम्

अहो महतां महत्त्वम् ।

अन्यकार्ये विस्मृतत्वम् स्वीयकार्ये स्मारकत्वम्

अहो महतां महत्त्वम् ।

झटित्यश्रुविमोचकवत्त्वम् तेन सर्ववशीकृतत्वम्

अहो महतां महत्त्वम् ।

(९१) धन्या धरा ममेयम् !

(७१४)

ममतानिधानभूमिः गीताप्रधानभूमिः
गुरुताप्रयाणभूमिः धन्या धरा ममेयम् ॥
सौन्दर्यसौख्यसारा दूरीकृताऽघभारा
सत्या शिवाऽवतारा धन्या धरा ममेयम् ॥
शैलेन्द्ररम्यरम्या तटिनीतरङ्गनम्या
देवैरपि प्रणम्या धन्या धरा ममेयम् ॥
निखिलार्थसार्थदात्री विश्वेशितुः प्रमात्री
कालुष्यसङ्घजेत्री धन्या धरा ममेयम् ॥
धमनीषु रक्तधारा यस्याः कृपाप्रसारा
शत्रौ कृतप्रहारा धन्या धरा ममेयम् ॥

(९२) नूतनम्

(७१५)

नूतनघटितमिदम्

मनुजे मनुजे द्वेषः सोऽयं
पुरातनो विद्यते न नूत्नः ।
निमिषेणैव किन्तु प्राणाना-
मपगम एषोऽद्यैव न प्रत्नः ॥

कष्टेनैव बहूनां लपनं
दुःखं रटितमिदम् ॥
राजानः सर्वेऽपि मानवाः
शासनपतयः किन्तु कतिपये ।
निर्वाचनवेलायां बहुमत-
माद्रियते नियमस्य तुष्टये ॥
वैधानिकराज्ञां परिचरणं
सद्यो नटितमिदम् ॥
पारतन्त्र्यवेलासीद् दृष्टा
वैदेशिकी नीतिरपि दृष्टा ।
भारतविश्वगुरुत्वं दृष्टं
तन्त्रहीनताप्यत्र च दृष्टा ॥
महामानवानां तु भारते
यन्त्रे गणितमिदम् ॥
यद्यत्स्वयं सदा करणीयं
तस्य भाषणे सदा विरोधः ।
यौनशिक्षणं प्रचुरं देयं
सन्तत्यर्थं सदा निरोधः ॥
नूतनयुवतीनाटकमेतत्
नवपरिपठितमिदम्
नूतनघटितमिदम् ॥

(८३) तानि पदानि

(७१६)

सखि हे, तानि पदानि गतानि
येषु सहासा नयनविलासा-
द्विक्कान्यपि लसितानि ॥
सखि हे तानि पदानि गतानि ।
येषां सम्प्रधर्षणा विहिता-
स्तैः स्ववचांसि ततानि
येषामुपकारा विहितास्तै-
र्दूरितानि सुकृतानि ॥
सखि हे तानि पदानि गतानि ।
पदविरहोऽयं दुःखकारकः
ब्रूहि कथं करवाणि ।
सोढुं कथमपि नहि पार्यन्ते
जगतामुपहसितानि ॥
सखि हे तानि पदानि गतानि ।
अहो दुरन्ता चिन्ता सेयम्
पर्वतरूपदिनानि
आश्वासनान्यपितु नहि जाता-
न्यद्यत्वे सुलभानि ॥
सखि हे तानि पदानि गतानि ।
पादत्राणमालिका चेयं
जनजनताडितकानि
रक्तचापयन्त्रं प्रदर्शयति
सद्यो गताऽगतानि ॥
सखि हे तानि पदानि गतानि ।

(६४) समयप्रवाहः

(७१७)

प्रवहति तूर्णं समयप्रवाहः ।
संसारोऽयं महाकटाहः ॥
विधिलसितं विकसितमिदमसमम् ।
कथासु कथितं कष्टरञ्जितम् ॥
गीतलयेष्वास्ते निर्वाहः ।
प्रवहति तूर्णं समयप्रवाहः ॥
मा मा मेति मेति परितोषः ।
ग्रन्थानां निरोधको घोषः ॥
रामचरितमानसो नवाहः ।
प्रवहति तूर्णं समयप्रवाहः ॥
देशविदेशे युद्धोन्मेषः ।
मारकास्त्रसंरम्भविशेषः ॥
पुनरपि नववरवधूविवाहः ।
प्रवहति तूर्णं समयप्रवाहः ॥

(९५) किं चिन्त्यते

(७१८)

यत्र चर्चाऽस्ति सर्वत्र गङ्गातटे ।
देवदेवस्य तत्राऽपि किं चिन्त्यते ।।
मज्जनं यत्र जातं त्रिवेणीजले ।
तत्र संसारधाराऽपि किं चिन्त्यते ।।
गीयते स्तूयते दृश्यते स्पृश्यते ।
माधवो तत्र तत्राऽपि किं चिन्त्यते ।।
सज्जनानामसौ संगमो दुर्लभो ।
यत्र सञ्जायते तत्र किं चिन्त्यते ।।
चिन्त्यतां काऽपि काव्यस्य धारा नवा ।
या पुराणी तु सा सैव किं चिन्त्यते ।।
दिव्यदेवाधिदेवांशभूता वयम् ।
गीतया गीयते नैव किं चिन्त्यते ।।
नन्वियं धारणा नातिदूरं गता ।
सम्मुखे जह्नुकन्याऽस्ति किं चिन्त्यते ।।
जागरूकं जनानां यदां मानसम् ।
रामबाणोऽयमाभाति किं चिन्त्यते ।।
धूर्जटेर्धूलिमासाद्य मोदामहे ।
या स्थितिर्भाविनी साऽपि किं चिन्त्यते ।।
लुप्यते वेदना कान्दिशीकी स्वयं ।
दिव्यलीलाप्रभावोऽपि किं चिन्त्यते ।।

(९६) सविनयम्

(७१९)

इति सद्भ्यः श्रीगिरिधरशर्मचतुर्वेदतनयेन ।
शिवदत्तेन सविनयं समर्प्यते स्फूर्तिसप्तशती ॥

●

इति श्रीमन्महामहोपाध्याय-पण्डित गिरिधर शर्म
चतुर्वेदात्मजेन, एम० ए०-पीएच० डी०—
साहित्याचार्य-व्याकरणचार्योपाधि-विभूषितेन
वाराणसीस्थ काशीहिन्दूविश्व-विद्यालय-
प्राच्यविद्या - धर्मविज्ञानसंकाय-
साहित्य - विभाग - प्राध्यापकेन
शिवदत्त शर्म चतुर्वेदेन
रचिता समाप्तेयं
स्फूर्तिसप्तशती सहृद-
यानां मोदाय
भूयात् ।

●

अथ

पण्डितविष्णुकान्तशुक्लविरचित:

'पूर्णकुम्भः'

(ललितनिबन्धसङ्ग्रहः)

अनुक्रमः

शीर्षकः	पृष्ठसङ्ख्या
१. सहारनपुरस्य घण्टागृहश्रृङ्गाटकम्	१६१-१६३
२, एकं वरयात्रा-दर्शनम्	१६४-१६६
३. काल-महिमा	१६६-२०३
४. पूर्णकुम्भः	२०३-२१०
५. नैनीतालश्रीः	२११-२१८
६. न सः पुनरावर्तते	२१६-२२२
७. श्रीवेङ्कटेशमन्दिरम्	२२३-२२६
८. विवेकानन्दशिला	२२६-२३३
६. अहमपि भारतीयः ?	२३३-२३७
१०. 'पञ्च च मे'	२३८-२४६

द्वित्राः शब्दाः

अयि देववाणी-समाराधकाः सहृदयाः विद्वांसश्च,

'पूर्णकुम्भ'-नामायं लेखसङ्ग्रहस्तत्रभवतां करकमलेषु सादरमुपह्रियते। अत्र १९६७ तः १९८१ यावल्लिखिताः केचन ललितनिबन्धाः संगृहीताः सन्ति। एतेषु केचन 'विश्वसंस्कृतम्'-'स्वरमङ्गला'-'संवित्'-प्रभृतिपत्रिकासु प्रकाशितपूर्वा अपि सन्ति। सहारनपुरस्य घण्टागृह (घण्टाघर)-क्षेत्रमद्यत्वे किञ्चित्परिवर्तितमिव सञ्जातम्। मया १९६७ तमेशवीयेऽब्दे तस्य वर्णनं कृतमासीत्। यैर्दृष्टं तथाभूतं घण्टागृहक्षेत्रम् तेऽवश्यमेव तदत्र पुस्तके प्रत्यक्षीकरिष्यन्तीति आशासे। एतेषु निबन्धेषु यदपि निबद्धं तत्सर्वं मया साक्षादनुभूतम्। इदानीं तत्सर्वं सहृदयानां सेवायां सादरं निवेद्यते। ये के चात्र दोषाः स्युस्तैरहमवश्यमेव परिचितः कार्यः सहृदयैर्विपश्चिद्भिर्दोषज्ञैः। देववाणी-परिषद्, दिल्ली' पूर्णकुम्भ-प्रकाशनार्थं धन्यवादार्हा।

—विदुषां विधेयः

विष्णुकान्त शुक्लः

'विभावना'

प्रद्युम्ननगरम्

शिवारण्यपुरम् (सहारनपुरम्), (उ० प्र०)

पण्डितविष्णुकान्तशुक्लविरचितः

पूर्णकुम्भः

(ललितनिबन्ध-संग्रहः)

(१) सहारनपुरस्य घण्टागृहशृङ्गाटकम्

सहारनपुर लौह-पथ-गामिनी-विश्रामस्थलान्नातिदूरं घण्टागृहमायाति। घटिकागृहमितिवक्तव्ये जनाः परम्परयादो घण्टागृहमिति कथयन्ति। ये च त्रिलोचना इव त्रि-घटिका-लोचन-धराः, पञ्चमुखा इव पञ्चमुखमार्गाः, जनार्दना इव सलक्ष्मीकाः, शोभन्ते घण्टागृहाः। प्रातरेवोभयतो मार्गं मिष्टान्नकाराणां पाषाणेङ्गालाङ्गारिकाः धूममुद्वमन्त्यः शुक्लानपि कृष्णान् कुर्वन्त्यः नित्यकर्मविरहितानपि सवेगद्विचक्र-यानमधिरोहतो निरुद्धनिःश्वासान् प्राणायामपरायणानिव प्रकुर्वन्त्यः, सात्त्विकाङ्गरागानपि रजोयुक्तान् कलयन्त्यः, स्वकीयकार्ष्ण्यं प्रकटयन्त्यो वातपीडिताः घनाकाराः प्रज्वलन्ति। अध्ययनाध्यापनोत्सुकान्वहन्तो "विरम-विरम" "सर्प-सर्प" "दृष्ट्वा न चलसि" "किमद्यैव वाहनमानीतवानसि" "एकतः एकतः" "तिष्ठ-तिष्ठ" "पुत्र-प्रियापेही"ति ब्रुवाणा द्रव्यापहारका इव जनापहारका अरक्षिता इव रक्षावाहका असन्तुष्टा इव धावन्ति।

प्रायशो नाववादनकालतो घण्टागृहमार्गोऽतितमाञ्चलो भवति। मध्येशृङ्गाटकं वर्तुलचक्र-स्थितो राजपुरुषो योगीव पञ्च-प्राण-मार्गनियन्ता, हिंसक इव दत्तभयहस्तः, प्रवृद्धवायुरिव प्रकम्पितः, नीरोग इव वशेन्द्रियमार्गग्रामः, बद्धोष्णीषस्तरलितचक्षुस्सोपानत्को

भूस्थोऽपि स्वस्थो विराजते । अयञ्च मार्गः—उद्यानमिव सफलो विलासीव सुगन्धाङ्गरागधरः क्रोधीव रागी, सुरचाप इव विविधवर्णः साहित्यिक इव छन्दःप्रियः, वसन्त इव समदनः, गंगाधर इव सचन्द्रः, वैयाकरण इव लोपागमवर्णविकारबहुलः, हनूमानिव रामानुरागी, कुशिष्य इवागुरुसेवकः, चन्द्र इव वारुणीप्रियः, बाण इव पाञ्चाली-प्रियः, गोकुलमिव श्रीकृष्णाधिष्ठितः, अर्जुन इव सकृष्णः, कुमार इव सकुमारः, नकुल इव सहदेवयुतः, विद्यालय इव विद्यार्थिना सम्मानितः, रविरिव सप्रकाशः, निष्कुट इव साशोकः, हिमालय इव समानसरोवरः, मानसरोवर इव सराजहंसः, विधिरिव सहंसः, सिन्धुरिवामृताधिष्ठितः, सवैद्यनाथः, सरजकः नीरजोऽपि रजोवान् कमलविकास इव सप्रभातो भाति ।

प्रायः सन्ध्याकाले लक्ष्मण इव सुमित्रानन्दवर्धनः, नारायण इव वैजयन्तीप्रियः, चक्षुःश्रवा इव गतश्रुतः, शेष इवासंख्यवाक् जनसम्मर्दो मन्ये, भगवतो विधातुर्नामरूपात्मकोभयरूपं जगद्दिदृक्षुश्चित्रमत्व-रितगतिर्निर्मलवासाः ताम्बूलपूरिताननः, धूम्रवर्तिका-धूमोद्वमन-स्वान्तःकालिमानं प्रकटयन्निव चित्रगृहं याति । परस्पर-गृहीत-करतलानां बद्धवृद्धकूर्चानां, श्याम-नील रक्तोष्णीषाणां, तर्जितश्मश्रूणां, गौरवर्णानां, गतक्लमानाम्पञ्चाम्बुदेशीयानामालोकः क्वचिद्धम्मिल्ल-वतीनां युवतीनां विम्बाधरोष्ठीनां कज्जलकलितापाङ्गानामङ्गनानां, कविकाकर्षणरुद्धोत्थितानामश्वानामिवोत्तुङ्गपयोधराणां, वक्षः-स्थापितकृत्रिमहारमणीनां रमणीनां विविधप्रसाधनोपयुक्ताङ्गराग—हैयङ्गवीनास्वाभाविककेशजालवतीनामवतारः, क्वचिदतिरागयुक्ता-धराः मुक्तकेशकलापाः करधृतस्वल्पद्रव्यप्रसेवकाः रक्तपिपासवः कपालधारिण्यो निशाचर्य इव दरीदृश्यन्ते । प्रकाशान्तिकं प्रवाहित-कुल्या सेतु-निषण्ण-चर्मकार-पुरःस्थापितपादत्राणपंक्तिः काकपंक्ति-रिव श्यामा विद्युत्प्रकाशयुता चाकचिक्यमुत्पादयति । तत्रैव क्वचित् पञ्चशताङ्कधरदैहिकबलपरीक्षकाणि यन्त्राणि दर्पावलेपवर्द्धित-

स्ततो दृष्टिपातं कुर्वद्भिः पीतवर्णैः शुष्ककलवेरैर्निपीतधूम्रवर्तिकैश्चलन्नितम्बैः प्रकटिवक्षोभिरुन्नतकपोलान्तरदशनैराकृष्यमाणानि 'पीं-पीं'-इत्युपहासध्वनिकाराणि कमपि गजमिव गभीरं, सिंहमिव श्मश्रुलं, वृषभमिव बलिष्ठं, अनुमानमिव सत्पक्षं, मधुराकृतिं बलादाकर्षयन्ति। क्वचिज्जानुनिहितकराग्राः न्युब्जीकृतकलेवराः, तरलितकूर्चाः, दन्तधावन-पुञ्जादेकैकं पर्यालोचयन्तः पञ्च द्वितयम् एकमेव देहीति ब्रुवाणाः शुभ्रदशना जना दर्शनपथमायान्ति। सन्निहिततीक्ष्ण-प्रकाशदीपका विविधवस्त्राभिलाषविवर्द्धका एकेनैव मूल्येन विक्रयं कुर्वन्तो धैर्य-धौरेयाः रात्रिप्रिया वस्त्रविक्रेतारो मेदिनीगता गृहीत-प्रोञ्छनपटाः कस्मै न नयनानन्दं ददति। ताम्बूलविपणिकासु ध्वन्यमानविविधगीतवादित्ररूपककाव्यहास्यादिकं वितरदमन्दानन्द-मनुभावयदाकाशवाणीयन्त्रं पान्थश्रुतिविवरं विदीर्णयदात्मानमेव निःसारं करोति।

सर्वमुपलभ्यते घण्टागृहमार्गे। एकत आलुकनिर्मितानि त्रिकोणादीनि मरीचिमयानि खाद्यानि, क्वचिद्दुग्धमयाः पदार्थाः, क्वचित्फलानि, क्वचिदिक्षुदण्डरसः, क्वचिच्चायं, क्वचित्पानकं, पुस्तकालयः, द्रव्यालयः, औषधालयः, केशकर्तनालयः, भोजनालयः—इति सर्वमेवात्र। अयमेव मार्गः प्रणवश्छन्दसामिव नगरमुख्यः इममेवाधिकृत्य स्थिता आवश्यकवस्तुव्यापारिणोऽनेनैव पथा गच्छन्ति सर्वत्र जनाः, अस्मै दत्तलोचनाः सर्वे. अस्मादेव भ्रमणतुष्टिः अस्यैव महिमानं गायन्ति नागरिकाः, अस्मिन् अवश्यमेव रतिं कुरुत अयि सहृदयपाठकाः।

(२) एकं वरयात्रा-दर्शनम्

अस्म्यहं स्वनगरघण्टागृहशिखरे। इयमस्ति एका वरयात्रा। मदाननसम्मुखीयं 'सोफ़ियास्कूल' तः समायाति। पूर्वमेते विविध-वाद्यवृन्दोपेताः सुरक्तवर्णवस्त्रधारका रजोगुणयुक्ता अपि मन्ये रागं दूषयन्तः कर्णकटुध्वनिना नूनं सारस्वतवैभवं भीषणं कुर्वन्तः पुरस्ता-दायान्ति। एतेष्वप्यन्यतमो लम्बमानो जरठो लम्बकाष्ठदण्डं रजतपत्रोपेतं गदाकारं करे कृत्वेतस्ततो दर्शकान् हास्योन्मुखान् कुर्वाणः स्वयञ्च कृत्रिम गाम्भीर्यमाकलय्य मध्यलोपयुतं श्वेतश्मश्रुजालं चालयन् नर्तकायते। अहह! दुरन्तपूर! उदर! त्वत्कृते किं किन्न क्रियते नटवन्मनुष्येण!

तदनु केचन मञ्जीराणां रणितेन, दुन्दुभीनां घोषेण, वंशीनां निनादेन, गोमुखानां प्रतिध्वानेन, कर्णकुहरं स्फोटयन्तश्शनैश्शनैरग्रे यान्ति। तेषामयं नायकः आंग्लवेषेण मन्ये स्वात्मानमपि परतन्त्रता-कञ्चुकेनाच्छाद्यासुरीवृत्त्या दर्शितक्रूररक्तनेत्रः, सुरासम्पर्कसमुत्थ-सद्यःस्फीततीव्रोत्कटगन्धेन सन्निकटजनानामुपरि स्वचरित्रचाञ्चल्यं सुरापित्वं, स्वच्छन्दाचरणञ्च प्रकटयन्, कदाचिच्छिरस्त्राणमधः कृत्वा, शिरसि वाद्यं निधायासभ्यरूपेणाकुञ्च्य शरीरं, यस्य कस्यापि कोमलकपोलपृथुकस्य कपोलं करेण स्पृष्ट्वा, कदाचिच्च केनापि ग्राम्यनायकेन करधृतरूप्यकं विहस्य भ्रूभङ्गेण सलीलं गृहीत्वा, कदाचिच्च मुमूर्षुरिव मुखादस्पष्टतीव्रध्वनिं कृत्वा, भूमौ निपत्य सहसैवोत्प्लुत्य क्वचित्तीव्रं क्वचिच्छनैर्याति।

वाद्यानन्तरमेव किशोरद्वयं स्वीकृतनर्तकरूपमायाति। अस्मिन् नर्तकद्वये एको नर्तकीरूपमङ्गीकृत्य नृत्यन्नायाति। अस्य नेत्रचाकचिक्यकारिणी पीतवेशभूषा, वक्षसि कन्दुकद्वयसहितकूर्पासकम्, चक्षुषोः कज्जलम्, शिरसि कृत्रिमा वेणी, अधोभागे चण्डातकम्, पादयोः

पादपालिके, कपोलयोः पाटलद्रव्यम्, अधरयोः रागः मणिबन्धयोः काच-लौह-कङ्कणानि, कण्ठे लघ्वी मालिका, चेतसि पुरस्कारप्राप्ति-चिन्ता, तनौ चाञ्चल्यं, नयनयोः कामविकारः—इति सर्वं विलोक्यते प्रबुद्ध-प्रबुद्ध नागरिकैः। केचन अमुमेव चित्रतुरगन्यायेन मन्ये षोडशीं मन्यमानाः मुहुर्मुहुः कामाभिभूता इवावलोकयन्ति कृतमनःसङ्कल्पाः। अस्य च द्वितीयः सखा नर्तकवेशेण मनो हरति दर्शकानाम्। अस्य शिरसि कृत्रिमसुवर्णतारखचितं जटितमिव शिरस्त्राणं, पादयोः सुवर्णवर्णमुपानद्युगलं, तादृशी एव भूषा। नर्तकद्वयमिदं कदाचित् गीतानुरूपं, कदाचित् कांस्यपात्राणि गृहीत्वा, कदाचिद् दीपद्वयं गृहीत्वा कदाचिदुत्तरीयमुद्धूय नृत्यति। अस्य अङ्गसञ्चालनं, तत्रापि नितम्ब-कटि-वक्षसां विशेषचालनं कम्पनञ्च नितरां ग्राम्यमपि कलापूर्णं, अभ्याससाध्यं श्रमसाध्यञ्चास्ति। अस्य युगलस्य मुखवाद्य-मपि पूर्वोक्तेन वाद्येन पृथगस्ति। तत्सङ्केतेनैवास्य कार्यक्रमः चलति।

एते चान्यायोपार्जितवित्तास्ताम्बूलपूरितदुर्मुखाश्चौरा इव चकिताः कञ्चुककोषान्निष्कास्य नवीनं पत्रमयं रूप्यकं तर्जनीमध्य-माभ्यामेव धृत्वा, वरगण्डान्तिकं कृत्वा, तमेव पूर्वोक्तं वाद्यवृन्दनायक-माकारयन्तीङ्गितेन वरयात्रिणः। अयं वरस्य जनकः पुत्रविवाह-जनितानन्दं लब्धव्ययधनराशिविचारेण गौणत्वमापादयन्, लम्बोदर-लम्बितकञ्चुकं चालयन्, दुर्विनीतवेशः, कदाचिद् वाद्यं, कदाचिन्मित्रमण्डलं, कदाचिदात्मजं विलोक्य, कदाचिच्चेतस्ततो दृष्टिं पातयन्नायाति। सन्त्येते वरयात्रिणो मन्ये भूतभावनविवाहयात्रिणः। अत्रापि कश्चन द्विजिह्वो द्विजिह्वप्रियः, कश्चन विभूतिप्रियो वृद्धग्रीव इतरो बृद्धकीटोदरः, परो गोमुखोऽपरः प्रवृद्धकूर्चोऽन्यः खञ्जः खल्वाटो विषमनेत्रो दीर्घदशनोऽदन्तः। कश्चिद् वृकोदर इव वृकोदरो, नकुल इवाकुलीनो, गज इव लम्बनासिकः, खर इव दीर्घकरः, प्रातिपदिक-मिवाप्रत्ययः, चित्रमिव विविधवर्णः, सुरधनुरिवं सङ्कटवारिदसूचको, निशाकाल इवामित्रोऽग्निरिव करालकरश्शशीव कलङ्कधरश्शनैश्चर

इव शनैश्चरः, पाण्डुरिव पाण्डुर्दुर्योधन इव दुर्योधनो भीम इव भीमो दुःशासन इव दुःशासनो, मङ्गल इव कुपुत्रः, समुद्र इवाज्ञानभेदः, काक इव बलिप्रियः, पिशिताशन इव पिशिताशनस्ताम्रचूड इव ताम्रचूडः, पुराणमार्ग इव साधारणजनपादप्रहारताडितो, मृत्युरिव सन्निपातप्रियः, रस इव सव्यभिचारी, वैयाकरण इव सन्धिविच्छेदप्रियः कस्य न चेतश्चमत्कृतिमुत्पादयति ?

इदञ्च वराश्वस्याग्रे यौवतमेकं चलति। अस्मिन् वह्व्यो युवत्यो विविधवेषसज्जासुसज्जिताः जिततरुणहृदयदुर्गाः गात्रसञ्चालनक्रियानिष्णातास्ताम्बूलकृत्रिमरागादिभिर्मदनवर्द्धकै रञ्जिताधरोष्ठ्यः, कज्जलकलितापाङ्गाः, अर्द्धदर्शितपयोधरभागाः, काश्चन बहुमूल्यकञ्चुकीभिरेव स्तनोत्तुङ्गत्वं प्रकटयन्त्यः शुष्कस्तन्यो, दर्शितनाभिमण्डलपरिधानाः, कङ्कणकलितेषु करकमलेषु अर्द्धपीतानि प्रपानक-पेय-कोकाकोला-फैण्टा-लिम्का-मैरेय-कांचपात्राणि गृहीत्वा पौनःपुन्येन पिबन्त्यः, काश्चन बाहुमूलानि किञ्च तत्रत्यानि वृद्धलोमान्यपि उद्घाट्य प्रदर्श्य च, कदाचित् करताडनपुरस्सरं वीभत्सं हसन्त्यो नृत्यन्ति। कदाचित् उत्प्लुत्य कदाचिन्नितम्ववक्षोजौ प्रकम्पयन्त्यः, कामोपभोगसुलभान् यूनो मदविकृतेन नयनेनैव व्यथितान् विधाय, धृतप्रसेवकाः, काश्चन स्थूलकृत्रिममुक्ताहारयुक्ताभ्यां पयोधराभ्यां किञ्चिन्नम्रभावाः, काश्चन मुक्तदीर्घकेश्यः, काश्चन धम्मिल्लशोभिता नितम्विन्यः, काञ्चीदामदमितजघनाः, स्वैरं गच्छन्ति। अत्रैव काचिन्नभोमण्डलं त्यक्त्वा समायातेव शशिकला नयनहरी निशिसुखदा, काचिन्मत्तसङ्कर्षणसीराकर्षणभयतरङ्गितेव यमुना, काचिन्नयनाभ्यां मीनवती गम्भीरावर्तनाभिः गङ्गेव, काचिन्मदविवशरागानना रक्तपरिधानेव सरस्वती, काचित्सौन्दर्यसारा वहुभिर्निरीक्ष्यमाणा रतिरिव, काचिन्मदविह्वलाक्षैर्निपीयमाना सुरासुन्दरी, काचिद्गानस्तब्ध-

कर्णेव मृगी, काचित्स्थूलजघना मन्दं मन्दं चलन्ती विवशेवावशा, काचित्सुगन्धद्रव्यविलेपनात् समन्तात् स्थितान् भ्रमरभुजङ्गान् आकर्षन्तीव पद्मिनी, काचिद् गौरिव सरला, कापि भुजगीव कुटिला, कापि यक्षलक्ष्मीरिव सखी-परिचारिकाभिरुपशोभिता, कापि मन्दस्मितेन हरन्ती हृदयानि, कापि विक्षिप्तेवेतस्ततो नगरशोभानिरीक्षणव्यस्ता काचिद् वृथापरिश्रमश्रान्तकलेवरेव स्खलन्ती, कापि क्षुत्क्षामा।

अस्तीह नर्तकसमूहः, यश्च मन्ये नूतनो वृहन्नलावतार एव भुवमध्यास्ते। अत्र हि केचनातिसङ्कुचितवासोभिः परिरुद्धाः, केचन चण्डातकानुकारिभिः पैण्टाख्यैः अधोवस्त्रैः आच्छन्नाधःकायाः, विषमशरताडिता इव, निर्भिन्नहृदया इव, मूका इव, बधिरा इव, स्वयमेव परितो दृष्टिपातं कुर्वन्तो नृत्यन्ति नितम्बसञ्चालन पराः 'ट्विस्ट' प्रिया नवशिखण्डिनः। किञ्चैते मण्डलभ्रमणका अल्प-प्राणा इवाल्पप्राणाः खरा इव प्रखरा वद्धग्रीवाः इव बद्धग्रीवाः, क्रमेलका इव लम्बग्रीवाः कण्टकप्रियाश्च पुच्छविषाणहीना दर्शं दर्शं जनसमूहं नृत्यं विडम्बयन्ति। एतेषां केषाञ्चिच्चलन्नितम्बानां रीतिरनुचितनृत्यमुद्रानिन्दिता दृष्टिः पैशुन्यं मानसस्य, दैन्य-माननस्य, मालिन्यं क्लैव्यञ्च स्वभावस्य चाञ्चल्यं वक्रगतिश्च-पादयोः—एतत् सर्वं कं सहृदयं नोत्तेजयति ?

एषु नर्तकेषु केचन क्षीणकायाः कङ्कालाकृतयः सम्भोगं, आलिङ्गनं, नखक्षतं, स्तनमर्दनं, वलात्कारं, सुरापानं, अवगुण्ठनं, लज्जां निर्लज्जाः प्रस्तुवन्ति मुद्राभिः। रामाराधितहृदया नैते लक्ष्मणाः, मधुप्रिया अपि न कामाः, कुमारा अपि मारवेगविक्षिप्ताः, लब्धसुरानन्दा अपि असुरानुगुणाः, लघुविग्रहा अपि वृद्धविग्रहाः हन्त ! चाकचिक्ययुतैरवलोक्यन्ते भुजङ्गा अपि मणिगुणहीनाः।

न जाने कस्य किल्विषस्य परिणामो यदेतेषु कुलकलङ्केषु

कुलाङ्गारेष्वनधीतशास्त्रेषु निन्दितगुरुजनेषु सञ्चितदुराचारेषु कृतमधुपानेषु भुजङ्गेष्विव विषमयकलेवरेषु कुटिलाकारस्वभावेषु श्रुतिहीनेषु, निशाचरेष्विव निशाचरेषु, खण्डितयौवनेषु, भग्नदन्तेषु, गतसंस्कारेषु, निन्दितचरित्रेषु मृतप्रायेष्विवाभारतीयेषु, क्लैब्यमेतदायातम् ? नैते लज्जामनुभवन्ति कृत्वापि दुर्जनचरितम्। न कदाचिदपि भवति एतेषु स्वाभिमानलवलेशो, न च भारतीयता, नैव पुरुषत्वं न च सहृदयत्वम् ।

नर्तकमण्डलेन साकं चलति एष गायकः। अयमपि तारतरस्वरेण चलच्चित्रगीतानि गायति। अस्य दक्षिणकराग्रे ध्वनिविस्तारमुखयन्त्रं माइक्रोफोनाभिधमस्ति। चक्रचतुष्टयविराजिते उद्घोषकसज्जिते, विद्युद्दीपदीपिते, धूम्रपानधूमधूपिते शकटे अयं वराक उदरंभरिर्गायकाधमः स्थितः। निरन्तरगानपरः कदाचिदयं वरयात्राकालप्रतिकूलान्यपि वैराग्यकारुण्योत्पादकानि गीतानि गायति। अस्य गन्धर्वत्वं कर्णावेव पीडयति न तु प्रीणाति हृदयम् ।

पञ्चसु 'कार'यानेषु काश्चन दुर्बलाः, शिशुसमेताः मातरः स्थिताः। केचन अबोधमुग्धाः दुग्धमुखाः अङ्गुष्ठमुद्रितमुखा बालका अपि एतेषु स्थिताः। एते मार्गभ्रष्टा मा भवेयुरिति कृत्वा मन्ये स्थापिताः बालाः यानेषु ।

तदनु एते वराका बालयवना न्युब्जीकृतकलेवरा वृद्धा इव नम्रकन्धरा देवतानां दीर्घचित्राणि स्कन्धेषु निधाय, तद्विनाशभयभीता, मनसि द्रव्यचिन्ताचिन्तिता इव केनापि प्रेर्यमाणा दीना व्रजन्ति ।

अनन्तरमेष वर आसन्नमृत्युरिवाचञ्चलः, कल्किरिव सघोटकः, सापराध इव मालाजालजटिलः, कुमार इव सुकुमारः, संग्रहालय इव वस्त्राणाम्, वध्यस्थलं जिगमिषुरिवामूल्योष्णीषशोभितोत्तमाङ्गः, युवावस्थादोषजनितदौर्बल्यमन्तर्मुखं निरन्तरदन्तचालनेन प्रकटयन्

अगूढजत्रुर्बद्धकण्टकौपीनो ग्रीष्मकालेऽपि दीर्घाङ्गरक्षकं कोटाख्यं धारयन् तस्यैव कोषे मुखप्रोञ्छनपटमर्द्धं निष्कास्य मणिवन्धधृत-विवाहकौतुकमपि स्वासामर्थ्येन पटपिहितं कृत्वा वृद्धमुखं वैलवाटम पतितलूनं (पतलूनं) परिधाय, बृहन्मुखमुपानद्युगलवेष्टितमिव पादयुगलं घोटकालम्बितलौहशृङ्खलाखण्डे कृत्वा, किञ्चिद्विहस्य, वद्ध इव, रुद्ध इव, यौवनसुखमकालकालकवलितं कृत्वा नम्रपृष्ठ-भागः, कराभ्यां कविकाकर्षणं कुर्वाणोऽट्टालिकोपरि प्रतिष्ठिताभिः प्रौढाभिरालोच्यमानो, अरठाभिः सस्पृहं सदयं सहासं सकम्पमभि-लक्षितः, उद्भिन्नयौवनाभिः नूनमधीतनायकगुणसमूहाभिर्युवतीभिः सस्पृहमीक्षितः, पूर्वं द्रागेव परिवर्तितमुखीभिश्शङ्के तिरस्कृत इव, कैश्चन स्वास्थ्यसंवर्द्धकैः सहासमवलोकितः कदाचिदूर्ध्वं दिदृक्षु-राकर्ण्य भुशुण्डीशब्दं भीतभीत इव भूयः सम्मुखमेवावलोकयति।

सर्वान्ते चैते चलदीपाधारभूता इव, अविद्योपासका इव अन्धे तमसि मग्ना, अर्थाभावभूताः क्लिष्टाप्रसिद्धशब्दा इव, मलिनाम्बरा, मूर्तदैन्याः, कम्पग्रीवाः, सन्तोषधना, योगिन इव विजिताभिलाषा, भोगिन इव कृष्णवर्णाः, शिरःस्थितमणिदीपा, विहाय स्वकीयं गृहं, हित्वा परिवारं, त्यक्त्वा मोहराशिं संन्यासिन इव चलन्ति।

गता चेयं वरयात्रा। अनुजानीहि भो घण्टागृह !' मां गमना-यावतरणाय च।

(३) काल-महिमा

अहह कराल काल ! तावकीनं कौटिल्यम्, तव कला कलाप-प्रभुत्वम्, तव परपीडनपाण्डित्यम् ! कोऽस्ति तव महिमानं समग्ररूपेण

ज्ञातुं गातुं वा शक्तः ? एतानि कानिचित् त्वदीयानि विचित्राणि चित्राणि यान्येव दर्शं दर्शं स्मारं स्मारं तव सामर्थ्यं जगत् चाकचिक्ययुतमिवात्मानं मन्यते ।

नवदम्पती ! विवाहानन्तरं वर्षत्रयं व्यतीतम् ! पुत्ररत्नाकरो दृष्टः । काकलीकलितं तदाननं पश्यन्ती तन्माता तस्य स्तनन्धयतां सफलीकरोति । सहसैव शिशुर्विरमते दुग्धपानात् । सत्यपि पयःस्रावे नायं पिवति । मन्दभागिनी वराकी किंकर्त्तव्यविमूढा चीत्कारं करोति । पयसा विषचरितमाचरितम् । पलमात्रे परिणतस्तस्याः संसारः । जीर्णारण्यमिव जीवनम्—इदं किं त्वदीयमेव नास्ति कौटिल्यम् ?

× × ×

नायिकया साकं जलकेलिमग्नो नायकः । महाबलीपुरस्य समुद्रतटी । क्षारजलोत्थिते फेनपटले नायकस्य शोभां युवतिः साभिप्रायं निरीक्षते । समुद्रलहरिकासु तयोः प्रेमप्रवाहो विस्तारमाप्नोति । सहसैव प्रबलतरङ्गाघातप्रतिघातविचलितो युवाऽपारसागरं गतः । लब्धज्ञानेव युवती स्फारितनयना शून्यं पश्यति—किमिदं तव चातुर्यं कृपणकाल !

× × ×

प्रेम्णः परिणतिः । न्यायालये विवाहः । हरिद्रयैव विना रागः । कन्याजनकः स्ववक्षसि वज्राघातं सहते । अनभीष्टमपि अवरमपि वरमेव मन्यते । किं कर्तुं शक्यते ? पञ्चषा दिवसा गताः । श्रूयते सा विषं भुक्त्वा पत्रमेकं विलिख्य, स्थापयित्वा च पञ्चत्वमुपागता । तद्भर्ता शृङ्खलाबद्धः कारागारं निषेवते । अयमपि काल ! तवैव महिमा ।

× × ×

गतिमत् धूम्रयानम् । प्रथमश्रेणीकक्षे आरक्षितो यात्रिकगणः । निशीथः । मध्य एव काचिन्नदी समापतति । तत्सेतुभङ्गः ।

धमद्धमद्ध्वनिना आयाति धूम्रयानम्। घोरघोषसमेता जलराशौ निमज्जन्ति एञ्जिनेन सहिताः कक्षाः। केवलमन्तिमौ द्वौ अवशिष्येते। तयोः सन्ति कर्मकराः सर्वथा सुरक्षिताः। यात्रापत्राणि तेषां स्वामिनैव साकं जलसमाधिं स्वीकुर्वन्ति। क्रूरग्रह! कथय न को दोषस्तेषां मृतकानामकालकालकपोलकवलानाम्?

× × ×

अयि कलहप्रिय! अकालकाल! महाभारते तवैव प्रभुत्वमवलोक्यते। भीष्मद्रोणकर्णप्रमुखाः प्रवीरा धार्तराष्ट्राश्च व्यापादितास्त्वयैव। दुर्योधनोरुभङ्गकारिन्! निर्दय! गोपीरक्षणतत्परोऽर्जुनो भिल्लैः सन्ताडितः। त्वमेव तत्र भिल्लोऽसि नान्यः कोऽपि। भारतनायकः कृष्णो व्याधेन बाणेन हतः। हिंसामूर्ते! ननु व्याधस्त्वमेव।

× × ×

कुटिल परीक्षक! निरक्षरानुच्चासनस्थान् करोषि? वसन्तसमयमिव पण्डितसमाजं अजाऽति चिकीर्षसि। रजकास्त्वयैव भाग्यविधातारः क्रियन्ते। उपानत् त्वयैव शिरस्त्राणीक्रियते। भालतिलकं त्वमेव भूमौ निक्षिपसि। कुशासनं त्वत्कृपाकटाक्षेणैव भवति शवासनम्। सोरस्ताडं तवैव क्रौर्यस्वीकृतिः। अहह। अन्धतापसकालरूप! किं त्वमेव दशरथत्वेन नासि अवतीर्णः श्रवणान्तक! सीताविवासनपटुस्त्वमेव रामस्त्यजसि लक्ष्मणम्।

× × ×

कदाचिन्माययाश्लिष्टं भुवनं त्वत्कृपयैव शोभनं भवति। एषणासु पतितोऽपि पुमान् जीवति, मिथ्याश्वासनैः श्वसिति। मुग्धशिशव इव जनास्त्वामेव पितरं मन्यन्ते। प्रचण्डग्रीष्म! त्वत्प्रतापेनैव पयसि विषत्वमायाति। जघन्य। कालहतक! हतास्त्वया सरलाः, पालिता भुजङ्गाः। जनतापहारिन्! सञ्जयस्त्वद्रूप एव न किमु? निगडबन्धघोषणाभिस्त्वमेव किन्न पीडयितुमिच्छसीन्दिराम्? त्वत्प्रणोदिता एव नेतारः स्वच्छन्दाचरणलम्पटा गच्छन्ति कारा-

मन्दिरम् कृष्णसुदर्शन ! न जहासि कमपि अश्वत्थामानम् ?

महदाश्चर्यन्तु इदम्, कोऽपि तव नाम न गृह्णाति। निमित्तान्येव नयनपथमायान्ति, न त्वम्। प्रलयरूप ! कृतमान्ध्रेषु जलप्लावनं त्वयैव। इन्द्रप्रस्थोडीसाविहारबंगेसु त्वदीया विनाशलीला कथं वा विस्मर्यते ? नाशे त्वदीया वास्तविकी शक्तिः। पातयसि यानानि पर्वतगर्तेषु त्वमेव। त्वदतिरिक्तः कोऽस्ति वायुयान-विध्वंसकः ! आशापोतभङ्गपुरःसरं मज्जयसि जीवान् संसारार्णवे। त्वं कालः। त्वमेव कालमृत्युः। त्वमेवाकालमृत्युः।

× × ×

बन्धो ! काल ! महाकाल ! विकराल ! त्वमेव हिरोशिमा-नागासाकीवियतनामअंगोलाप्रभृतिषु देशेषु विध्वंसकास्त्राणि परमाण्वस्त्राणि क्षिपसि। तत्र त्वमेव वर्बरशासकः बंगदेशनिर्माणं तवैव चातुर्यम्। भारतविभाजनं तवैव विलक्षणा कृतिः। देशोद्धारकस्त्वमेव, देशघातकोऽपि त्वमेव।

अरसिकस्त्वं साहित्यं नैव रक्षसि। अदीनस्त्वं सर्वदैव दीनान् दूषयसि। कृपणस्त्वं दीनवचांसि नैव शृणोसि। निष्कृप ! कृपाणे तवैव वासः। लोकमरणं तव विलासः। जन्म तव कुटिला लीला। विनाशः प्रकृतिः। करालजिह्व ! लीलयसि जीवजगत् त्वमेव। पीडा तव हासः। रोगास्त्वद्वान्धवाः। भूस्खलनं तवैव गतिः। प्रभञ्जनस्त्वच्छ्वासः। पीडितानां नेत्राश्रूणि त्वत्कृते जलाञ्जलयः। अङ्गरागेण इव शरीराणि सविकाराणि त्वयैव क्रियन्ते। जलानीव जडान्यपि त्वयैव क्षारीक्रियन्ते।

नेत्रापहारिन्। दुष्टाञ्जनरूप ! तीक्ष्णार्कदुग्धसहोदर ! अन्धं करोषि जगत्। विरूपाक्षस्त्वमेव कामं यथारुचिनर्तयसि। चक्रधर ! सिंहिकासुतं अमरमुखं करोषि। सज्जनान् पीडयसि भृशम्। दुष्टान् संवर्द्धयसि भोः कृतघ्न। भगवत्पराः क्रियन्ते त्वयैव

विधवाः। कुलटाः सर्वविधसुखैः रक्ष्यन्ते। कालोऽस्मीति गीतोक्तं तव वचः पारमार्थिकमवितथमिति किमतः परम्! नास्ति तव महिम्नः पारम्।

(४) पूर्णकुम्भः

अथैकादशतारिकायां जनवरीमासस्य सप्तसप्तत्युत्तरैकोनविंशतितमे खृष्टाब्दे प्रातरेव मन्दं मन्दं गर्जत्सु वर्षत्सु च मेघेषु रिक्शायानमधिरुह्य समागतोऽहं धूम्रयानविरामस्थले शिवारण्यपुरस्य[1]। अष्टावन्तेवासिनोऽस्मदीया अपि तत्रासन्नस्माकं प्रतीक्षायाम्। कालेन प्रचलिते याने वहुभिर्गङ्गादेव्या जयकारः कृतो, येन सकलो यात्रिकलोक उत्कर्ण इव, चमत्कृत इवाजायत। सत्यप्यारक्षणेऽस्माकं कक्षे सर्व एवारक्षिता इवातिष्ठन्। कस्य स्थानं क्वास्ति, कस्य वा सामग्री क्वेति ज्ञातुं कस्यापि सामर्थ्यन्नासीत्।

धूम्रशकटिकाऽपि मन्ये लोकभाराक्रान्तेव, महाभोगेव भुजगी, तमोगुणस्य क्रूरसेनेव, मूर्तिश्शनेरिव, कलिरूपीणीव, शुष्कतां स्थूलतामागतेव कालिन्दी, दक्षिणतो गच्छन्त्युत्तरं सम्भोगखिन्नोरगीव, अरण्यं त्यक्त्वा जनसङ्कुले कोलाहलपरिपूर्णे नगरे गन्तुमन्यमनस्केव, पञ्चाग्नितपस्तप्तेव तापसी, पितृवेश्मनो गृहीता वलान्नीयमानेव दाक्षिणात्ययुवती, राहुशिरश्च्छेदरोषदग्धे सिंहिका, पापानि पुण्यसलिलायै भागीरथ्यै निवेदयितुकामेव, पापभारभीतेव मन्दं प्रचलिता 'इलाहाबाद एक्सप्रैस' नाम्नी मन्दगामिनी वराकी।

---

१. सहारनपुरस्य

द्वादशतारिकायां नववादनकाले प्रातस्त्यक्ताऽस्माभिश्शकटिकैषा। अस्मान्विहायैव क्रूरहृदयेव, पुंश्चलीवार्थप्रियेव वारवनिता, नवरसरुचिरिव भ्रमरमाला, त्यक्तस्वार्थेव, मानिनीव गता 'इलाहाबाद' नगरं प्रति। वयञ्च लब्धश्वासा अपरस्या आगमने प्रतीक्षापरास्तत्रैव 'प्रयाग-स्टेशने' स्थिताः। ततोऽप्येकादशवादनकाले चलिता वाष्पशकटिकयाऽन्यया। दशक्षणैरेव 'प्रयागघाट' इति स्थाने अवतीर्य तस्य विश्रामस्थलस्य नवनिर्मितस्य शोभां निपीय नयनाभ्यां भारवाहकैः साकं बहिरायाताः प्रदर्श्य तत्रस्थान्नियुक्तान्पुरुषान् विसूचिका-प्रमाणपत्रम्। बुभुक्षाऽऽसीत्। क्षुधार्त्तानामस्माकं कृते तदा कपाटा अपि पर्पटा आसन्। यथारुचि भुक्त्वा, पीत्वा च पानीयमरक्षितप्रायेण 'रिक्शाभासेन' यानेन कुम्भनगरमायाताः। कुम्भनगरं पर्वकाले पूर्णकुम्भेऽस्थायिरूपेण निर्मितं विस्तृते भूखण्डे।

त्रयोदशतारिका प्रत्यागमनार्थं व्यतीताऽऽरक्षणे। मकरसंक्रान्तौ सत्यपि गङ्गातटे तद्दर्शनान्यपि दुर्लभानि जातानीत्यखिद्यतास्माकं चेतः।

चतुर्दशतारिकायां प्रातर्नववादनकाले सङ्गमावगाहनार्थं स्वकीयाद् 'भारतस्काउट एण्ड गाइड्स उत्तरप्रदेशमण्डपात्' गताः। राजमार्गे गतागतानां स्त्रीपुरुषाणां गमनागमनं व्यलोकि। विविधेभ्यः प्रान्तेभ्यः समायाताः केचन वद्धोष्णीषा लम्वकूर्चाः श्मश्रुवन्तो धृतयज्ञोपवीताश्चन्दनतिलकभूषिता गृहीतगङ्गाजलपात्राः, केचन मुण्डितकेशा वद्धशिखाः, अस्थिपञ्जरावशिष्टाः, केचन लम्वोदराः परद्वेषविषयाः, केचन वामना अन्यैरुत्कन्धरैरनवलोकिताः, प्राणभिया त्वरितं गच्छन्तः, केचन सकमण्डलवः समुद्रतरङ्गा इव तटाभिलाषाः, केचन जनसम्मर्दमृदितसम्पिण्डिताङ्गा गौराः सोत्तरीयाः कालाः दाक्षिणात्या, आन्ध्र-राजस्थान-विहार-गुर्जर-बंग-मध्यप्रदेश-कर्नाटक-कश्मीरस्थाः सवधूकाः समातृकाः सपितृकाः सहर्षं सेर्ष्यं सशैथिल्यं सोत्साहं सनिर्वेदं यथावसरं यान्ति।

येन केन प्रकारेणाघातेषु पतन्त उत्पतन्तः सङ्गमस्थलं प्राप्ताः। तत्र मन्ये गम्भीरनीरा कालिन्दी स्वगाम्भीर्येणैव मन्दं जिगमिषति। जाने स्वसैकते भगवतो नन्दनन्दनस्य व्रजाङ्गनावल्लभस्य मधुद्विषः केलिक्रियाः संस्मृत्य संमुखस्थां भगवतीं भागीरथीं विलोक्य पुरातन-मोहाविष्टेव, मन्दप्रभावेवाग्रे पृष्ठतो वा गन्तुमशक्तेवोद्भिन्नयौवने-वानुजाग्रजां समक्षमवलोक्य स्तम्भितेव कच्छपगतिं गृह्णन्तीव, क्वापि कालियविषमूर्च्छितेव, एतावन्तं जनलोकं विलोक्य चमत्कृतेव, स्वनाशभयभीतेव याति यमुना। इतश्च गङ्गाऽनुजानिरीक्षणार्थमेव मन्ये द्रुततरमायाति। दुग्धविषयोर्ज्योत्स्नाकृष्णमेवयोः सङ्गतिरि-वायं सङ्गमः।

यमुनायां सरस्वती-तटात् सहस्रद्वयमिता नावः सङ्गममायान्ति ततश्च यान्ति। मन्ये स्वभुजैर्भगवती कलिन्दतनया गङ्गा कण्ठा-श्लेषं चिकीर्षति। गङ्गायमुनयोस्तटेष्वसंख्यातानि नरमुण्डकान्येव दृश्यन्ते। निमज्जन्त उन्मज्जन्तो जना एकस्मिन्नप्यवगाहने स्वर्ग-सोपानप्राप्ति मन्यमाना मुहुर्मुहुः स्नानमाचरन्ति।

वस्तुतः कुम्भाख्यं पर्वास्ति साधूनामेव। अथैतेषां दर्शनाय भवन्तोऽपि सादरमामन्त्रिताः। आगम्यतामवलोक्यताञ्चास्माभिः सहैव साधुसंसारः। इयमेका साधुसेना समायाति। एतेषु कोऽपि खलीनकटकरहितमेवाश्वं वाहनीकरोति। कश्चिद्दीर्घदशनः, कश्चि-न्निर्दय इव क्रूर इ. कृपाणपाणिः, कश्चित् पदातिरेवोत्प्लुत्य कपिरिव याति, केचन दर्शनोत्सुकां भक्तश्रेणीं स्वकृपाकटाक्षेण तोषयन्त-श्चलन्ति, केऽपि परशुना जामदग्न्यवपुर्विडम्बयन्ति, केचन यमितजटा केचन लम्वजटा. केचन कौपीनगुप्ताङ्गाः। सर्वान्ते चैतेषां सम्प्रदाय-गुरुश्शिविकारूढः कृत्रिमस्मितेनाभयमुद्रया चालङ्कृतः सिष्णासुर्याति।

इयमन्या साधुमण्डलश्रीः। अत्र केचन रजतवेत्रदण्डहस्ता द्वारपाला इव विष्णुलोकस्य, केचन त्रिशूलधराश्शैवा इव, केचन

चन्दनचर्चिताः श्रीखण्डप्रिया इव, बहवः पद्मचारिणीमालिकाभरणा, केचन सम्प्रदायसम्मतानि तिलकान्यनेकरूपाणि ललाटपट्टेषु रचयन्तः, केचन कौशेयवाससः सन्ति। एतेषामेते सन्ति गुरुपादाः संरक्षकाः। एषामुपरि चामरकलाप उद्धूयते, सुवर्णतारखचितानि रजतदण्ड च्छत्राणि तन्यन्ते। अमीषामासनानि, रजतनिर्मिताशिशविकाः, अलङ्कृता गजाः, निर्मला दृष्टिः—इति सर्वं विलोक्य चमत्कृतं भवति चक्षुः।

एते च त्यक्तवस्त्रा दिगम्बराः, सर्वाङ्गलिप्तरजसो, मादकद्रव्याणि भुक्त्वा, कृतधूम्रपानाः, गृहीतविजयाः, स्वीकृततरितास्तमाखुसेविनः, स्वीय एव ध्याने चलन्तो निस्पृहा इव, लज्जादिभ्यः सभ्यशिष्टजनगुणेभ्यो बहिष्कृता इव घूर्णितनयनाः, केचनाल्पवयसो द्रव्यग्रहगृहीता इव, अर्धनिमीलिताक्षा अपि कामकलाशून्याः, महत्साधनसम्पन्ना अपि नग्नाः, नारीविरहिता अपि स्त्रीभिः सश्रद्धमवलोकिताः, सचन्दना अपि सतिलका, शक्तिसहिता अपि रिक्तहस्ताः, सश्रीका अपि भस्माङ्गरागाः, दोर्दण्डमण्डिता अपि शून्यकराः, दीर्घकर्णा अप्यखराः, काननरुचयोऽपि वनविहारानभिज्ञाः, नग्नपादा नागाभिधाना नागरूपा गच्छन्ति।

अत्रैवास्ति स्त्रैणमप्येकम्। गैरिकवस्त्रधारिण्य एता मुक्तजटाः, वलीमुख्यः इव वलीमुख्यः, कलेः कला इव विकलाः, सधवा विधवेति भेदमतीत्य संसारमोहं हित्वाऽऽत्मानं वञ्चयित्वा, यत्किमपि गायन्त्यो 'गुरोर्जयशब्दम्' उच्चैरुच्चार्य कृतसाहसग्लानिं गङ्गास्नानेन दूरीकर्तुमभिलषन्त्य इव यान्ति नानाकारस्वभावाः स्त्रियः।

एतेषामुपर्युक्तानां साधूनामियं यात्रा 'साई' (शाही इति पदस्य राजसीत्यर्थकस्य विकृतं रूपं) इति कथ्यते। इयं स्नानार्थं गता। साम्प्रतं कृतस्नानानेतान् साधून् दिदृक्षवोऽसंख्यजनाः स्थानं गृहीत्वोपविष्टाः स्थिताश्च। अधिकारिवर्गैरस्थायिमार्गा निर्मापिताः। लम्बकाष्ठनिर्मितेषु दृढरज्जुबन्धैश्च सुरक्षितेषु सर्वत्र सुमार्गेषु कर्तव्यपरायणाः स्वयंसेवका राजपुरुषाश्च लोकसहाय्यार्थं तिष्ठन्ति।

इतस्ततः साधुयात्रया साकं संवादप्रेषणपरा अधिकृतपुरुषा अश्वारोहा विनैव तारेण सर्वाः सूचनाः स्वाधिकारिभ्यो ददति।

दूरस्थिता एव भवन्तः स्नानानुमानमेतेषां कर्तुं समर्थाः। अनुमानतोऽवगाहनं कृत्वा त्वरितपदैरेव प्रत्यावर्तयन्त्येते। यथैव यान्ति तथैवायान्ति। कृताभिषेकाः क्रमशो गताः। गतेष्वेतेषु दर्शनोत्सुकानां भक्तिभावो द्रष्टव्यः। अनेके भूमिं स्पृशन्ति, बहवो रजःकणान् हस्ताभ्यां चिन्वन्ति, अन्ये लुठन्ति धरणीं, कियन्तश्चादरे वद्धाञ्जलयः केचनाश्रुपूरितनयनाः। साधुजनचरणधूलिदत्तचित्ता धन्या एते। किमतः परं वक्तव्यम्।

कुम्भनगरे इयमस्ति विपणिरेका विस्तृता। अत्र दैनिकव्यवहारोपयोगि सर्वमेव वस्तुजातं प्राप्यते। सर्वकारेण विषत्वेन घोषितानि धूम्रवर्तिकानामानि रूपाणि च विक्रीयन्ते। प्रत्यक्षमिह सुरापिता तु नास्ति तत्राक्षेपः कर्तुं शक्यते। अत्रापि मार्गेषु परिवार-नियोजनविज्ञापनानि, अनुशासनोपदेशः, श्रमप्रचारलेखपंक्तिः, पञ्च वा विंशतिः वा सूत्राणि, पुरुषेभ्यः शौचालयो मूत्रालयस्तथैव स्त्रीभ्योऽपि पृथगेवैतत्सर्वं लिखितमस्ति। नगरे सर्वविधभोजनं, विहाय मांसं, शाकं, मिष्टान्नं, चायादिकं नियतमूल्येनैव मिलति।

हरिजनतः शङ्कराचार्यं यावत्सर्वेषां मतानां सम्प्रदायानाञ्च स्थानानि सुरक्षितानि सन्ति। वंशनिर्मितानि कुटीराणि, केषाञ्चिदाधुनिकभवगतां बहुरूपाणां सुसमृद्धाः शालाः, कल्पवासप्रवृत्तानां वासकुटीराः, विंशतिशतीभुवां योगशास्त्रज्ञानां बृहदकाराः कारागृहा इव गृहा अत्याधुनिक सामग्रीपरिपूरिताः, क्वचिद् ब्रह्मकुमारिकाणांतच्छास्त्रसम्मतो वाग्व्यापारः, क्वचित्कस्यचिद्भगवतः शिष्याणां कोलाहलः, क्वचित्केचन धर्मोपदेशका अधार्मिकाः, क्वचिद्विदेशेभ्यः समागता गौराङ्गा कृतभारतीयवेषा रामकृष्णसमुपासकाः, आंग्ल-

भाषाविशारदाः, क्वचिद् गीताभारती, क्वचिद् वेदध्वनिः, क्वचिच्छतचण्डी, क्वचिन्महाभारते शास्त्रार्थः, क्वचिन्मूर्तिमतीवाकाशवाणी उच्चकाष्ठासनोपविष्टा, क्वचिदस्पष्टो घोषः, क्वचिद्विविधवाद्यसङ्गीतलहरिका, सत्यपि तीर्थस्थले विलाससाधनानि, परिवारनियोजनोपचारेषु निरोधो न तु चित्तवृत्तेः, सन्ततिच्छेदे लाभावलिः, पुस्तकपण्यवीथिकासु वेदादिशास्त्राणि, भारतादिचलचित्रान्तानि पुस्तकानि, क्वचित् कोकशास्त्र-बृहदिन्द्रजाल-यक्षिणीभैरवी सिद्धिकामसूत्र-प्रेमपत्रादीनि सुस्पष्टाक्षरवाच्यानि विलोक्यन्ते। मन्ये, अत्र समागतेभ्यः सर्वेभ्य एव भगवान्भूतभावनस्तीर्थरूपः पदार्थान् वितरति तीर्थरूपो दग्धोदरपूरणाय। न कोऽप्यत्र क्षुधार्त्तः। कश्चिद् गृह्णाति स्वयमेव, कश्चित्पापधीर्वञ्चयत्यन्यान् येन केनापि प्रकारेण।

अस्मिन् वर्षे गङ्गा प्रवाहद्वये प्रवहति येन गङ्गाद्वीपः सञ्जातः। तत्रैव गङ्गाद्वीपे सुरक्षाकारिताः राजपुरुषाः, कोट्टपालाः, न्यायाधीशाः सन्ति क्षेत्रानुरूपाः। उपरिष्टाद्वर्णितानि वस्तूनि सन्त्यत्रापि। मुख्यतः सम्मेलनक्षेत्रे रक्तकृष्णमार्गौ निर्मितौ। सर्वत्र शृङ्गाटकेषूच्चैः काष्ठमञ्चस्थिता राजपुरुषा, धृतवस्त्राः, सोष्णीषाः, सहजरूपेणैव गालिदानपरायणा अपि साम्प्रतं कोमलवाचस्तारतारं चीत्काराद् घर्घरस्वराः, कराग्रस्थितध्वनिविस्तारकवाग्यन्त्राः, सर्वदैव 'वामतः एकतो दक्षिणतः शीघ्रं चलन्तु चलन्तु-' प्रभृतीन् शब्दाननवरतमुच्चारयन्त अत एव वातपीडिता इव, निरन्तरसम्मुखदृष्टयो कृतानिमेषव्रतनिश्चयाः, केचन वज्रनिर्मितेषु सोपानपंक्तिसमालिङ्गितेषु मञ्चेषु दीर्घश्मश्रवो राजपुरुषाः परिभ्रमन्तः, क्वचिच्चतुष्पथेषु स्वयंसेवका बालचरा अहर्निशं हस्तसङ्केतदानपराः युवानः क्वचित्कामपि जरठां जर्जराङ्गीं गङ्गावगाहनैकविषयिणीं जीवितां जीवनमुक्तामिव केचन सेवाभावभरिता इलाहाबाद-विश्वविद्यालयीया एन०एस०एस०-छात्राः स्कन्धैर्गङ्गातटं प्रापयन्ति। किं किं वर्ण्यन्ते! सर्वाण्याश्चर्यकार्याणि सन्तीह! कोटिद्वयसंख्यातो-

ऽप्यधिका जनाः केनापि नाहूताः परं समायाताः स्वयमेवेति किन्नास्ति परमाश्चर्यविषयः ?

सम्मेलनक्षेत्रे एकोऽस्ति नियन्त्रणकक्षः। अस्मादेव स्थानादधिकारिभिः सम्मेलनस्य सर्वाणि स्थानानि गतागतानि च नियन्त्र्यन्ते। अस्यान्तिमे खण्डे दूरभाष-दूरदर्शनादीनि संलग्नानि। सर्वथा सुरक्षितोऽयं कक्षः। अस्यैव निकटे शिविरद्वये सम्मेलनतीर्थपरिभ्रष्टा अबालवृद्धा एकत्रिताः सन्ति। स्त्रीशिविरे सन्ति कन्याः बालास्तरुण्यः प्रौढा जरठाश्च। अत्रत्येषु सहायकेषु केचन लेखकाश्चित्रगुप्ताः, केचन लेखहराः, केचन संवादवाचका उद्घोषकाः, स्वशक्त्यनुसारं बुद्ध्यनुसारञ्च कुर्वन्ति साहाय्यम्। काश्चन स्त्रियोऽपीतस्ततः परिभ्रमन्त्यधिकम्। शिविरद्वयमेव दीनानाथविपन्नशरणमिव प्रतिभाति। ध्वनियन्त्राणामत्र सर्वदा कोलाहलो भवति। उद्घोषकेषु केचिद् ह्रस्वदीर्घप्लुतेषु कुर्वन्त्यनाचारम्। स्थानप्रयत्नभेदशून्या एते मुहुर्मुहु स्वशिविरसंस्थापकसंस्थाया नाम उच्चारयन्ति, पथभ्रष्टानान्तु प्रत्याहारविधिनैव, येन श्रुत्वाप्येतेषां वागाडम्बरं साधारणो जनो नैव समर्थोऽस्ति ज्ञातुं यत्किमेतैः कथितम् ? ईश्वरस्तेषां साक्षी केवलम्।

एतावति विस्तृते जनाकीर्णे स्थाने सत्स्वपि मिष्टान्नेषु निर्मक्षिकम्, सत्यपि पयसि मशकदंशाभावः, विद्युद्दीपमालिकास्वपि शलभानां लोपः, महत्स्वपि जनाघातेषु न चास्थिभङ्गः, कदशनेऽपि विसूचिकाभावः, कुमार्गगमनेष्वपि स्वमार्गानुसरणम्, विषपानेऽप्यमृतरसः, निम्नगास्नानेऽपि मनस्तोष इति चित्रमेव। यत्र च भैमीविरहपतित इव कश्चिन्नलः ससीत्कारमनवरतं रोदितीव लक्ष्यते। क्वचिन्निरोधो जनसमुद्रस्यार्गलाबन्धैः, परिवारनियोजनं प्रपत्रेषु न गृहस्थेषु, सहानुभूतिर्गमने न कष्टदशापतितेषु, स्नेहव्यक्तिः कृत्रिमालेपनसहितेषु मुखेषु न दीपहृदयेषु, बालापहरणमेकहायनेषु

न कामिजनेषु, कूपप्रपारामकथनं कथासु न प्रजासु, करदर्शनं तीर्थे न प्रभाते।

गङ्गाद्वीपस्य पूर्वस्यां दिशि तटस्थिते 'झूसी' ग्रामे समुद्रकूपः कस्य मनो न हरति? पुराणवर्णितमहत्त्वस्य, लोकवाचि चतुर्दशसहस्रवर्षपुराणस्य जलाभिलाषुकेभ्यो भीतभीतस्यात एव दुर्गैकशरणस्य, सर्वशुद्धस्य, पुण्यतोयस्य प्रकामं पीयते पयः पुण्यार्थिभिः। अयं हि कूपः श्रीमन्नारायणचरणारविन्दमधुव्रत इव सरसः, आदिमध्यान्तहीनविश्वेश्वरप्रभावात्स्वयमपि देवरूपो वर्तुलः, ब्रह्माण्डोदरमिव, गम्भीरादर्श इव गगनश्रियः, जलपरिपूर्णपातालतोरण इव, कामुक इवान्तस्तरलः, उत्खातबृहद्यूप इव भूमिखण्डः, निर्गतशिवलिङ्ग इवाचलतलः, उदधिसतीर्थ्य इव, त्रिविक्रमविक्रमजातः गर्त इव, पयः पात्रमिव वसुन्धरायाः, अमृतद्रवभृङ्गार इव रसातलदेव्या अवश्यमेव द्रष्टव्यः।

यमुनाया वामतटेऽशोकदुर्गस्य संरक्षकत्वेन शेरते भगवन्तो हनुमन्तः। मन्ये रामराज्यकालेऽतिक्रान्ते विगतचिन्ताभराः स्वच्छन्दं ससुखं तुरीयावस्थायां रामध्यानपरास्तिष्ठन्ति। एतेषां ब्रह्मस्वरूपाणां दिव्यप्रभावाणां दर्शनैः कियन्तः पुण्यवन्तः सुकृतार्जनं न कुर्वन्ति।

चतुर्दशतारिकातः षोडशतारिकां यावदेतत्सर्वं सम्यग् विलोक्य सप्तदशतारिकायां वयं स्वगृहमागताः। प्रत्यावर्तने समापतितानां क्लेशानां विस्तरभियोल्लेखो न क्रियते।

कुम्भनाम्ना प्रसिद्धस्य विश्ववन्द्यस्य महत्तमस्य सम्मेलनस्य रूपं विश्वरूपायते। अस्य दर्शनं, अस्य कथाश्रवणं यथामति यथाशक्ति यथाकालं कार्यमित्येवोक्त्वा विरम्यते।

(५) नैनीतालश्रीः

सप्तसप्तत्युत्तरैकोनविंशतिशततमे ईशवीये वर्षे जूनमासे शीतला-क्षेत्रादागच्छता गृहं, मया नैनीतालदर्शनेऽरुचिरुत्पादिता। भवालीतः 'वस'यानेन रूप्यकत्रयेण घण्टार्धेन च प्राप्तो गन्तव्यमहम्। वसविश्रा-मस्थलान्नातिदूरादेव मलिनाम्बरा अपि अप्रावृड्दिवसा, धृतशिर-स्त्राणा अपि दर्शितशिरोरुहाः, श्रमवन्तोऽपि दारिद्र्यमूर्तयः, सरल-हृदया अहर्निशं विविधजनसम्पर्कपरायणाः सत्यधना मितभाषिणो दृढरज्जूपहिता अपि बन्धनरहिताः, न्युब्जीकृतगात्रा अपि दृरमेरुदण्डा अनवरतपाषाणभूमिगतागतैः पाषाणा इव ग्रीष्मशीतवर्षासु अचलाः, धर्मराजकिंकरा इव विविधरूपाः पर्वतपुत्रा भारवाहकाः स्वकीयं संख्यापरिचयलौहपत्रं वसगवाक्षेषु क्षिपन्ति, साकमेव यानेन धावन्ति 'कुली-कुलीति' ध्वनिनाकर्षन्ति यात्रिकचेतांसि। मलिनरूपमपि सगुणं तल्लौहपत्रं यदि केनचित् स्वीक्रियते तदा तेषामाननानि विकसितानि भवन्ति।

एतच्च यानं स्थितं स्वीये स्थाने। अवतरन्ति जनाः। भारवाहकाः स्थिताः। यथारुचि यथाक्रममेते समायान्ति गृह्णन्ति च आगन्तुकानां पर्वतश्रीदिदृक्षूणां वस्तुजातम्। पूर्वं तोलयन्ति नेत्रतुलया, तदनु हस्ताभ्याम्। अतः प्रारभेते एषां वाचो युक्तिप्रयुक्ती, "अयि वाबो! एतवतो भारस्य केवल पञ्चैव रूप्यकाणि ? नैव सप्त दीयताम्, षड् वा दातुमिच्छन्ति ? अस्मिन् समये किमायाति रूप्यके ? देहीति ब्रुवाणा भारं रज्जुभिर्दृढतरं बद्ध्वा भूमौ संस्थाप्य, स्वयमुपविश्य रज्जुपाशान् स्कन्धयोः, पेटिकाकारं दामखण्डं मस्तके कृत्वा चलन्ति मन्दपदैः। तेषामतिथिरयं पदातिरेव चलति।

'नैनीताल' इति नाम्ना प्रसिद्धस्य मुख्यया वृत्त्या तटाकरूपोऽर्थो बोध्यते, सत्यम्। सरोवरस्य निम्नस्तटस्तल्लीतालनाम्ना उच्चश्च

मल्लीतालाभिधानेन प्रसिद्धः। बसविरामस्तु तल्लीतालोपकण्ठ एव विद्यते।

अयं हि सरोवरः पर्वतदेवीनां वृहज्जलद्रोणीव पर्वतश्री-अभिषेक-पूत इव, सागरानुज इव, मानससहोदरः इव, तार्किक इवाज्ञातभेदः अतलवार्ताशुश्रूषुरिव तत्समीपं गतः इव भूतलः, अमृताक्षयभाण्डार इव, महानीलद्रवपरिपूर्ण इव, आदर्श इव गगनस्य, सागराणां मूलाकार इव, वारिमुचामतितमां साहाय्यसम्पादक इव, अचलश्रीप्रक्षालक इव, महाकारत्वादच्छोदानुकारी, अगस्त्य-अचलकरचुलुकाचमनीय इव सिन्धुः, अपरो नौकाबन्ध इव नगपतिललाटाभिषेकावशिष्ट-सलिलाशय इव, यादोगणैः परिवृत्त इव, वरुणालयः, नैनादेव्याः पूतनयननिर्मल इव, अपरिमेयजलराशिः। अस्मिन्निर्विकारात्मके चित्ते भाव इव, पाषाणखण्डेषु मणिरिव, गुरुनिन्दकेषु पुण्यव्रत इव, शब्दसमूहे सदर्थ इव, करुणावरुणालये हरावानन्द इव, नितरां राजतेऽपामोघः।

आगम्यतामनुभूयतामस्माभिः सहैव नौकाविहारानन्दः। तटस्थिता वयमाकारयामो नाविकं नागरिकवृत्त्या मृदुस्वरेण। मन्ये दाशरथिसेवापुण्यपवित्रवंशस्य कैवर्तस्य स्वाभाविकीं सेवावृत्ति स्मारं स्मारं नैते रामाराधननिपुणानां दलन्ति हृदयादि नौकर्ण-धाराः। आगता तरी तटे। आरूढा वयम्। प्रचलिता नौः। साम्प्रत-मवलोक्यतां नाव्यस्यास्य पयःपूरस्य लक्ष्मीः। स्वभावनिर्मलमपि गभीरत्वाद्धरितवर्णमिव, क्वचित् शोभाकलहंसानुजानां सम्पर्कात् कमलाननमिव, तत्पदपक्षव्याधूतं सोत्कलिकमिव यौवनं, क्वचितपर्वत-च्छायया श्यामायमानमिव, क्वचिन्नीलीरागरञ्जितमिव, नौका-भिरितस्ततः परिक्षिप्तमिव शोभते वारि।

जलविहारप्रियाः पुरुषचतुष्टयस्थानयोग्यासु उडुपाकारासु नौकासु प्रायशो द्वित्रा एवोपविशन्ति जनाः। केचन समित्रा इव

दिवसाः, केचन कृतनवोद्वाहा सवधूकाः, केचन भ्रमणार्थिनो नवबान्धवा धृतयायावरवेषाः, गृहीतस्वल्पाहारा नौकासनमधितिष्ठन्ति। काचिन्नौस्त्रिपुरुषैः कुन्तीव युधिष्ठिरभीमार्जुनैः, द्वाभ्यां माद्रीव नकुलसहदेवाभ्याम् विनतेवारुणगरुडाभ्यां, एकेनैव कैवर्तेन सिंहीव सुपुत्रेण केसरिकिशोरेण, चतुर्भिश्चतुराननश्रीरिव पञ्चभिः पाण्डवैरिव पाञ्चाली शनै शनैर्याति। मध्येजलं कश्चिद्गायति गीतं, विरौति कश्चित्, फूत्करोति, धूम्रपानरतः कश्चित्, एकः कटाक्षेण दूरस्थितां कामपि युवतीं विलोकयति, कश्चित् खादति लीलया चणकानेव, कश्चिच्छून्यं पश्यति कश्चिद् दिग्भ्रान्त इव, 'चमत्कृत इव, निरन्तरं दृष्टिं क्षिपतीतस्तः। तल्लीतालतः मल्लीतालं मल्लीतालतश्च तल्लीतालमायान्ति यान्ति च नावः। एते वयमवतीर्णाः तारिकम् प्रतिजनं रूप्यमेकम् दत्वा भूमिम्।

साम्प्रतं परिभ्रमामः। मल्लीतालत ऊर्ध्वं विस्तृते समतले भूतले विपणिकैका विराजते। यस्यामारकूटनिर्मितानामनेकरूपाणां पात्राणां रौप्यपदार्थानां, मालिकानां, गण्डकानां, क्रीडनकादीनां विक्रयः क्रियते पर्वतपुत्रिभिस्तिब्बतवासिनीभिर्गौरीभिरिव गौरिभिर्दृढशरीराभिः सूक्ष्माक्षीभिर्वर्तुलाननाभिः। एका विपणिरस्ति खाद्यपदार्थानाम्। आभिक्येन दधियुताः पक्ववटिका मरीचिमिश्राः कल्ककलंकिता गोलवटका अपूपा मल्लपूपाः शष्कुल्यः कर्चरिकाः डोसा हिमीकृताः पदार्था स्वादं स्वादं गृह्यन्ते खाद्यन्ते च। अत्र कश्चिन्नरो लेढि स्वाङ्गुलीः भोज्यवस्त्वभावे, खाद्यपदार्थेषु विलम्वत उपस्थितेषु गृद्धा इव शवमांसे पतन्ति जना ओष्ठचञ्चुचालनपराः। कश्चिद् बुभुक्षितः पतति दूषितभोजने, कश्चिद्दूरत अवलोकतत्यतिकृपणः, कश्चित्प्रियाचरणकमलचञ्चरीक उच्छिष्टममृतबुद्ध्या सादरं सप्रेम मुखार्पितं करोति, कश्चिद् ग्रामीणश्चीनपात्राणि जिह्वया शोधयति। अत्रत्यानां काचगलास्यानां स्नेहसम्पर्कादन्धत्वं, पात्राणाञ्चाशुद्धिः

पृथगेव दृश्यते। परन्न तत्र कस्यापि बुभुक्षोर्दृष्टिः पतति। मिथ्याहाराणां एषां दुष्टाहार एव सुहृत्। अत्रैवैकतो मिष्टकारः। तस्य सम्मुखं तिष्ठन्ति जनाः कुण्डलिनीप्रबोधका योगिन इव कुण्डलिनीप्रियाः, पिपीलका इव मिष्टाभिलाषुकाः, दध्ना साकं गृह्णन्ति खादन्ति च शुद्धघृतनिर्मिताः कुण्डलिनीः।

नैनादेव्या मन्दिरप्राङ्गणे सपादत्राणा एव परिभ्रमन्ति वहवो दर्शितकपटभक्तिभावाः सुन्दरीदर्शनदत्तलोचनाः कामात्मानः कामरूपा कुपुरुषाः सायंकाले, वहवो गृह्णन्ति प्रसादं, कुर्वन्ति देवीदर्शनं, मिलन्ति प्रियजनैः साकं, केचन अङ्क-स्कन्धारूढेभ्यः पृथुकेभ्यो वादयन्ति घण्टाम्। तत्रैवानेके पारं गन्तुकामा नावं गृह्णन्ति।

एतदस्ति महाभवनमेकम्। त्रिंशत्पणकप्रवेशपत्रैः प्रविष्टा अत्र पश्यन्ति 'स्केटिंग' क्रीडाम्। धृतपादतलचक्रकाष्ठा अस्मिन्न काष्ठमयकुट्टिमक्लिष्टकलेवरे भवने धावन्ति, पतन्ति, चलन्ति, रिंगन्ति 'स्केटिंग' प्रियास्तरुणास्तरुण्यश्च। अस्य भवनस्य वर्द्धते भूयसी भूषा निशामुख एवेति स्मरणीयम्।

अयमेकतो ब्रह्माकुमारिकाणां मण्डपः। अस्मिन् दर्शकानां गतागतं, चाकचिक्ययुता दृष्टिः, केषाञ्चित्तकर्मयी वाणी, बहूनामुपेक्षाभावः, अन्येषां परिहासभावः, एकेषां ब्रह्माकुमारिकादीर्घापांगकज्जले निमेषरहिते नयने—इत्यपि भवद्भिरवलोकनीयमश्यमेव। अत्रत्यानां शिक्षकोपदेशकानाञ्च वक्तृतामदूरदर्शितामशास्त्रसम्मतां वाचं वीक्ष्य निशम्य च खिद्यते उद्विजते च जिज्ञासूनां सरलं चेतः। एषां कालगणनां, युगपरिवर्तनं, शिवशङ्करयोः भेदम्, आत्मनः स्वरूपं, पुनर्जन्ममतिम्, अन्यानि चासंख्यातानि अज्ञानतत्त्वानि नाभिनन्दति हृदयमस्मदीयमपि। मण्डपसज्जा नयनहरीति सत्यम्। दम्पत्योः सम्बन्धमेते भ्रातृभगिन्योः सम्बन्धमिव स्वीकुर्वन्ति मूढा मन्ये अधीतयमयमीसंवादाः। इदमेव दुर्भाग्यं देशस्य, यदत्र धर्मकंचुकाच्छन्नशरीरा भुजंगा धर्मपथोपदेष्टारः, अन्धा नेतारः, वञ्चकाः दातारः,

चौरा रसभोक्तारः, धर्मपरायणा अर्धचन्द्रेण तिरस्कृता जाताः, कृत्या रमासनस्था पूजिता ।

अस्मिन्नेव क्षेत्रे एकतो हिण्डोललीला सायं, अपरतो दिवसे कन्दुकक्रीडा, एकस्मिन् वज्रनिर्मिते वर्तुलाकारे स्तम्भचयविराजिते सोपानमण्डिते मञ्चे अनवरतं कोणाघातैः पटहं, नखांगुलीभिश्च तानपूरं तुम्बुरं त्रितन्त्रीं, हस्ताभ्यां झर्झरमञ्जीरौ, यष्टिभ्याम् जलयन्त्रं, करतलाभ्यां ढोलमृदंगाङ्क्यान् मुखवायुना वंशीं, किञ्च हस्तवाद्यं वायुवाद्यं वादयन्ति नवागन्तुकानां मनोरञ्जनार्थं रक्त-पीतसुवर्णवस्त्रसज्जिता वादकाः । तेषामस्पष्टोऽपि ध्वनिर्मनांसि, तेषां रूपं नयनानि आकर्षति ।

अत्रैवैकतः करग्रहशक्तिपरीक्षणयन्त्रं स्थापयित्वा स्थितस्तत् स्वामी । दशपणकैः क्रियते वलस्य परीक्षा, (पूर्वं कदाचित् पञ्चभिरेव पणकैर्भवति स्म), वहवस्तत्र समायान्ति अग्रहस्तद्वयाभ्यां दाम्यन्ति यन्त्रहस्तं क्लिश्यन्ति च । पञ्चशताङ्कादूर्ध्वं यन्त्रसूचि-कायां गतायां दशपणकानान्नैव सम्भवति हामिः । परमेवंविधा वलिष्ठाः स्वल्पसंख्यायामेव दृश्यन्ते । यदि सर्वं एवतादृशाः स्यु-तस्दास्य मूल्यवतो यन्त्रस्य वराकः स्वामी स्वकुटुम्वपोषणं कथं कर्तुं शक्तः स्यादिति विचार्यैव मन्ये भगवाञ्जगत्पतिस्तत्रानयति क्लैव्य-गुणविशिष्टान् बहून् यूनः । अस्यैव निकटमेको बालकश्चक्राकारेण तुलायन्त्रेण तोलयति जीवितानेव जनान् । एतदपि कर्म संध्यायामेव भवति ।

भवन्तस्तल्लीतालतो मल्लीतालमायाता नौकया, परावर्तने राजमार्गेण गम्यताम । वामतो द्विखण्डास्त्रिखण्डा अपि गृहाकाराः पण्यगृहाः । दक्षिणतस्तटाकश्रीः । सम्प्रति निशाकालः । दक्षिणतः पर्वतस्थितानां वासभवनानां विद्युद्दीपप्रकाशो नागलोकमणिप्रभां स्मारयति । सरोवरजलपतितप्रतिबिम्वो वलादाकर्षति दर्शक-

नयनमीनान्। व.मतः सर्वप्रकारसुसज्जितानि भवनानि, नीचैः खण्डे बहुविधाः सर्वसामग्रीपरिपूरिता विपणिकाः, उपरिष्टाच्चास्थायिनिवासयोग्यानि धनिकैर्भोग्यानि 'होटला'ख्यानि। अयं राजमार्गो 'माल' नाम्ना प्रसिद्धः। प्रायः सर्वेष्वेव पर्वतपर्यटननगरेषु मालमार्गो भवति।

अस्मिन् मालमार्गे बहवो नवविवाहिता, विविधवेषभूपिता युग्मचारिणश्चरन्ति निशीथं यावत्। कश्चन कृतकण्ठग्रहां प्रियां नयनाभिरामां स्खलन्तीमिव बाहुवन्धनालम्बनेन नयति गन्तव्यं, कश्चिन्निर्लज्ज इव सामाजिकवन्धनभञ्जक इव यत्किमपि करोति। यद्यप्यत्रागतानां रमणीनां, कृत्रिमसौंदर्यप्रसाधनसज्जितानां वर्णनं 'अनिर्वर्ण्यं' परकलत्र'मिति न्यायान्न युज्यते, तथापि तटस्थबुद्ध्या किञ्चिच्चित्रणं क्रियते पाठकसौविध्यार्थम्। इयमेका मुक्तकेशी कर्तितकेशी पिशाचीव याति रक्ताधरदर्शितक्रूरभावा। इयमन्या शुष्कस्तनी कृत्रिमस्तनभावभरां कंचुलिकां परिधाय कञ्चुकिकारं निन्दन्तीव त्वरितपदैर्याति। एका दर्शितनिम्ननाभिर्वृथैव हसन्ती गच्छति, कापि विकटाकारा ताटकेव 'रिक्शा' यानमधिरुह्य बुभुक्षितेव पश्यति भारवाहकान्, काचिज्जघनगौरवान्मन्दं सञ्चरति कष्टप्रदपादत्राणा नियतचरणा महिषीव, काचित्खादन्ती गच्छति मूर्खा, काचिद् हसन्ती दर्शितोज्ज्वललम्बदशना नायकस्कन्धं कराघातेन पीडयति, काचिदग्रे गच्छन्तं रुणद्धि स्ववाक्कशाभिघातेनाश्वनायकं, काचित्सखीभिः साकं सहर्षं गच्छति मन्मथवशंवदेवाभिसारिका स्वाभीष्टं सुखप्रदं नायकं दूरंगमं पश्यन्तीव। अलमाभिश्चेतोहराभिः साम्प्रतम्। सर्वविधसाङ्कर्यमत्र लभ्यते।

भवद्भिर्यत्र-कुत्रापि रात्रिर्व्यतीता। सञ्जातः प्रातःकालः आगम्यतामस्माभिः सहैव 'चीन-शिखरं' चाइनापीकाख्यम्। अष्टसहस्रफिटोच्छ्रायेऽस्मिन् शिखरेऽश्वद्वारेणापि गन्तुं शक्यते, यत्कृते

यथाकालं धनस्यावश्यकता, पद्भ्यां गमने तु कापि विशिष्टैव शोभा। अस्तु, अस्मात्स्थानात् सरोरूपं विहङ्गनयनमिव प्रतीयते। कदाचिदस्य शिखरस्य दशसहस्रफिटोत्तुङ्गत्वमासीत्। साधारणतः सार्द्धघण्टात्रयमस्यां यात्रायां व्यतीतम्। द्वितीयञ्च शिखरं 'स्नोव्यू' नाम्ना प्रसिद्धमस्ति; अत्रापि प्रातर्गमनादेव लाभः। दूरवीक्षण-यन्त्रेण स्वचालितेन पञ्चविंशतिपणकैः 'रानीखेत-अल्मोड़ा' प्रभृति स्थानानि दृश्यन्ते, भुशुण्डीलक्ष्यवधस्यापि सौविध्यं एतावतैव द्रव्येण प्राप्यते। इयं यात्रा प्रायशो घण्टाद्वयमिता। उभयत्रापि जलपानस्य समुचिता व्यवस्था।

नित्यकर्म निवृत्तम्। पुनरिदनीं भवन्तो मालमार्गमागताः। केवलमस्मिन् काले चित्रतुरगन्यायेनैव तुरंगद्रष्टारो वहवः पतितलून (पतलून) धारकाः भीतभीताः सम्मुखदत्तनयनाः वृद्धहृत्कम्पाः पातभिया कविकाकर्षणं विहायाश्वग्रीवादत्तवाहवः, अनभ्यासत्वाद् वाजिगमनादुच्छलन्तः कामुका इव संभोगं विडम्बयन्तः शिरसा वृथैव कृत्रिमशिरस्त्राणभारं वहन्तः, केचनातपोपनेत्रदूषितनयनाः, केचन मुण्डितश्मश्रवः केचन लम्बकेशत्वात्पौरुषदूषणा इव नारीरूपाः अश्वपतिना पदातिना नीयमानाश्चलन्त्यश्वारोहणकुतूहलहृतहृदया युवानः। युवानः केवलमवस्थया न तु स्वभावेन शरीरेण बलेन वा। अनुमानतोऽश्वानां शतत्रयमिह विद्यते। दत्तपटखण्डसंख्याकाः सर्वे तुरङ्गा वहन्ति जनान्।

अस्मात् स्थानादर्धगव्यूतिमात्रं गत्वा 'हनुमानगढ़ी' नाम्ना मन्दिरमेकं भगवतो मारुतेः प्रसिद्धम्। 'कैंची' स्थानस्य केनचिद् गैरिकवेषेण साधुना निर्मापितम्। सत्यां श्रद्धायां तत्रापि गन्तुं शक्यते। अत्र प्रदर्शनमाधिक्येन पूजाभावस्तु प्रायशः सर्वेषां न भवति। चतुर्भिर्नरैर्नीयमानासु रिक्शास्वपि केचन दर्शनोत्सुका आसते। एकस्मिन् मन्दिरे न जाने के सन्ति ते देवा इति स्पष्टतया नैव ज्ञायते, धनुषा श्रीरामस्य वेणुना नन्दनन्दनस्यानुमानं भवति। परमिह

नानुमानं रामकृष्णयोः। येऽपि भावनैव ते बन्दनीयाः।

एतानि परिभ्रमणस्थलानि समासेन वर्णितानि। अत्रत्यः शीतलो वायुः, पर्वतपुत्राणां सारल्यं, सरसो महिमा, धनस्य व्ययसाधनानि, वालमिष्टान्नं दुग्धमयाः पदार्थाः, बेडूकाफलादीनि फलानि, वहुजन सम्मेलनं, जनसुरक्षार्थं स्थितानां राजपुरुषाणां श्रमः, नौकागृहाः, तत्रैव क्वचिद्दुरोदरक्रीडा, अश्वधावनं, पर्वतोयसौन्दर्यं, नैनादेव्या दर्शनं-- किं किन्नास्ति रामणीयकम्? मन्ये नैनीतालस्य पापताप-राहित्यमवलोक्यैव भीतभीत इव तस्मात्प्रदेशाद् वहिरेव तिष्ठति ग्रीष्मर्तुः, वर्षासु मेघालम्बितमस्य रूपं कस्य मनो न हरति? नगश्री श्वासा इव दृश्यन्ते मेघाः। मन्ये परिपीताधिकसागरजला अजीर्ण-ग्रस्ता इव स्वास्थ्याय अधिकं कालं स्थातुमिहैव वाञ्छन्ति वर्षा-मेघाः। मन्ये चिरयौवना नवीना कुसुमरोमोद्गमा सिताम्वरा घनाश्लेषार्थमेवाचलयुवानं प्राप्य त्यक्तुन्नेच्छत्युत्सवरम्या शरत्। नूनं शिशिरदूत इव शनकैः समायाति हेमन्तकालः शैत्यसन्देशप्रद इव। ऋतुराजो राजते वसन्तः स्वसमाजेन नितरामिहैव। परमरम्या नगस्थली नैनीतालस्य।

अस्मात् स्थानात् को वा गन्तुमिच्छति क्वचित्? परं संसार-सम्बन्धव्यग्रचित्ताः सर्वेऽत्रागच्छन्ति मनःशान्त्यै आवर्तन्ते च। वयमपि ६ ओक पार्के कानिचिद्दिवसानि व्यतीत्य दक्षतरहरिनारायण दीक्षितमहामहाभागानां, तत्रैव राजकीयस्नातकमहाविद्यालये संस्कृतलक्ष्यचराणामातिथ्यमंगीकृत्य तं प्रदेशमुज्झित्वा समागताः स्वकीयमेव गृहम्।

(६) न सः पुनरावर्तते

'तमेव विदित्वाऽतिमृत्युमेति' 'न सः पुनरावर्तते', प्रभृतिषु वदवाक्येषु भवतु नाम कोऽपि संकेतार्थः। तस्य नैवेह चर्चा। अत्र तु जीवनसर्वस्वभूतस्य यौवनमिति प्रसिद्धस्य युवभावस्याख्यानं क्रियते।

'रतिव्यायामसहनो मत्तेभस्येव मत्तताम्।
विधत्ते युवभावो यस्तद्यौवनमुदाहृतम् ॥

इति यौवनस्य स्वरूपम्। रतिरेव व्यायामः, तत्सोढुं शीलमस्य, यद्वा रतिः सुरतं व्यायामश्च इति रतिव्यायामौ इत्युभयं सहते, यद्वा रतिः प्रेम मानसं, व्यायामः शरीरसौष्ठवसम्पादकः, एतेन युवभावस्य मनसि शरीरे च स्थितिरुक्ता। मत्तेभस्येव मत्तताम्, इति पदेन युवभावसम्पन्नस्य शरीरस्य समददन्तिशक्तित्वं, चिन्ताद्वेषशून्यत्वं, काले सूक्ष्मनिरीक्षणं, सत्यपि अतुले वले शुक्ररक्षणं, स्वप्रतिवेशिनः स्वकुटुम्बस्य च रक्षणम्, यूथपतित्वमुक्तम्। 'युवभाव' पदेन च चिरयौवनं, प्रेमविकारसंस्कृतं मानसं—इति यौवनपदस्य सरलं सूक्ष्मञ्च सुरूपम्।

वार्द्धक्यमागत्य न परावर्तते। यौवनञ्च गत्वा न परावर्तते। अयं हि युवभावः सर्वजीवप्रियः, विशेषतो मानवस्य, मानवेष्वपि राजरुचीनाम्। ययातेराख्यानं को न वेत्ति? चिराय स भोगान् भुक्त्वाऽपि तृष्णापाशपतितः पुरुं यौवनमयाचत। पुराणप्रसिद्धाः असंख्या भीमादय. प्रवीरा युवानः अद्य तु भारते केवलं पुस्तकविषया एव सञ्जाताः।

अद्य तु युवानोऽवस्थाविशेषेण मन्यन्ते। वस्तुतस्तु सगर्तेषु काननेष्विव सगर्तेषु काननेषु मृत्युपाशपतित इव पतति निर्जीवो युवभावः। लम्बकेशेषु शिथिलशरीरेषु, मुष्टिग्राह्यमध्येषु समतल-

वक्षःस्थलेषु अगूढजत्रुषु श्रीकृष्णऔषधालयस्य स्थायिग्राहकेषु, कृतगुप्तपत्रव्यवहारेषु, विविक्तसेविषु, कृतमनोरतिषु, हस्तवधूकेषु, कदशनकृतसर्वनाशेषु, अश्लीलसाहित्यसमीक्षकेषु, लम्बपाददण्डधृतचण्डातकानुजपतितलूनेषु, धृतातपसोपनेत्रेषु, अस्थिपञ्जरावशिष्टेषु, जीवत्सु इव प्रेतेषु, कृतधूम्रपानदुर्गन्धमुखेषु, सञ्चितदुराचारदुर्गुणेषु, स्वप्नदोषदुष्टेषु, युवतीदर्शनमात्रेणैवोद्विग्नोत्तेजितेषु, मिथ्याव्यवहारेषु भगिनीति सम्बोधने दुराचारं कुर्वत्सु, अनेकशः स्वीकृतरक्षाबन्धनाभिरेव साकं कृतोद्वाहेषु, प्रेमपथलुण्ठकेषु, निर्वीर्येषु एतेषु क्वास्ति यौवनम् ?

शरीरशिल्पे अद्यत्वे केचन शक्तिमन्तो युवकाः संलग्नाः। तेषामनुकरणं कियन्तः कुर्वन्ति ? केवलमङ्गुलिगणनागणनीया एव। सिंहास्तु अल्पसंख्यासु एव भवन्ति।

अद्य कृत्रिमसौन्दर्याकृष्टे नयने तु हतप्राये एव। तयोः अल्पेनैव कालेन स्थूलकाचमयानि उपनेत्राणि संलग्नानि। कर्णौ अहर्निशं चलचित्रसंगीतेन गुरूपदेशं प्रति तटस्थाविव, वाणी गालिदानपरायणा, करौ उत्कोचचतुरौ कोषापहारकौ सज्जनदण्डदायकौ, पादौ वृथाहिण्डनमण्डितौ सर्वदैव पादत्राणत्रस्तौ, मनो युवतिमात्रमग्नं, नासा कृत्रिमालेपनगन्धदग्धा, अधरस्ताम्बूलरागरञ्जितः, कृष्णवर्णो वा। नखाः नखरञ्जिनीरञ्जिताः, अर्द्धोद्घाटितं वक्षः, शुष्कतामागतौ ऊरूदण्डौ, क्षीरचिक्कणं मुखं पाण्डुरोगग्रस्तमिव—अयमति संक्षिप्तः परिचयो ऽद्यतनानां यूनाम्।

'विवाहात्पूर्वं', 'विवाहान्तरं पश्चातापो न स्यात्' 'पत्रव्यवहारः सर्वथा गुप्तो भविष्यति', लवपुरीयः, इन्द्रप्रस्थीयः, राजवैद्यः, भूतपूर्वराष्ट्रपतिवैद्यः, विद्युद्यन्त्रमयश्चिकित्सालयः—एवंविधाः लेखा भित्तिकासु, चतुष्कोणेषु, पत्रिकासु, समाचारपत्रेषु विज्ञापनेषु प्रायशोऽवलोक्यन्ते। एषां फलं स्पष्टमस्ति। युवानः चोरबुद्ध्या कार्यं कुर्वन्ति। पतन्ति च।

अन्यच्च। एकतः सर्वकारयन्त्रभूता शिक्षाधिपतयः कथयन्ति यौन (सैक्स) शिक्षा छात्रेभ्यो देया। एते वराकाः प्रत्यहं सैक्स-शिक्षां ददति, युवा च कामान्धः सन् पदे पदे पतति। एकतः सैक्स-शिक्षाया उद्घोषः, अपरतः गुप्ताङ्गानां परिचयेऽपि संशोधनेऽपि, मूत्रपुरीषापानसम्भोगमासिकधर्मशुक्राणां नामग्रहणेऽपि लज्जा, एकतः सुराव्यसनस्य निन्दा अपरतोऽनुदिनं नवीना मधुशालाः। वराको युवा अकालकालकवलितः। आत्मरतिरेव स हतः।

एषु दिवसेषु बलात्कार-परस्त्रीव्यसन-हत्याप्रेमकथादिषु सर्वेषामेव दृष्टिः पतति। किं कारणमस्ति इति कोऽपि न विचारयति। 'वीरभोग्याः स्त्रियः श्रियश्च' इति निश्चितमतम्। यदा सर्वाङ्गसुन्दरी युवतिः पतितपतिमहोदयं बृहन्नलानुजं पश्यति, तदा सा किं कुर्यात्? भगवान् कामस्तस्याः साहाय्यं करोति। यदि सा गच्छति केनचित् प्रियेण साकं, तस्याः को दोषः। अद्यापि विवाहा भवन्ति, क्वास्ति पुरुषपरीक्षा, नारी-परीक्षा वा? "परस्परं समीक्षेथाम्" इति वाक्यस्याभिप्रायं को वा वदति पुरोहितः, वाक्कीलोऽन्यो वा योजकः। किं भवति? अद्य विवाहः, श्वः परित्यागः। विषभक्षणं पलायनं, गलबन्धनं, मृत्तैलपातपुरःस्सरं दाहकर्म इत्येव भवति। एतच्च तत्रैव भवति यत्र यौवनस्यान्त्येष्टिर्जाता।

कथयन्ति प्रायशो नेतारः—"एषामुपरि देशस्य भारः" अहं कथयामि—एते देशस्य भारभूताः। प्रथमे वाक्ये वृथामनस्तोषो दीयते, द्वितीये च कटुसत्यम्। सहशिक्षायामद्य बालिकाः अग्रे गच्छन्ति, बालकाश्च पश्चाद्भवन्ति। ते नेत्रनिर्वाणप्रियाः पठन्ति किमु? अस्तु। प्रकृतमेवानुसरामः। युवभावस्य महत्त्वं शिक्षायां कोऽपि न प्रतिपादयति। यदि देशस्य रक्षा आवश्यकी तदा यौवनस्यापि रक्षा नितरामावश्यकी। 'मरणं बिन्दुपातेन जीवनं बिन्दुरक्षणात्। शुक्रायत्तं बलं पुंसाम्' आदि वाक्यानि वृथाजल्पितानि न

सन्ति। ये चाधुनिका दक्षतरा 'एलोपैथी'-प्रवीणाः कथयन्ति— 'वीर्यनाशे न कापि हानिः' तेषां कथनं तु साहसमात्रमेव।

पशुपक्षिणोऽद्यापि पूर्ववदेव शक्तिमन्तः, वयञ्च पुरुषा पौरुषहीना भवामः, प्रतिदिनं शक्तिः क्षीयतेऽस्माकम्।' सन्देहोऽस्माकं गुरुरद्य। अत एव भीमादयः कल्पनाकल्पिता एव जाताः।

अनर्थकारकेषु तत्त्वेषु 'यौवनं' गणयता नीतिविदा अद्य केवलं धनसम्पत्तिः प्रभुत्वमविवेकिताः इत्येव वाच्यम्। 'युवानोऽपि न चञ्चलाः' अद्य सत्यं प्रतिभाति कथनमिदं, तेषां दूषिकाप्लुतं नयनं निरीक्ष्य क्षीणकलेवरञ्च दृष्ट्वा। अद्य युवा चायपानं कृत्वा विपकूटं (विस्कुट) भुक्त्वोदरावर्तमाविष्करोति। दुग्धपानात्तस्य रक्तातिसारः रेचनं वा भवति। भ्रमणात्तस्य पादपीडा, गुरुवाक्यादवमानः, स्नानाज्जाड्यं, प्रातर्जागरणात् शिरोवेदना, आकाशमधः शयनात्प्रतिश्यायः, सरलमार्गे पतनेऽपि अस्थिभंगः, युवतीपादवन्धनीप्रहारान्नेतृत्वं, कारागृहवासात् कौलीन्यम्, आत्महत्यायाः शूरत्वम्। किं जातम्! किं भविष्यति! एते शलाकामल्लाः (सींकिया-पहलवान) कदा दत्तावधाना भविष्यन्ति! इत्येव विचारयामि। युवभाव। एषु स्थिरो भव। भो मित्र! एषां कल्याणं कुरु। सखे! प्राणरक्षणे तत्परो भव अमीषाम्। वन्धो! वन्धुत्वं वितर। त्वमेव एतेषां संरक्षकः। पीडितकर्णसंकेतेनैषां कुरु साहाय्यम्। मा काचिद्युवती एतानुपहसेत्। यथैते आत्महन्तारो मा भवेयुस्तथा त्वया प्रयतितव्यम्।

○

(७) श्रीवेङ्कटेशमन्दिरम्

देवतात्मना रजतगिरिणा अलङ्कृतोत्तरभागस्य द्राविडनाऽपि आर्यसंस्कृतिसमुपासकेन, भक्तिभावभरितेन, भस्मत्रिपुण्ड्रमण्डितललाटेन मृगमदर्चचिताङ्गेनेव कृष्णवर्णेन, कृष्णवर्णेनापि सुवर्णेन, दक्षिणभाषासुदक्षेण, दाक्षिणात्यजनेन प्रतिष्ठितदक्षिणस्य, विशालाभ्यां भीमभुजदण्डाभ्यामिव उभाभ्यामम्भोनिधिभ्यामनभिभूतवैभवस्य, दिव्यप्रभाभास्वरस्य भारतस्य दक्षिणसमुद्रप्रक्षालितचरणस्य दक्षिणभूमिः सदैव सुदक्षिणेव मनांसि आकर्षति बहूनाम्।

आन्ध्र-कर्णाटक-केरल-तमिलनाडु प्रभृतयः प्रदेशाः यथैव विविधव्यापारेषु विज्ञानेषु च प्रसिद्धास्तथैव भक्तिमार्गेष्वपि निरन्तरं अग्रेसराः। भक्तिर्द्रविडे उत्पन्ना कर्नाटके च वृद्धि गता—इति प्रसिद्धिरस्ति। सम्पूर्णे एव दक्षिणभारते समायातेऽपि कलौ अहर्निशं भक्तिभावो जागर्ति। कन्याकुमारी-शुचीन्द्र-रामेश्वर-मीनाक्षी-जम्बुकेश्वर-कपिलेश्वर-गुणशील-पद्मनाभस्वामी-कोदण्डरामस्वामी-पद्मावती-चामुण्डा-शिव-विष्णु-हनूमत्प्रभृतिदेवतानां मन्दिराणि नितान्तमद्यापि दर्शनीयानि ज्ञेयानि गम्यानि सन्ति। वेङ्कटेशमन्दिरन्तु सकलसंसारस्य सर्वोत्तमं हरिपादयुगलमिव सर्वदा लक्ष्म्यालिङ्गितमस्ति।

आन्ध्रेषु 'तिरुपति'तः गव्यूतिसप्तमितमध्वानं पर्वतीयं गत्वा 'तिरुमलै' पर्वते राजते भगवान् वेङ्कटेशः। अयं मार्गः केशसंवाहकायःशलाका (Hair-pin) इव वक्रः, नागान्तकभीतिपतितशेषदर्शितप्रस्तारप्रकार इव, निरन्तरं स्वर्गसोपानसतीर्थ्य इव, जनमेजयनागयज्ञयाज्ञिकाहूत-आस्तीकसंरक्षितः स्वर्गं जिगमिषुरिव तक्षकः, पुरन्दरकर इव वज्रमयः, धूम इवोर्ध्वगमनः, पर्वतारोहणजनितश्रमापनोदाय मन्ये भक्तानां कृते निर्मितः सर्पाकारः, सांख्यागम इव

कपिलेश्वरप्रशस्तः, वदान्य इवानाथाश्रमकलितः, अनवरतविविधयानगतागतैः चिक्कणः, वेङ्कटेशकृपाभाव इव भक्तार्तिहरः, विश्वचित्रकारबृहद्गोमूत्रिकेव, सदागतिरिव सदागतिः, पिङ्गलाचार्य इव लघु-गुरुगणसेवितः, शेषनागगमनसम्पर्कादेव मन्ये तरङ्गितः, पुराणोऽपि सत्पुरुषप्रशस्तः, ऊर्ध्वगोऽपि नीचैःसुस्थितः, निराधारोऽपि सदाधारः, पादाहतोऽपि शिरसाऽभिवन्द्यः, खल इव दूरतः प्रणम्यः, शिव इव भस्मना भूषिताङ्गः, परमानन्द इव अवाङ्मनोगोचरः, मनोऽभिलाष इव दूरङ्गमः, मुग्धबाल इव सरेणुः ।

२५०० 'फिट' मितं मार्गमतीत्य समायाति वेङ्कटेशमन्दिरम् । अतिविस्तृते प्राङ्गणे वसयानविरामस्थलम्, कोषागारः, प्राथमिकचिकित्साकेन्द्रम्, विविधाश्च विपणिकाः सन्ति । किञ्चिदग्रे गत्वा मन्दिरस्य तोरणं दृश्यते । अन्तःप्रविष्टाः जनाः उभयतः पण्यवीथिकां पश्यन्तः अग्रे चलन्ति । आसु वीथिकासु तत्कालोपयोगिन्यः सर्वाः सामग्र्यः सन्ति । सम्मुखमेव समापतति चिरप्रतीक्षितः श्रीवेङ्कटेशालयः । दूरतः एव अस्य स्वर्णस्थूलपत्रजटितौ भास्वरौ कपाटौ मन्ये भगवतो हृदयस्य विशालतां निर्मलतां शुद्धताञ्च कथयन्तौ अवलोक्येते । उपरिष्टात् स्वर्णकलसानां सूर्यप्रभाप्रभावात् कापि अन्या एव शोभा । द्वारे केवलं द्वित्रा एव राजपुरुषाः परिच्छेद-रूपेणैव स्थिताः । अत्र चौर्यस्य कोषहरणस्य तु नाद्यावधि घटिता कापि दुर्घटना ।

श्रीवेङ्कटेशदर्शनार्थं दर्शकानां कृते निर्मितेषु आच्छादनमहितेषु दीर्घभवनाकारेषु वज्रकुट्टिममयप्राङ्गणेषु मञ्चावलीमण्डितेषु स्थानोल्लङ्घनरहितेषु तिष्ठन्ति, सुविधानुसारं उपविशन्ति, उत्तिष्ठन्ति चलन्ति च जनाः । दर्शनोत्सुकाः चतुःपञ्चसहस्रं जना सर्वदैव पंक्तौ भवन्ति । दर्शकरथ्या नितरां रमणीया । नास्यां कोऽपि अतीत्य कमपि गन्तुमिच्छति विहाय कञ्चित् चञ्चलं युवानम । स्थाने स्थाने जलस्य (पानार्थं, हस्तप्रक्षालनार्थं, मुखशुद्ध्यर्थं),

वज्रनिर्मितानां रक्तवर्णानामासनानां समुचितः प्रबन्धः स्तुत्यः। अत एव दर्शकेषु न कोऽपि तृषापीडितः, न च गमनायासखिन्न एव भवति। अवशा रोगिणो नायान्ति दर्शनार्थमिति कृत्वैव मन्ये नास्ति रथ्यामध्ये मूत्रपुरीषोत्सर्गस्थानमिति सर्वथा उचितमेव। दर्शकानां दक्षिणहस्तदिशि दृढलौहजालावरण विद्यते। अनेन एकतः सुरक्षा अपरतः भक्तानां बह्वी सुविधा। अस्मादेव जालात् केचन दातारः रूप्यकस्य पणकपरिवर्तनं कुर्वन्ति। बहिरेव अनेके गृहीतपणकस्वल्प-प्रसेवकाः भ्रमन्ति धूर्ताः। धूर्तत्वन्तु तेषां तदा सम्मुखमायाति यदा ते शतपणकानां स्थाने षष्टि-सप्तति-अशीति-पणकानि ददति। अन्तःस्थो जनः तदा किं कर्तुं शक्नोति विहाय गालिदानम्। अस्तु, ईश्वरः सर्वेषामेव पालकः। वामहस्ते तु भवनभित्तिका। सर्वे 'गोविन्द-गोविन्द, बालाजी' इति नामसङ्कीर्तनं कुर्वन्तः, यथामति वेङ्कटेशस्तुतिं स्मरन्तः, प्रयातेऽपि प्रभाते 'वेङ्कटेशसुप्रभातं' पठन्तः भक्तिभावभरिताः मन्दं मन्दं चलन्ति। एषु केचन तत्कालकृत-गोदानाः केचन प्रत्यग्रस्नानार्द्रगृहीतवाससः, काश्चन जरठाः श्रद्धाबद्धाञ्जलयः, काश्चनान्दाश्रुपरिपूर्णमुखमण्डलाः, आबालवृद्धाः भवन्ति। न्यूनातिन्यूनं घण्टात्रयमस्मिन् दर्शनकार्ये लगति। विशिष्टं दर्शनं शताधिकरूप्यकैर्भवति। घण्टार्द्धसमय एवात्र विशेषः। एवं-विधस्य विशिष्टदर्शनस्य अन्यैव व्यवस्था। उत्सवेषु दर्शकानां लक्षत्रयमपि भवति, इति श्रूयते।

मुख्यमन्दिरभवनभित्तिकासु विविधाः कथाः चित्रिताः। क्वचिन्नारदः कश्यपादीन् यज्ञफलभोक्तारं पृच्छति, क्वचिद् भृगुः ब्रह्म-विष्णु-महेशालयं गत्वा तेषां परीक्षां करोति, क्वचित् पतिरोष-दग्धेव लक्ष्मीः वैकुण्ठं त्यक्त्वा गच्छति, क्वचिद् वराहवतारे श्रीमन्नारायणो धरणीमुद्धरते, क्वचिद् लक्ष्मीविरहसन्तप्तो नारायणः वेङ्कटाचले वल्मीकवासं स्वीकरोति, क्वचित् ब्रह्मणः परमेश्वरस्य

च गो-वत्सरूपधारणम्, क्वचित् सूर्यप्रेरिता गोपीवेशे लक्ष्मीः, वल्मीकस्थितस्य श्रीमन्नारायणस्य गोदुग्धपानम्, गोपमरणम्, वेङ्कटपतिविवाहः इत्यादि सर्वं चित्रेषु चित्रितम्। एतानि चित्राणि दृष्ट्वैव मन्ये दर्शकः परिश्रान्तो न भवति।

मन्दिरे अहर्निशं शुद्धघृतपरिपूर्णाः स्वर्णदीपाः प्रज्वलन्ति। उपरिष्टात् विद्युत्प्रभावात् संयन्त्रितः सुनियन्त्रितश्च शीतलः प्रवहति वायुः। कर्पूरसम्पर्कतः सुखदं वातावरणम् हृदयं प्राणांश्च प्रीणाति। एकस्मिन् सुदीर्घे प्रकोष्ठे सुवर्णनिर्मिताः शिविकाः आसन्दिकाः हंसाः मयूराः बहुविधानि सिंहासनानि च सन्ति। एतेषामुपयोगः उत्सवेषु यात्रासु च भवति, इति मन्ये। एते वयं शनैश्शनैः समायाताः श्रीवेङ्कटेशप्रतिमाप्राङ्गणे। साम्प्रतमस्माकं वामतो दृढरज्जुना विहितः सीमा मार्गस्य। दक्षिणतश्च मन्दिरस्य सुचिक्कणा भित्तिः। सम्मुखे भगवान् वेङ्कटाचलपतिः।

भगवान् वेङ्कटेश्वरः विष्णोरेव रूपान्तरम्। शेषाद्रिशेखरविभुः, वेङ्कटाचलपतिः, गोविन्दः, गरुडध्वजः इति वा तस्यैव भगवतो हरेर्नामान्तरम्। अस्य पाषाणी प्रतिमा कस्तूरिकाकलितेव, भक्त-पापहरणादेव मन्ये कृष्णतां दधाति। अत्युच्चशेखरमण्डिता इयं मूर्तिः अनेकस्वर्ण-रत्नाभरणैश्च आपादमस्तकं विभूषिता भक्तहृदया-ह्लादकारिणी, नयनानन्ददायिनी, मनोवाञ्छितार्थप्रदायिनीति को न वेत्ति? महार्हरत्नानां राशिः चेतः प्रसादयति, अक्षिणी चाश्चर्य-विस्फारिते करोति। वेङ्कटेशस्य पादयोः दिव्यरत्नप्रभा, मस्तके हरिचन्दनस्य प्रलेपः, नयने श्रीखण्डलेपाच्छादनाच्छन्ने इव, सस्मितौ अधरौ वन्धूकवन्धू—इति सर्वं यत्सत्यं दर्शनमात्रफलमेव, न तु वाचा वाच्यम्। धन्यास्ते मूर्तिकलाकोविदाः यैः अस्यां स्वजीवनस्य कश्चित्कालः सफलीकृतः। 'न तत्र चक्षुर्गच्छति न वाक् गच्छति' प्रभृति श्रुतिवाक्यानां संगतिः अत्र आगत्य भवति। मन्दिरे दर्शन-समये सर्वदैव वेङ्कटेशस्तुतीनां घोषः श्रूयते। जलयन्त्रलग्नाः घटा

इव जनाः निरन्तरं चलन्ति, परं भक्तिसुधाजलेन परिपूर्णहृदयाः एव दृश्यन्ते न तु रिक्ताः, इति विशेषः। सङ्कीर्णोऽप्ययं मार्गः असङ्कीर्ण एव मन्यते श्रद्धावनतैः। भगवतोऽनुकम्पया मया रिक्ते त्रिकोणाकारे स्थाने दर्शकपंक्तितः वहिरागत्य कानिचित् क्षणानि स्तोत्रपाठेन व्यतीतानि, इति अस्मद्वन्धूनां अन्येषाञ्च कृते आश्चर्यास्पदं बभूव। तत्रत्यः पूजकः यस्य कस्यापि दर्शकस्य शिरसि राजतशिरस्त्राणं धृत्वा आशीर्वादान् वितरति। सर्वशुद्धायाः सितायाः खण्डान् प्रसादरूपेण ददाति। मया इत्युभयमासादितम्। दर्शनं कृत्वा आत्मानं धन्यं मन्यमानः मुहुर्मुहुः दर्शनार्थं वलितग्रीवो दर्शकलोकस्तेनैव पूर्वोक्तेन क्रमेण बहिरायाति।

प्राङ्गणे अयमस्ति एकः गरुडस्तम्भाख्यः सुवर्णस्तम्भः, अयं मैनाक इव अज्ञातवज्रभेदः, स्वर्णदीस्वर्णपद्मनाल इव, वेङ्कटेश-गुणगणलेखप्रवृत्तस्वयम्भूकविकरकलम इव भूपत्रलग्नः, उच्चतया स्वर्गसोपानस्तम्भ इव, गगनकर्णवार्ताहर इव नास्तिकमानभङ्ग-कारित्वान्नूतन एव मानस्तम्भः, मलय इवान्तश्चन्दनशीतलः वेङ्कटेश्वरद्वाररक्षक इव, श्रीविलास इव सुवर्णमण्डितः, सकलदुरितानां कृते निर्मितोऽद्भुतः शूलदण्डः, ब्रह्मदण्ड इव तपोमन्त्रपूतः कलौ अवस्थितधर्मस्य एकश्चरणः सद्धर्मक्रियाप्रेरक इव, वेङ्कटाचल-पतिदिव्यबृहत्स्वर्णयूप इव, अनवरतनिपतितमन्दिरस्वर्णरेणुभिरेव मन्ये स्वर्णमयः, रस इव नानुमेयः, ऐन्द्रजालिक इवाद्भुतदर्शनः, सवितृमण्डलमध्यवर्तीव नारायणो हिरण्मयवपुः, कनकगिरिकिङ्कर इव, सूर्यप्रभाभास्वरोऽपि नयनहरः, योगीव सर्वावस्थासु एकासन-संस्थितः, संसारसागरसन्तरणपोतानामज्ञानान्धकारभ्रष्टमार्गाणां कृते दिव्यप्रकाशस्तम्भ इव, विराजते। मन्ये अनेनैव सुवर्णमन्थानदण्डेन मथिता रत्नगर्भा भगवदर्चायै अन्तःस्थितानि रत्नानि अनवरतं ददाति।

मन्दिरस्य पृष्ठभागे 'वेदपारायणमण्डपे' श्वेतवस्त्राः, गोक्षुरसम-शिखाजालशोभितशिरसः पद्मासनस्थाः अपि कुशासनस्थाः दाक्षिणात्याः भस्मत्रिपुण्ड्रमण्डितललाटाः ब्राह्मणाः सस्वरं वेदं पठन्ति। 'यथेन्द्रशत्रुः स्वरतोऽपराधात्' इति स्मारं स्मारं मन्ये ते श्रोत्रियाः स्वरेषु सर्वदा सावधानाः सन्ति। किञ्चिद्दूरे भगवतो मोदकमयः प्रसादो मूल्येन मिलति। अस्य मोदकस्य परिमाणः उदरपूर्त्यर्थं सर्वथा समर्थः। अयमपि प्रसादः श्रेणीबद्धैर्जनैः क्रीयते। एकस्मिन् प्रकोष्ठाकारे स्थाने प्रायशो विंशतिजनाः भक्तैः भगवते अर्पितानि रूप्यकाणि पणकानि च चिन्वन्ति, बृहत्तितउना पुनन्ति, कराङ्गुलीभिर्गणयन्ति। श्रूयते यदस्य मन्दिरस्य प्रतिदिनं सपादै-कलक्षरूप्यकाणां भक्तार्पितेन द्रव्येण आयो भवति। मन्दिरस्य प्राङ्गणे एव बह्व्यः विपणिकाः सन्ति यासु नालिकेराणामति महान् राशिः सुस्थितः। प्रसादे नालिकेरफलं भक्तैः अर्प्यते पूजकैश्च एकस्मिन् लौहमुशलाकारे लघुस्तम्भे आघातेन द्विधा कृत्वा भक्तेभ्यो दीयते। अत्रैव केचन कृत्रिमकर्पूरविक्रेतारः तिष्ठन्ति। एकः सरोवरः 'कल्याणकट्टा' नाम्ना प्रसिद्धः। अत्र बह्व्यः स्त्रियः वृद्धाः युवत्यः सधवाः स्व शिरोवेणीं भगवते समर्प्य मुण्डितजटाः सन्तुष्टा भवन्ति। केशमुण्डनस्य अस्मिन् स्थाने अनेकधा माहात्म्यं प्रख्यातम्। श्रूयते यत् विदेशेषु वेणीनां निर्यातेन प्रतिमासं सार्द्धैकलक्षरूप्यकाणामायो मन्दिरस्य भवति। एताश्च विशुद्धा वेण्यः प्रचलितकृत्रिमकेशजालं तिरस्कुर्वन्ति। मन्दिरप्राङ्गणे पद्मावतीदेव्याः अपि सुप्रसिद्धं मन्दिरम्। अन्यान्यपि मन्दिराणि दर्शनीयानि सन्ति।

मन्दिराद् बहिः पण्यवीथिकायां भोजनस्य समुचिता व्यवस्था। भोजने च स्थूलास्तण्डुलाः, काचिद् द्विदला, अर्द्धः पर्पटः, रसमिति नाम्ना दधिजलम्, (पलाण्डुः सत्यामावश्यकतायां) सर्वमपीदं स्वल्पे-नैव मूल्येन मिलति। भोजनमिदं 'प्रसादम्' इति कथयन्ति भोजन-

विक्रेतारः। भुक्त्वा तस्मादेवापणात् यथारुचि यथाकञ्चुककोषञ्च वस्तुजातं गृहीत्वा पुनः बसयानेन परावर्तन्ते जनाः।

श्रीवेङ्कटेशमन्दिरम् स्वर्णसम्पद्भिः सुमेरोः खण्डमिव प्रतिभाति। अस्या सुवर्णघण्टाः, स्वर्णपात्राणि, कनककपाटाः, हेमशिखराणि, गोपुराणि, आसनानि, रत्नानि च अस्य धनधान्यसमृद्धिं कथयन्ति। सुविस्तृतं क्षेत्रम् औषधालयः, अनाथालयः, विश्वविद्यालयः, बससेवा, अनुशासनं, सर्वविधसुप्रबन्धः, विंशतिघण्टां यावत् वेङ्कटेशदर्शन-व्यवस्था, सात्त्विकं राजसञ्च वातावरणं मनसि कमपि अद्भुतमेव प्रभावं जहाति।

लोकप्रवादेषु अत्रत्यानां दिवंगतानां कामपरायणानां कुमारिकासमुपासकानां सम्भोगभुजङ्गानां धनवतां, कदाचित् मन्दिर-सम्पत्-स्वामिनां 'महन्त' नाम्नां बह्व्यः कामकथाः प्रचलिताः। साम्प्रतमपि बह्वी अचला सम्पत्तिः कुमारीणां नामनि लिखिता, एतदेव पर्याप्तं प्रमाणं तेषां धर्मकञ्चुकाच्छन्नशरीराणामधमानां भोगिनाम्। अलमेभिश्चित्तविक्षोभकारकैः प्रवादैः। गंगायाः एवं दर्शनं क्रियते, तस्यामेव स्नानं क्रियते, न तु तीर्थभूतानि पापानि अवलोक्यन्ते। इति कृत्वैव वेङ्कटेशस्तु मया सम्यक् दृष्टः, न पुनः तत्रत्याः पापाः, तत्रत्यानि वा पापानि। (२८.७.१९७८)

(८) विवेकानन्दशिला

द्विसप्तत्युत्तरैकोनविंशतिशततमे ईशवीये सम्वत्सरे दक्षिणभारतं द्रष्टुकामा वयं केचन सुहृदो, विविधेषु प्रान्तेषु परिभ्रमन्तो रामेश्वरं

नमन्तः प्रस्थिताः कन्याकुमारीति नाम्ना सुप्रसिद्धं मनोरमं स्थानम्। स्थलमेतद् भारतवर्षस्य सुदूरे दक्षिणे निसर्गसौन्दर्यसम्पन्नमस्ति। मन्येऽत्रागत्य पुराकालिकं जलवासं संस्मृत्येयं मही न प्रवेष्टुं वाञ्छति सागरम् । मन्ये सम्मुखमागतं वीक्ष्य भयविह्वलेव सङ्कुचितेव तनुभावमङ्गीकुर्वन्तीव लक्ष्यते भारतमेदिनी । अस्य भूभागस्य सम्मुखे पतति सुप्रसिद्धा विवेकानन्दशिला समुद्रे नातिदूरम्। अत्रैव सागरत्रयसम्मेलनं दिव्यप्रयागयोगमिवाविष्करोति। वस्तुतः उपर्युक्तायाश्शिलाया विवेकानन्दशिलेति नामार्वाचीननमेव विद्यते। श्रूयते यद् विवेकानन्दोऽस्मिन्नेव शिलाखण्डे तीर्त्वा समुद्रमेकाकी जगदम्बिकायाः कुमारिकायाश्चरणन्यासं दर्शं दर्शं समाधिमास्थाय ब्रह्मज्ञानमवाप। तन्नाम्नैवेयं शिला पश्चात् प्रसिद्धा जाता ।

देशस्य विविधेभ्यः प्रान्तेभ्य एकत्रितानां कोटिद्वयमितानां रूप्यकाणामस्या निर्माणे व्ययो जातोऽद्यावधि इति श्रूयते। साम्प्रतं यावत्प्रथमचरण एव पूर्णो न तु सम्पूर्णमेव निर्माणम्। प्रातरेव भारतभूमिभागात् यन्त्रचलितानि जलयानानि निश्शुल्कं दर्शनोत्सुकान् दर्शकान् विविधरूपवेषाननेकभारतीभूषिताननान् सदागतीनिव सदागतीन् प्रापयन्ति गन्तव्यस्थलम् । राष्ट्रियस्वयंसेवकानां सहयोगो नितरामभिनन्दनीयो येनात्राहर्निशं सौन्दर्यमायाति । आयान्ति च सहस्रशो जना द्रष्टारः। स्वेच्छया प्रायस्सर्वैरेव दर्शकैरेकरूप्यकमितं द्रव्यपत्रं गृह्यते। एतदेव सञ्चितं धनं शिलानिर्माणहेतुभूतम्।

शिलायामेकतो विवेकानन्दमन्दिरमपरतश्च श्रीपादशिलामन्दिरम्। विवेकानन्दमन्दिरे विवेकानन्दस्य नालिकास्त्रधातु (गनमैटल) मयी कृष्णवर्णा प्रतिमा स्थापिताऽस्ति, तद्गुरोः श्रीमद्रामकृष्णपरमहंसस्य गुरुपत्न्याः पूज्यायाः शारदामणेश्च चित्रे चित्रिते काचकपाटयुतयोर्नातिमहतोः प्रकोष्ठयोः। मन्ये दिव्यात्मानौ दम्पती सम्प्रत्यपि स्वकीयं प्रशान्तचित्तं जितेन्द्रियं प्रहीणदोषं यथोक्त-

कारिणं गुणान्वितमनुगतं मुमुक्षुं शिष्यं ब्रह्मज्ञाननेत्राभ्यां स्निग्धमवलोकयतः। मन्येऽसौ सौम्यमूर्तिर्विवेकानन्दः स्वगुरोर्गरीयसीं गिरं शुश्रूषुरिव सावधानः स्थितः सम्मुखमेव। अस्मिन् सात्त्विके मन्दिर-प्राङ्गणे सहस्राधिकजनानामासनस्थानमस्ति। मन्दिराद् बहिर्विस्तृतं प्राङ्गणं विद्यते यत्र बहवो जनाः स्थातुं समर्थाः।

श्रीपादशिलामन्दिरे नामानुरूपं कुमारिकादेव्याश्चरणचिह्नमस्ति। श्रूयते यद्देवी कुमारी कन्या एकपादस्थितात्रैव सुचिरं तपस्तेपे। साक्षाच्चरणवतीयं शिला श्रीपादशिलामन्दिरयुताऽद्यापि देव्याः अखण्डं तपः स्मारयति। काचमञ्जूषासुरक्षितश्चरणो मन्ये भक्तार्ति-नाशनपरो दीनदयापरः समायातेऽपि कलौ नाद्यापि स्थानं त्यजति धर्मरूपः। अयमेव चरणः शिरःस्थितोऽपि मूलाधारः शिलायाः, असंख्यजनागमनहेतुरनेकसहस्रनेत्रकृतदर्शनोऽक्षयवट इव लब्धविराट्-पुरुषप्रसादो यज्ञमूर्तिरिव सुगन्धपरिपूरितः, पाषाणमयोऽपि न पाषाणहृदयः, पादोऽपि परिपूर्णः, सञ्चरणशून्योऽपि चरणः, सर्वोच्च-स्थानीयोऽपि लब्धसकलजनहृदयासनः। मन्दिरे सात्त्विकतां विलोक्य मनो वाञ्छति तत्रैव स्थातुम्। मनसि समायाति "···न सः पुनरा-वर्तते"···"तमेव विदित्वाऽतिमृत्युमेति।" अद्यापि दिवङ्गतेऽपि विवेकानन्देऽमन्दं विवेकमानन्दञ्च वितरति देव्याश्चरणः।

इयं शिला प्रातरेवोदिते भगवति सहस्ररश्मौ श्रीवेङ्कटेशसुप्रभात-प्रभावाद् भूयसो भक्तिभरितेव प्रतिभाति। मन्ये श्रीवेङ्कटेशदयिता क्षीरोदतनया सुप्रभातस्तुतिं श्रुत्वाऽहोरात्रं जागर्ति भक्तभयापहारिणी फेनपुञ्जदुग्धधवला। कर्णाटकसङ्गीतेन मन्दमृदङ्गध्वनिना चास्यां नितरां प्रीयते पर्यटकलोकः। सागरत्रयसम्पर्कशीतलोऽमन्दं प्रवहति पवमानः, येन तत्रत्यानां जनानां सवस्त्र इवान्तरात्मा हर्षचञ्चलो बुभूषुरिव प्रतीयते।

गतायां निशायां चलन्ति प्रवाताः सुगन्धानुयाताः। मनांस्येषु भूयो

रमन्ते नराणाम् । तथैवोदिते सूर्यदेवे समन्ताज्जनाः स्नानकृत्यं विधायार्चयन्ति स्तुतीनां सुघोषैः कुमारीम् । सुमन्त्रैः प्रबुद्धा विशुद्धैः सितैर्वस्त्रखण्डैः सिताभाः शिखाजालजीर्णाः कियन्तश्च यज्ञोपवीतैस्तथाऽनेकदेशप्रदेशस्मृतिज्ञानपूर्णाः समायान्ति द्रष्टुं नदीनां पतीनां त्रयाणामिहैकत्वमन्योन्यबन्धुत्वमित्थं शिलोच्चासनस्था असंख्यात देशप्रिया: सर्वशुद्धाः सुभक्ताः । न चात्र क्वचिल्लोभमोहौ न हिंसा। इहैवास्मदीयोऽभिलाषो मनोभावपुष्प.णि गुप्तानि कर्तुं समर्थो न जातः । न चास्माच्छिलाखण्डतो गन्तुकामो न कोऽपीति जाता मती रम्यभावा ।

शिलेयं ध्रुवं वारिमध्यप्रविष्टस्य जिष्णोर्गजस्य गण्डस्थलीमनुकरोति । मन्ये दक्षिणवायुप्रभावात् व्यक्तगौररूपेव लक्ष्मीरुदेति सागरतलात् यथा वा समुद्रमन्थनकर्मकृतश्रमो मन्दर एव साम्प्रतं विश्रान्तिं भजते । नागाननेव विविधपत्रपुष्पभूषिता, समुद्रं लिलङ्घयिषोः हनूमतः साहाय्यसम्पादकमैनाकमूर्तिरिव, उद्वासतत्परा गैरिकवसनेव दिवसे प्रतिभाति । निशायां विद्युन्मालिकाभरणा, मणिगणमण्डितेव, सिन्धुमन्थनोद्गता कमलेव, तारागुणगुम्फिता गगनश्रीरिव, स्थूलमुक्ताफलकलिता ऐरावतकुम्भस्थलीव, दिव्यरत्नविराजिता महाकच्छपमूर्तिरिव, अनेकनक्षत्रमालालङ्कृतेव सिन्धुराजललाटपट्टिका शोभते सर्वदा । जलनिधितरङ्गाघातक्षुभिता दुग्धस्नातेव कस्य मनो न हरति शिला ?

दूरतः प्रातःकाले सति दिवाकरोदये वीचिविक्षोभक्षुब्धः सरस्वान् नितान्तमाकर्षतीव मनांसि । उडुपस्थिता धीवरा मत्स्यग्रहणपिशुना मकरध्वजतां यान्ति । क्षुब्धजलोत्थिता जलक्षोदपूर्णाः सवेगं चलन्त्यो लहरिकाः फूत्कारयुतान् दिव्यनागानपि तिरस्कुर्वन्ति । मन्ये समुद्रबालाः परस्परं मिलिता भूमिखण्डालिङ्गनार्थं वेगेन धावन्ति। विधातुराद्या सृष्टिर्धन्या यस्यामसंख्यातानि यादांसि वसन्ति । धन्या

चेयं दक्षिणभूः। धन्यमस्याः वैशिष्ट्यम्। धन्यमस्याः सौन्दर्यम्। धन्या प्रकृतिः। अत्रागत्य जहाति बुद्धिः कौटिल्यम्। अत्रत्येन सुदक्षिणेन विशुद्धवायुना वामतां याति स्वान्तम्। रससृष्टिं विलोक्य ब्रह्मास्वादमिवानुभवति मानससाधकाः। अत्रैव कदाचित् पूर्णिमायां व्यतीतायां प्रातः सूर्याचन्द्रमसोरुदयव्यसनदर्शनप्रभावितेन कविराजेन घण्टामाघेन मन्ये उक्तमासीत् :—

'उदयति विततोर्ध्वरश्मिरज्जा-
वहिमरुचौ हिमधाम्नि याति चास्तम्।
वहति गिरिरयं विलम्बि घण्टा-
द्वयपरिवारितवारणेन्द्रलीलाम् ॥

(९) अहमपि भारतीयः ?

भारतमस्माकं देशः। 'सुजला सुफला मलयजशीतला शस्यश्यामला भारतभूः वस्तुतः अस्माकं माता'—नास्मिन् विषये सन्देहकणिकापि कापि। परं किमहं भारतीयः, इति समायाते प्रश्ने उत्तरार्थं वयमवलोकयामः गगनम्। किमस्माकं भारतीयत्वम्? केवलमेतदेव यज्जन्मास्मिन् देशे लब्धम्। पिता-पितामहाद्या ममात्रैव जन्म लेभिरे? बादरायणसम्बन्धादेवं किमु अस्माकं भारतीयत्वम्? नहि नहि। तदा? विलोकयामः आत्मीयां भारतीयताम्।

अहमस्मि सुरुचिसम्पन्नः सभ्यः नागरिकः राजपत्रितो वा कश्चित् कर्मकरः। आगम्यतामनुभूयतामद्य मम अतिथिसत्कारः। आस्यताम्, इयमासन्दी। अस्याः निर्माणार्थं मया नैकशः आंग्लपद्धतिः

अवलोकिता। एतदस्ति मदीयं गृहम्। अस्य 'काटेज-विला'त्वेन प्रसिद्धिः अस्ति। मन्ये भवन्तः भवनदिदृक्षावन्तः सन्ति। आगम्यताम् अवलोक्यताम्। अयं मम शयनकक्षः। अस्य द्वारि सुकोमलः पादप्रोञ्छकः, अन्तः पर्यङ्कयुगलं आधुनिकशयनसामग्री-सुसज्जितं, अर्द्धनग्नानि चित्राणि, शृङ्गारोपकरणभूषिता मञ्चिका, मन्दप्रकाशकारकः विद्युद्दीपः, कामोत्तेजका प्रतिसीरा, 'स्टीरियो रिकार्ड प्लेयर' प्रभृति सङ्गीतसाधनानि, गर्भनिरोधिका निःशुल्कं लब्धा सामग्री, अन्यानि अवाच्यानि वस्तूनि च सन्ति। संलग्नमेव स्नानगृहम्। स्नानगृहन्तु नामतः, वस्तुत एतदस्ति प्रसाधनगृहम्। अस्मिन् हस्तप्रक्षालनार्थं नीलवर्णचीनमृत्तिकाकुण्डिका, सुगन्धीनि अङ्गशोधकानि, प्रोञ्छनपटानि, क्षौरसाधनानि, केशहराणि लेपनानि, 'यूरोपियनशौचकुण्डः, पार्श्वतः शौचप्रवाहार्थं 'सिस्टर्न' नामकं जलकुण्डम्, प्रोञ्छनार्थं रूक्षकागदपट्टिकाचक्रम्, गगनवर्ण-'टाइल' निर्मितं कुट्टिमं, धाराजलयन्त्रं, उडुपाकारः स्नानकुण्डः अण्डाकारं दर्पणम्, वायुशोधकं 'ओडोनील' प्रभृति—इति सर्वं यथास्थानं सन्निहितमस्ति।

अयमपरः विश्रामकक्षः। अस्मिन् अनेकविधानि सुखासनानि, आसन्दिकाः, भित्तिकासु विविधतैलचित्रितानि, अज्ञाततत्त्वानि द्वित्राणि चित्राणि, एकतः काचमञ्जूषायां वहूनि क्रीडकानि, बह्व्यः 'खजुराहो-मन्दिरभित्तिमूर्तिप्रतिकृतयः, अन्याः कामकलानन्द संवर्द्धिन्यः आकृतयः, एकं वहुचित्रसंवलितं वर्षतिथिपत्रं 'कलैण्डरा'ख्यम् यस्मिन् तिथीनां स्थितिस्तु सूक्ष्मेक्षिकयैव विलोकनीयापरं चित्रदर्शनं सर्वथा सुस्पष्टम्। एकस्मिन् कोणे 'दूरदर्शनम्' एकतश्च हिमीकरण-यन्त्रम्। अनेके दीपाधाराः विद्युद्दीपाः दण्डदीपाः, उपरिष्टात् कुटंकात् लम्बमाने व्यजने, मध्ये एकः काचमयः आरकूटनिर्मितः लम्बितः दीपधरः, गवाक्षेषु द्वारेषु च नूपुरमुखरिता प्रतिसीरा,

कुट्टिम आस्तीर्णमौर्णं कम्बलम्, केन्द्रे एका मञ्चिका, तत्रैव धूम्र-वर्तिकाभस्माधारः, समाचारपत्रम्, काश्चित् चलचित्रपत्रिकाः।

आधुनिकसामग्रोपरिपूरिता इयं मम पाकशाला। अत्र अकिट्टाललौहपात्राणि चीनमृण्मयानि च पात्राणि, कोणे पात्र-प्रक्षालनार्थं जलकुण्डिका पात्राधारः, भोजनपाकार्थमादर्शं इंधनत्वेन प्रसिद्धम् 'इंडेन' नामकं (अस्य इंधनस्य अयमेव आदर्शः यत् न कदापि 'अग्नये स्वाहा'दिभिः कथमपि न वयं क्लिष्टाः भवामः)। अस्यां मम प्रेयसी पत्नी भोजनं पचति। अत्रैव प्रायः अहं स्थित्वा भोजनं करोमि। अतिथिषु समायातेषु भोजनकक्षे भोजनं भवति। अयं भोजनकक्षः महानसलग्नः एव। महानसात् परिवेषणमार्गात् भोजनमस्मिन् कक्षे आयाति। अत्र एका 'सनमाइका' चिक्कणपृष्ठा सुदीर्घा मञ्चिका। अस्यामेकं पुष्पपात्रम् चूर्णितलवणं कृष्ण-मरीचिका च पृथक्-पृथक् लघुपात्रे, चतसृषु दिक्षु आसन्दिकाः, तासु अपि लघुपटखण्डानि अङ्कालङ्करणानि हस्तमुखप्रोञ्छनानि च स्थापितानि। कुटलात् लम्वमानौ विद्युद्दीपौ, विद्युद्व्यजनं च। भोजने सर्वं चलति यथारुचि यथाकालं च।

मद्गेहे एकस्मिन् वाह्यप्रकोष्ठे अतिथिकक्षः अपि अस्ति। अत्र स्नानशौचयोः संयुक्ता व्यवस्था। शयनादिकस्य अपि सन्तोषप्रदः प्रवन्धः।

मदीये अध्ययनकक्षे भारतीयधर्मसंस्कृतिपुस्तकानां स्थानं नास्ति। नाहं जानामि रामं न वा कृष्णं नापि तयोः कथाम्। वेदाः उद्धृताः कदाचिद् विष्णुना—इति मया कदाचित् श्रुतम्। पुराणानि वस्तुतः पुराणानि नवयुगधर्मविरुद्धानि, स्मृतयो मन्वादिभिः नरैः रचिता अद्य व्यर्थाः सन्ति वर्णाश्रमपरम्परापूर्वाग्रहग्रस्ताः, तदा पठनीयं किमस्ति? पठनीयम् एतदतिरिक्तं काव्याकाव्यजातं सत्य-कथा सरिता फैमिना, सुपर, मायापुरी, कामकथा—इति सर्वं मस्ति।

'द्रष्टव्यं' नग्नसौन्दर्यम्। अत एव उपर्युक्ते कक्षे मनोनीता मयाऽऽनीता सर्वा सामग्री।

मदीया इयं प्रेयसी पत्नी गृहकर्मसु न तथा प्रवीणा यथा समूह-नृत्येषु स्वतन्त्रनृत्येषु वा दक्षा। 'क्लबेषु' इयमेकाकिनी अपि बहूनां हृदयानि हरति। आंग्लभाषायाः माध्यमेन यदा इयं वार्तालापं करोति तदा अस्याः अधरयोः कापि अन्या एव शोभा भवति। केशकर्तनार्थमियं प्रतिमासं नापितं पीडयति। कोऽस्या आयुषोऽनुमानं कर्तुं शक्नोति? कृष्णवर्णरञ्जिताः केशाः, मुखे विलेपनं, वक्षसि कृत्रिमोत्सेधवर्द्धकं कूर्पासकम्, अधरयोः विकृतः रागः, मस्तके शाटिकावर्णानुसारं सौन्दर्यतिलकं न तु सौभाग्यतिलकं, कर्णयोः चक्राकारे कुण्डले, स्कन्धे प्रसेवकम्, दक्षिणमणिबन्धे कृत्रिमस्वर्ण-कङ्कणं, वामे च घटिका, कण्ठ एका तन्वी स्वर्णसूत्रनिर्मिता माला, बाहुमूलं स्तनसीमानं दर्शयत् 'ब्लाउजं', नाभिदर्शना शाटिका, हंसकशून्यौ पादौ वृथाहिण्डनाभ्यस्तौ, हस्ताङ्गुलीषु मुद्रिकाः। मातृत्वे तु नास्याः रुचिः। सहवासपरया अनया अनेकधा 'चैकअप' व्याजेन गर्भपातः कारितः। कथञ्चित् एकः पुत्रोऽस्ति यस्य पालनं धात्री करोति।

अस्य पुत्रस्य प्रथमा वार्षिकी ग्रंथिः परश्वः एव तु मया सम्यक् सम्पादिता। किं कथयानि तस्य दिवसस्य शोभाम्! तस्मिन् सुगन्ध-परिपूरिते पुष्पमालालालिते, विविधविद्युद्दीपाधारराजिते विश्राम-कक्षे उत्सवः आसीत्। मध्ये एकस्यां मञ्चिकायां राजतस्थाल्यां कुक्कुटाण्डनिर्मितं 'केकं' स्थापितम्, तेनैव साकमेकं खड्गाकारं लवित्रं, तस्य नातिदूरे स्थापिता एका क्षौद्रेयवर्तिका, एका च दीपशलाका। आहूतैः समागतैश्च प्राभृतीकृतानि अनेकवस्तूनि। समयेन प्रज्वालिता वर्तिका मुखमारुतेन चिरायुषा निर्वापिता। करताडनपुरःसरं सर्वैः समवेतस्वरेण घुष्टम्—"हैप्पी बर्थ डे टू

यू' यस्य आंग्लभाषावाक्यस्यार्थः अस्ति 'त्वज्जन्मदिवसार्थं वर्द्धापनम्' लवित्रखण्डितानि केकखण्डानि सर्वेभ्यः प्रसादरूपेण प्रदत्तानि। ततः जलपानं, तदनु नृत्यगीतादिकं, आर्केस्ट्राध्वनिः। ततः सभा-विसर्जनम्। अस्तु। अमस्यस्य पुत्रस्य 'डैडी, डैड, पापा' अस्मि, पत्नी च 'ममी, ममा'।

'पञ्चकृत्वोऽह्नो भोजनम्' मत्प्रियम् अस्ति। प्रातः चायपानं 'बैड टी' त्वेन कृत्वा, तदनु घण्टाद्वयेन प्रातराशं करोमि। मध्याह्न-भोजनं कृत्वा सायं चायं पिबामि, पुनः रात्रिभोजनं भवति। दुग्धपानात् तु मम विरेकः सञ्जायते। परं सुरा मत्प्रिया अस्ति।

अहमस्मि भारतीयः। मदीया वेषभूषा आपादमस्तकं वैदेशिक प्रभावग्रस्ता। चलचित्रेषु मदीयं चेतो रमते। परनारीषु धावति दृष्टिः। धर्मात् जुगुप्सते हृदयम्। प्रमाद्यति स्वभावः, विरमते सत्कार्यात्, स्निह्यति तस्करकर्मभ्यः, द्रुह्यति तीर्थेभ्यः, क्रुध्यति गुरुभ्यः। गुरुभिः किं कृतं मत्कृते येन तेषां श्राद्धं सम्पादयानि ? श्राद्धेषु न भवति कदापि श्रद्धा। उत्सवेषु मदीया सखी सुरा, व्यसनं मित्रं, भूतद्रोह : स्वभावः, परपीडा व्रतं, अश्लीलता सरलता, कौटिल्यं कौशलं, चौर्यं चरित्रं, गालिदानं महादानं, अतिथितिरस्कारः पुरस्कारः, नास्तिकता आस्तिकता, पुराणपुरुषनिन्दा सामर्थ्यम्, अष्टविधमैथुनं अष्टांगयोगः, अरिषड्वर्गः षड्गुणसम्पन्नः सुहृत्, कृतघ्नता सम्पन्नता, विदेशः आदर्शः, धनस्य द्वितीया गतिः मतिः। अत एव ब्रवीमि अहमपि भारतीयः ?

(१०) पञ्च च मे

[‘हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसी’दित्यनुसारं युगारम्भे अद्वितीयो हिरण्यगर्भ आसीत् । तेन स्वेच्छया रूपद्वयं कृतम्, तदनु ‘एकोऽहं बहु स्याम’ इति विचारयता तेन सृष्टिर्निर्मिताऽखिला । सत्यपि सृष्टिकौशले पञ्चानामिह किमप्यन्यदेव वैशिष्ट्यम् ।]

पञ्च ज्ञानेन्द्रियैः पञ्च कर्मेन्द्रियैः पञ्च वायुभिः सम्पन्नोऽयं मनुष्यः पञ्च भूतानां रम्यरूपमेवाविष्करोति जन्मना, पञ्चत्वं गतश्च परमात्मनि लीयते । किमिति अंगुलीनां करे-पादे वा पञ्चकमेव निर्मितं विधात्रा ? ‘लालयेत् पञ्च वर्षाणि इत्येव नीतिक्रमः सुदृष्टः । परलोकसाफल्यार्थं ‘पञ्चाग्नितपः’ एव वैदिकानां शरणम् । स्वर्गे देववृक्षा अपि ‘पञ्चैते देवतरवो मन्दारः पारिजातकः सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्’ इत्यमरवचनेन पञ्चैव सन्ति । पञ्चमुखस्य भगवतः शिवस्य ‘पञ्चायतनमेव प्रसिद्धमस्ति । भोजनं पञ्चकवलेनैव प्रायः भारते क्रियते । अन्वाहार्य-गार्हपत्य-आहवनीय-सभ्य-आवसथ्य-भेदैः पञ्चविध एवाग्निः । मनुना श्राद्धस्य पञ्च एव भेदा अङ्गीकृताः ।

व्रतार्थं, तिथिपरिज्ञानार्थं वा पञ्चाङ्गमेव पश्यन्ति नक्षत्रविद्याकुशलाः । पूजावसरे पञ्चामृतं, श्रावणीपर्वणि पञ्चगव्यं, चिकित्सार्थं पञ्चकर्माणि, (वमन-विरेचन-नस्य-अनुवासन-निरूह—नाम्ना प्रसिद्धानि) कथं विस्मरणीयानि ? वेदान्ते कोषपञ्चकं, पञ्चीकरणञ्च पृथगेव दृश्यते । पञ्चावयवमेव वाक्यम् अनुमानप्रसङ्गे पठ्यते पाठ्यते च । ‘प्रतिज्ञाहेतूदाहरणोपनयनिगमानि’ पञ्चावयवास्तस्य सुप्रसिद्धाः । दर्शने चार्वाक - सिद्धान्ते ‘पञ्चगुप्त’स्य महन्महत्त्वम् अस्ति । नारदस्य च ‘पञ्चरात्रं कथं वा उपेक्षणीयम् ?

चितिः स्वतन्त्रा विश्वसिद्धिहेतुः 'पञ्च कृत्यानि करोति।

संस्कृतनाटके पञ्चादिकाः (दशपराः) एव अंकाः भवन्ति। प्रस्तावनाया अपि पञ्चैव भेदाः स्वीकृताः। किञ्च 'अर्थोपक्षेपका पञ्च विष्कम्भकप्रवेशकौ चूलिकांकावतारोऽथ स्यादंकमुखमित्य' प्युक्त्वा कविराजेन विश्वनाथेन पञ्चानामेव स्थितिरुक्ता। अवस्था पञ्च कार्यस्य, सन्धयः पञ्च अर्थप्रकृतयोऽपि पञ्चेव सन्ति। श्रव्य-काव्यप्रसङ्गे 'पदे तदंशे वाक्येऽर्थे सम्भवन्ति रसेऽपि' इत्यनुसारं पञ्च दोषाः, वाक्यगतो दोषः पञ्चधा, पदांशगतोऽपि तथैव, अनुप्रासालङ्कारः, धर्मलुप्तोपमा, अतिशयोक्तिः, अप्रस्तुतप्रशंसा चेत्यलङ्कारा अपि पञ्चविधा एव भवन्ति। महाकवेः श्रीहर्षस्य 'पञ्चनली कथं वा विस्मर्यते ?

भोजनस्य प्रसङ्गे उपस्थिते सति 'पञ्चकृत्वोऽह्नो भोजन'मिति कौमुदीस्थं वाक्यं भोजनकाले पञ्चिवधमेव निर्दिशति। मांसाशिनां कृते स्मृतिकारैः 'पञ्च पञ्चनखा भक्ष्या ये प्रोक्ताः कृतजैर्द्विजैः' इत्युक्त्वा निर्णयो दत्तः। किञ्च 'पञ्च' कवलाभावे नास्ति भोजने स्वादः। पंचविधलवणाभावे क्व वा भोजनं पाचकं चूर्णं वा ? चिकित्साशास्त्रे 'पंचतिक्त'नाम्ना निम्वामृतावृषपटोलनिदिग्धिकानां बोधो भवति। तथैव 'पंचसक र' चूर्णेन उदरामयो याति। पंचरस-पंचलौह-पंचीसिद्धौषधि-पंचोपविष-निम्वपंचक-निम्बूकपंचक-पंचमूल-पंचमूत्र-पंचमूली-प्रभृतियोगा अपि आयुर्वेदे प्रसिद्धाः। सुश्रुतानुसारं धूमोऽपि पंचविध एव।

पंचलक्षणसमन्विते पुराणे समुद्रमन्थनावसरे भगवान् विष्णुः पंचाङ्गत्वेन (कच्छपशरीरेण) सुरासुरयोः साहाय्यमकृत। पंचयामो हि दिवसः शुभकार्यैः नेतव्य नोचेत्, 'पंचसूना' भयमायाति। यथा-शक्तिः ब्राह्मणैः पंच महायज्ञाः सम्यगनुष्ठेयाः। दैनिकदेवकर्मणि 'पंचनीराजनम्' सिद्धिदं भवति। पितृकर्मणि 'पंचपात्रमेव शोभते। देवालयेषु अष्टाङ्गप्रणामाभावे 'पंचाङ्गप्रणाम' एव कार्यः। प्राणिनां

पंचश्रेणयः (देव-मनुष्य-गन्धर्व-नाग-पितराः) श्रुतिसिद्धाः।

भारतस्य 'पंचवटी' रामायणे प्रसिद्धा एव, पंचनदप्रदेशोऽपि स्वकीयैः धनधान्यस्वास्थ्याचारैः पृथगेव दृश्यते। पञ्चबाणस्य भयं पंचमुखः शिवो हेलयैव अपाकरोति। भगवतः शिवस्य पंचकर्माणि (सृष्टिस्थितिध्वंसविधानानुग्रहत्वेन) सर्वमान्यानि। "काशीखण्डे" 'ज्ञानवापी-नन्दिकेशः-तारकेशः-महाकालेश्वरः- दण्डपाणिः- इत्येषां संक्षिप्तं नाम 'पंचतीर्थी' एव स्वीकृतम्। तीर्थेषु च 'पंचवदरी' प्रसिद्धिमाप्नोति। तथैव "पंच प्रयागाः" एव सर्वप्रसिद्धाः। पंचपाण्डवा अन्तिमकाले हिमालयमेव गता पंचत्वमिति श्रूयते। संसारे पवित्रनदानामपि संख्या 'पंचैव' विद्यते। कदाचिद् ब्रह्मणोऽपि मुखानि पंच एव आसन् चतुर्मुखस्तु सः पश्चादेव जातः।

व्याकरणग्रन्थेषु 'यत्नो द्विधा, आभ्यन्तरो वाह्यश्च, आद्यः पंचधा' इत्युक्त्वा आभ्यन्तरस्य स्पृष्टादयो भेदाः दर्शिताः। 'कु-चु-टु-तु-पु एते उदितः' इति कथनात् वर्गाणामपि पंचैव रूपाणि पुरस्तादायान्ति। प्रत्येकस्मिन् वर्गे पंचैव वर्णा भवन्ति। 'शल्' प्रत्याहारे पंचैव वर्णाः समानीताः। 'रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति' महाभाष्यवचनात् शब्दानुशासनस्य पंचविधमेव प्रयोजनम्। समासः पंचधा, कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पंचवृत्तयो भवन्ति।

पंचज्ञानापरनाम्नो बुद्धस्य पंचशीलानां तस्य समये तु प्रचार आसीदेव, साम्प्रतमपि भारतीयाः पंचशीलस्य सिद्धान्तं स्वीकुर्वन्ति। 'अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रह'भेदेन यमा अपि पंचधा, तथैव 'शौच-सन्तोष-तपः-स्वाध्याय-ईश्वरप्रणिधान'रूपा नियमा अपि पंचैव। भगवता पतंजलिना चित्तवृत्तयोऽपि पंचैव स्वीकृताः। किं च समाधिरपि पंचत्वमेव भजते, चित्तस्य अवस्था अपि योगशास्त्रे पंच सन्ति, योगस्य पंचैव बहिरंगसाधनानि (यमनियमासनप्राणायामप्रत्याहारभेदेन) स्वीक्रियन्ते। द्वेषोऽपि पंचधा, तथा च

नित्यनैमित्तिककाम्यनिषिद्धप्रायश्चित्तभेदेन कर्मापि पंचविधमेव योगशास्त्रेषु नियतम् ।

न्यायशास्त्रे हेत्वाभासाः पंचैव भवन्ति । 'एते पंचान्यथासिद्धाः' अद्यावधि तथैव सन्ति । ग्रन्थस्य 'विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् । निर्णयश्चेति पंचाङ्गं शास्त्रेऽधिकरणं स्मृतमि'त्युक्तया पंचांगत्वं सिद्धमेव । छन्दःशास्त्रे तु पंचानाम् अन्यदेव वैशिष्ट्यम् । तथाहि पंचचामरं विना क्व वा दशग्रीवकृतं शिवताण्डवस्तोत्रम् ? वैदिके पंक्तिच्छन्दसि पंच चरणा भवन्ति। संस्कृतंपंक्तिच्छन्दसि च प्रतिचरणं पंच वर्णा भवन्ति। किंच तूणकमालिनी-लीलाखेल-शशिकला-छन्दसां प्रतिचरणं पंच गणा आयान्ति ।

वेदे 'पंचोक्षण' शब्देन अग्नि-वायु-विद्युत्-मेघ-सूर्यप्रकाशानां पचानामेव ग्रहणं भवति । पंचपादं पितरं' 'पंचारे चक्रे' प्रभृतिषु मन्त्रेषु पंचानां पृथगेवास्तित्वं दृश्यते । वैदिकेषु ग्रन्थेषु 'पंच सम्भाराणामेव महत्त्वम् :—

"पूर्वोक्तानां मृत्ति कावराहविहतवल्मीकवपापूतीकाजकृष्णाजिन-लोमरूपाणां पंच संख्यां प्रशंसति'पंचैते सम्भारा भवन्ति" [तैत्तिरीय आरण्यक-प्रपाठक ५/अनु० २]

आचार्य सायणः साम्नः पंच भागानेव स्वीकुर्वन्नाह "पंच भागयुक्तस्य साम्नश्चरमो भागो निधनं, मत् त्रिवारं पठेत् । तेन लोकत्रयाद्रक्षसामपहतिर्भवति ।" [तैत्ति० आरण्यके प्रपा०५]

बृहदारण्यके (६/२) प्रवाहणः श्वेतकेतुं पंच एव प्रश्नान् पृच्छति—'वेत्थ यथेमाः प्रजा प्रयत्यो विप्रतिपद्यन्ता ३, इति नेति होवाचः……'' एतदेव वृत्तं छान्दोग्येऽपि (५/३) विद्यते ।

कौटिल्यानुसारं मातरोऽपि पंच, पितरोऽपि पंचैव सन्ति—

जनिता चोपनेता च यस्तु विद्यां प्रयच्छति ।
अन्नदाता भयत्राता पंचैते पितरः स्मृताः ॥

राजपत्नी गुरोः पत्नी भ्रातृपत्नी तथैव च।
पत्नी माता स्वमाता च पंचैता मातरः स्मृताः॥

[चाणक्यनीतिदर्पणे]

भारते पंचकन्याः, पंचपुरुषाः, पंचमुनयः—सर्वे समादरं लभन्ते। तथा हि श्लोकाः—

अहल्या द्रौपदी तारा कुन्ती मन्दोदरी तथा।
पञ्चकन्या स्मरेन्नित्यं महापातकनाशनम्॥
हरं हरिं हरिश्चन्द्रं हनुमन्तं हलायुधम्।
पंचकं वै स्मरेन्नित्यं घोरसङ्कटनाशनम्॥
उषा ह्युमा च वैदेही रमा गङ्गेति पंचकम्।
प्रातरेव स्मरेन्नित्यं सौभाग्यं वर्द्धते सदा॥
अगस्तिमधिवश्चैव मुचुकुन्दो महाबलः।
कपिलो मुनिरास्तीकः पंचैते सुखशायिनः॥

[देवपूजापद्धतिः]

महाभारते (शान्तिपर्वणि) कालकवृक्षीय-उपाख्याने पंच विधानामेव मन्त्रिणामावश्यकः सद्भाव उक्तः। मित्राण्यपि सहार्थभजमानसहजकृत्रिमधर्मात्मा इति भेदेन पंच एवोक्तानि। दानस्य हेतवोऽपि (भारते अनुशासनपर्वणि) पंचैवोक्ताः।

सत्स्वपि समुद्रमन्थनोत्थेषु चतुर्दशसु रत्नेषु पंचरत्नं कामपि उत्कृष्टां विच्छित्तिं दधाति। पंचरत्नमित्थं स्वीकृतं मनीषिभिः—

'नीलकं वज्रकं चेति पद्मरागश्च मौक्तिकम्।
प्रवालं चेति विज्ञेयं पंचरत्नं मनीषिभिः॥
सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकम्।
रत्नपंचकमाख्यातम्··· ··· ··· ··· ॥
कनकं हीरकं नीलं पद्मरागश्च मौक्तिकम्।
पंचरत्नमिदं प्रोक्तं ऋषिभिः पूर्वदर्शिभिः॥'

पंचदीर्घं पदेन शरीरस्य पंचाङ्गानि गृह्यन्ते तथाहि—

'बाहू नेत्रद्वयं कुक्षिर्द्वे तु नासे तथैव च।
स्तनयोरन्तरं चैव पंचदीर्घं प्रचक्षते ॥"

रुद्राक्षस्य अनेकभेदेषु पंचमुखरुद्राक्षस्य महन्महत्त्वमस्ति। रुद्राक्षजाबालोपनिषदि उक्तमस्ति—

"पंचवक्त्रन्तु रुद्राक्षं पंचब्रह्मस्वरूपकम्।
पंचवक्त्रः स्वयं ब्रह्म पुंहत्यांच व्यपोहति ॥"

गायन्त्रीमन्त्रस्य पंचप्रणवसंयुक्तस्य जाप उपदिष्टो विश्वामित्रेण

'धर्मशास्त्रपुराणेषु इतिहेसेषु सुव्रत।
पंचप्रणवसंयुक्तां जपेदित्यनुशासनम् ॥'

(विश्वामित्रकल्पे)

इयंच छन्दसां माता गायत्री पंचवक्त्रा पंचपदी, पंचशीर्षादिभिः पदैः प्रसिद्धा। तथाहि—

'पंचवक्त्रां दशभुजां त्रिपंचनयनैर्युताम्।
मुक्ताविद्रुमसौवर्णां सितशुभ्रसमाननाम् ॥'

(गायत्रीपंजरस्तोत्रे/४६)

प्रत्यङ्मुखी पंचपदी पंचाशत्तत्त्वरूपिणी।
पातु प्रतीचीमनिशं सामब्रह्मशिरोऽङ्किता ॥

(गायत्रीपंजरस्तोत्रे/५५)

गायत्र्याः पञ्चशीर्षत्वं प्रतिपादयन्ती गायत्र्युपनिषदाह—"...कानि पञ्च शीर्षाणि ?।...व्याकरणमस्याः प्रथमं शीर्षं भवति, शिक्षा द्वितीयं, कल्पस्तृतीयं, निरुक्तं चतुर्थं, ज्योतिषामयनं पञ्चमम्।"

"गायत्र्याः पञ्चाङ्गानि एव प्रसिद्धानि—

'पटलं पद्धती वर्म तथा नामसहस्रकम्।
स्तोत्राणि चेति पञ्चाङ्गं देवतोपासने स्मृतम् ॥'
कवचं देवतागात्रं पटलं देवताशिरः।
पद्धतिर्देवहस्तौ तु मुखं साहस्रकं स्मृतम् ॥

स्तोत्राणि देवतापादौ पञ्चाङ्गं पञ्चभिः स्मृतम् ॥
(गायत्रीपद्धतिः/गायत्रीपञ्चाङ्गम्)

इयं भगवती पञ्चपदी, पञ्चवक्त्रा, पञ्चशीर्षा गायत्री पञ्चभिः वर्णैः सर्वदोद्भासिता पूज्यते भक्तैः। तथा चोक्तम्—

'रक्तश्वेतहिरण्यनीलधवलैर्युक्तां त्रिनेत्रोज्ज्वलाम्।
रक्तां रक्तनवस्रजं मणिगणैर्युक्तां कुमारीमिमाम् ॥
गायत्रीं कमलासनां करतलव्यानद्धकुण्डाम्बुजाम्।
पद्माक्षीं च वरस्रजं च दधतीं हंसाधिरूढां भजे ॥"

(गायत्रीसहस्रनामावली/६)

पञ्चपूजोपचारान् प्रशंसति भार्गवः—

'ध्यानमावाहनं चैव भक्त्या यच्च निवेदनम्।
नीराजनं प्रणामश्च पञ्चपूजोपचारकाः।'

(परशुरामकल्पसूत्रम्)

क्वचित् 'गन्धं पुष्पं च धूपं नैवेद्यमेवं पञ्चोपचारेषु गणयन्ति बुधाः। पञ्चाङ्गान्यपि अन्यानि स्वीकृतानि—

'पञ्चाङ्गानि महादेवि जपो होमश्च तर्पणम्।
अभिषेकश्च विप्राणामाराधनमपीश्वरि ॥"

नीतिशास्त्रसम्बद्धानि पञ्चाङ्गानीमानि—

'सहायाः साधनोपाया विभागो देशकालयोः।
विपत्तेश्च प्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते ॥" (कामन्दकः)

पूजाकर्मणि नित्यनैमित्तिकादिषु कर्मसु च प्रसिद्धमाचमनमपि पञ्चविधमेव निश्चितमस्ति :—

'आचमनविधिः प्रोक्तः पौराणः स्मार्त आगमः।
श्रौतं मानसमाचम्य पञ्चभिः श्रुतिचोदितैः।"

(गायत्रीकल्पः/परिच्छेदः २/४-५)

प्राणायामे पञ्चभिरेवाङ्गुलीभिर्वायुरोधनं, पञ्चपूजा इत्युभयमवश्यकरणीयं भवति। तथाहि—

'नासापुटं त्वङ्गुलीभिः पञ्चभिर्वायुरोधनम् ।
शनैः शनैस्तु निःशब्दं प्राणायामं निरोधयेत् ।।
(गायत्रीकल्पः/परि० ३/१५)

पंचपूजां विना येन प्राणायामं करोति यः ।
तस्य निष्फलितं कर्म विश्वामित्रेण भाषितम् ।।
लकारञ्च हकारञ्च यकारञ्च रकारयोः ।
चकारमिति विख्यातं पञ्चपूजात्मकं जपेत् ।।
(गायत्रीकल्पः/परि० ३/१९-२०)

भगवान् पशुपतिः पञ्चाक्षरमन्त्रेण नितरां तुष्यति । लिङ्गपुराणे (पूर्वार्द्धे) पंचाशीतितमोऽध्यायः 'पंचाक्षर-माहात्म्यवर्णनम्'—इति शीर्षकनिबद्ध एव । उत्तरार्द्धे 'चतुर्दशाध्याये' पंचब्रह्मकथनवर्णनात्मके भगवतः शिवस्य पंचमूर्तयः प्रोक्ताः । तथैव पंचपंचाशततमे योगस्य पंचविधत्वं प्रतिपादयन् भगवान् शिव अवोचत्—

'प्रथमो यन्त्रयोगश्च स्पर्शयोगो द्वितीयकः ।
भावयोगस्तृतीयः स्यादभावश्च चतुर्थकः ।
सर्वोत्तमो महायोगः पंचमः परिकीर्तितः ।। (लिङ्गपुराणे)

श्वेताश्वरोपनिषदि संसारसिन्धोः मनोहरं रूपकं निबद्धं ब्रह्मविद्भिर्मनीषिभिः पंचालम्बनेनैव—

'पंचस्रोतोऽम्बुं पंचयोन्युग्रवक्रां
पंचप्राणोर्मि पंचबुद्ध्यादिमूलाम् ।
पंचावर्तां पंचदुःखौघवेगां
पंचाशद् भेदां पंचपर्वामधीमः ।।(श्वेताश्वर/ २/५)

एतत् 'पंचानां महत्त्वं न केवलं भारते, अपितु बहिरपि, बहुषु सम्प्रदायेषु अस्त्येव । यवनानां 'नमाजाख्या ईशस्तुतिरद्यापि पंचवारमेव भवति । जैनानां 'पंचणमोकारमन्त्रः' एव नितरां सम्मानितः बौद्धानां 'पंचशीलानि' स्कन्धपंचकम् कौलानां 'पंचमकार'सिद्धिः,

सिक्खानां 'पंचकक्का'त्वेन प्रसिद्धानि चिह्नानि, सर्वमपीदं पंचप्रेरितमेव।

साहित्ये च पंचानामनेकधा महत्त्वं दृश्यते । केचन श्लोकाः सङ्ग्रहणीया दीयन्ते—

१. गूढमैथुनधार्ष्ट्ये च काले चालयसङ्ग्रहम् ।
अप्रमादमनालस्यं पंच शिक्षेच्च वायसात् ॥

२. आयुः कर्म च वित्तं च विद्या निधनमेव च।
पंचैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥

३. अतिथिर्बालकः पत्नी जननी जनकस्तथा ।
पंचैते गृहिणः पोष्या इतरे च स्वशक्तितः॥

४. पात्रे त्यागी गुणे रागी भोगी परिजनैः सह।
भावबोद्धा रणे योद्धा प्रभुः पंचगुणो भवेत् ॥

५. इन्द्रात्प्रभुत्वं ज्वलनात् प्रतापं यमात् वैश्रवणाच्च वित्तम्।
पराक्रमं रामजनार्दनाभ्याम् आदाय राज्ञः क्रियते शरीरम्॥

६. बुद्धिशस्त्रः प्रकृत्यङ्गो घनसंवृतिकंचुकः ।
चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः ॥

७. पंच त्वानुगमिष्यन्ति यत्र यत्र गमिष्यसि ।
मित्राण्यमित्रा मध्यस्था उपजीव्योपजीविनः ॥

८. पंचैव पूजयन् लोके यशः आप्नोति केवलम् ।
देवान् पितॄथ् मनुष्यांश्च भिक्षूनतिथिपंचमान् ॥

९. हारः प्रलम्बितपयोधरमध्यवर्ती,
शुष्कस्तनान्तरगतो वरकंचुकश्च ।
काणेक्षणांजनममूर्ध्नि च पुष्पमाला,
दीनाश्रयो बुधजनः खलु पंच दुःखम् ॥

१०. पंचभिः सह गन्तव्यं स्थातव्यं पंचभिः सह।
पंचभिः सह वक्तव्यं न दुखं पंचभिः सह॥

मन्ये अत एव भगवती श्रुतिः पूर्वमिह आह— 'पंचजना अदितिः' 'पंच च मे' साभिप्रायम् । अलमेषां पंचानां प्रपंचेन साम्प्रतम् ।

ग्रन्थसमीक्षणम्

(१) रतिमन्मथनाटकम् । प्रणेता-जगन्नाथपण्डितः । प्रधानसम्पादकः : डा० गयाचरण त्रिपाठी । सम्पादकः : डा० जगन्नाथपाठकः । प्रकाशक : गङ्गानाथझा केन्द्रीय संस्कृतविद्यापीठम्, प्रयागः-२११००२ । १९८३ ।

रतिमन्मथनाटकं बालकृष्णात् लक्ष्मीदेव्यामुत्पन्नेन महाराष्ट्रस्थेन ब्राह्मणेन विश्वामित्रगोत्रीयेण श्रुतपेटवोपनाम्ना जगन्नाथपण्डितेन अष्टादश ख्रिस्ताब्द पूर्वार्द्धे (१७४० ई०) विरचितम । अयं हि जगन्नाथपण्डितः पण्डितराज-जगन्नाथाद्भिन्नः । ऊनविंशतिपात्रैर्युतस्य 'रतिमन्मथनाटकस्य' कथा जगन्नाथपण्डितेन श्रीमद्भागवत-विष्णुपुराण-नासदीयसूक्त प्रभृतिषु वर्णितां काम-रति-मायावती-प्रद्युम्नादिविषयिणीं कथामवलम्ब्यापि महता कौशलेन परिवर्त्य संयोजिता । नाटकसम्पादको डा० जगन्नाथपाठकोऽस्मिन् प्रसङ्गे निर्दिशाति—"मन्मथस्य रत्याश्चान्योन्यप्रणयप्रसङ्गः, देवैः स्वकार्यार्थं शिवस्य पार्वत्या सह संयोजनार्थं मन्मथस्य प्रयोगः, तस्य साफल्यं, कुमारोत्पत्तिः, कुमारकृतोऽसुराणां संहारः, शम्बरासुरेण रत्या अपहरणं, देव्या च रत्याः स्थाने मायावत्याः स्थापनं, मुदितारागयो रतिपित्रोः पुत्र्या विषये व्याकुलीभावः पर्यन्ते च मन्मथेन सह शम्बरस्य सङ्ग्रामः, रत्या मायावत्या च सह सङ्गमः, श्रीदेव्याश्चाशीरित्येतत्सर्वमपि सर्वथा भिन्नमपि कथावस्तु स्वाधारभूतकथायां कविकृतं कौशलेन परिवर्तनं स्फुटीकरोति । अस्मिन् परदेवताया निजयोगमाहात्म्यमेव कथावस्तुनो गतिशीलतायां साहायकमाचरति ।' (निवेदनं, ९-१०)

नाटकमिदं शृङ्गाररसप्रधानं नाट्यशास्त्रनियमानुसारि सुखान्तं च विद्यते । प्रथमं नाटकमिदं 'गोपालनारायण एण्ड कं०, मुम्बई' द्वारा १८८९-९० ख्रिस्ताब्दे ग्रन्थरत्नमालायां प्रकाशितमासीत् । अद्यत्वे तत्संस्करणं दुर्लभं संवृत्तम् । डा० जगन्नाथपाठकमहाभागेन तत्तत्पाण्डुलिपिसाहाय्येनेदं संस्करणं सम्पाद्य सहृदयेभ्यो बहुमूल्योपहारः समर्पित इत्यसौ महानुभावो भूयो भूयोऽभिनन्द्यते ।

ग्रन्थस्याकर्षकं मुद्रणं कस्य न चेतोहरः ? यत्र-क्वचिज्जाता मुद्रणत्रुटयस्तु अद्यत्वे प्रायः सर्वेष्वेव ग्रन्थेषु सम्भवाः । प्रथमपरिशिष्टेऽन्तिमस्य 'अश्वधाटी' च्छन्दसि निबद्धस्य पद्यस्यान्तिमः खण्डितः पादः सहृदयानां मोदाय अधो दीयते :—

'सन्तारकं विनत सन्तानकं सपदि तं तावदाश्रय शिवम् ।'

(२) श्रीव्रजस्तवमालिका। प्रणेता : डा० वासुदेव कृष्ण चतुर्वेदी। प्रकाशक : श्रीकृष्णसत्सङ्गभवन, ६६६ गतश्रम टीला, मथुरा। प्रथमं संस्करणम् १९८३ ई०। मूल्यम् ४०-०० रूप्यकाणि। पृष्ठसंख्या-५०।

अस्मिन् काव्ये 'श्रीद्वारकेशाष्टकम्', 'श्रीराधिकाष्टकम्', 'व्रजगीतिः', 'विरहगीतिः', 'ईशगीति', 'गोस्तवः', 'गोवर्धनगीतिः', 'श्रीकृष्णगीतिः', 'गलज्जलिका एवं गीतिः' 'श्रीराधिकागीतिः' चेत्येतेषु दशसु शीर्षकेषु विद्वद्वरेण कविवर्येण डा० वासुदेवकृष्णचतुर्वेदमहाभागेन व्रजसंस्कृतेरस्तित्वविधायकतत्त्वानां गानमत्यन्तं मनोहारिण्या रीत्या कृतम्। कवेर्भक्तिभावः, कारुण्यभावः, नवनवोन्मेषशालिनी प्रतिभा, पारम्परिकसंस्कृतवृत्तरचनापाटवेन साकमाधुनिकलोकगीत - गजल-प्रभृतिगीतविधानकौशलं, अन्यच्च तत्तद्वैशिष्ट्यमस्यां रचनायां साक्षात्कर्तुं शक्यते सहृदयैः।

'व्रजगीत्यां' कविः यया प्रसन्नमधुरया मातृभूभक्तिभावभरितया सरण्या व्रजभुवः सौन्दर्यं समुन्मीलयति सा कस्य न चेतोहरा स्यात् ?

तुलसीदलगन्धभृतं निखिलं, व्रजराजकुलार्चितधेनुभरम्।
व्रज कंसनिषूदनपुण्यवनं यदि चेच्छसि जन्म निजं सफलम्॥

• ० ०

मुरलीनिनदंगृहमध्यलसत्तरुणीजनविस्मृतदेहदशम्।
व्रज, रासरसेश्वररासगृहं, यदि चेच्छसि जन्म निजं सफलम्॥
बदरीवनमत्र कुशस्थलकं जगदीशपुरी शिवधामपरम्।
व्रज, धामचतुष्टयपूर्तिकरं यदि चेच्छसि जन्म निजं सफलम्॥

'गोस्तवे' कवेः गोवंशनाशजन्या पीडा कं सचेतसं करुणार्द्रं न करोति ?

प्रपीडितानां च जरातुराणां, गवां तथा वत्सतरादिकानाम्।
नास्मिन् स्वदेशे भवताद्विनाशः सम्प्रार्थयामो भगवन्! तवाग्रे।
खादन्ति सस्यं निवसन्त्यरण्ये दुहन्ति लोकस्य विवृद्धिहेतोः।
गोमूत्रकैः क्षेत्रमनोरथा या गावः प्रपूज्याः सततं नराणाम्।
हे श्याम! कारुणिक! मङ्गलनामधारिन्!
वृन्दावनेश! निजभक्तजनार्तिहारिन्!
सम्मानयोग्य-सुखशान्ति-सुधाप्रसारिन्!
गोवंशनाशमवरोधय हे विहारिन्!

तस्मिन् युगे, यस्मिन् मानवो नाम गोरक्षणं न प्रतिश्रृणोति, भगवन्तं प्रति कवेः प्रार्थना कञ्चिदभिप्रायविशेषं समभिव्यनक्ति।

डा० चतुर्वेदमहाभागः स्वनूतनकृतये वर्द्धाप्यते।

(४) छायापतिशतकम् । रचनाकारः— श्रीविठलदेवुनिसुन्दरशर्मा । प्राप्तिस्थानम् - श्रीमती विठलदेवुनि नागरत्नम्मा, १-९-१११२/जी/३, दयानन्दनगरम्, हैदराबादः-५०००४४ । प्रथमावृत्तिः १९८३ । मूल्यम् ६.०० पृष्ठ संख्या ६० ।

संस्कृतस्य स्तोत्रसाहित्यं विपुलमस्ति । आस्तिकैः स्वेष्टदेवतार्चनार्थं स्तोत्राणि रच्यन्ते अनुदिनं पठ्यन्ते च । सूर्यमवलम्ब्य संस्कृते बहूनि स्तोत्राणि समुपलभ्यन्ते येषु 'सूर्यकवचस्तोत्रम्','सवितस्तृस्तोत्रम्', 'सूर्यसहस्रनामस्तोत्रम्', 'सूर्यमूलमन्त्रस्तोत्रम्', 'सूर्यस्तवराजः', 'सूर्याष्टोत्तरशतनामस्तोत्रम्', 'सूर्य-शतकम्' 'आदित्यस्तोत्ररत्नवृत्तिः' 'सूर्याष्टकम्' इत्येवमादीनि प्रमुखतया विराजन्ते । अस्यां परम्परायां विंशशताब्द्याः श्री विठलदेवुनिसुन्दरशर्मणा विरचितं काव्यगुणोपेतं 'छायापतिशतकम्' विलसति । अस्मिन् स्तोत्रे प्रतिपद्यं चतुर्थचरणरूपेण 'छायापते ! ग्रहकुलाधिप ! लोकबन्धो !' इति मुकुटं विद्यते । इतः पूर्वं कविना क्रमशः १९७८ तमे, १९८० तमे, १९८१ तमे, १९८२ तमे चेशवीयेऽब्दे श्रीनिवासशतकं, देवीशतकं, वीराञ्जनेयशतकं शम्भुशतकं च प्रणीतानि ।

छायापतिशतकस्य विषये विस्तृता समीक्षा ग्रन्थारम्भे श्रीमूलम्पल्लि-चन्द्रशेखरशर्मणा लिखिता । अस्य शतकस्य वैशिष्ट्यमुद्घाटयन् श्री शर्मा तत्र लिखिति—"सुन्दरशर्मणां 'छायापतिशतक'-सरणिस्तु क्वचिल्लोकवृत्तं, क्वचिद्वास्तविकं (वस्तु (कथा) सम्बन्धि), क्वचित्तात्त्विकं, क्वचिदालङ्का-रिकं, क्वचिदन्यान्यं च विषयं यथापरितोषं सहृदयविदुषामाचिन्वती विजयतेतराम्" (आलोकः पृ० २३-२४)

दिङ्मात्रमुदाह्रियते पद्यमेकम् :—

कालोऽसि हि त्वमथ कालनियामकोऽसि
कालेन ते नियम इत्यपि केचिदाहुः ।
सर्वं त्वयीह ननु युज्यत एव भानो !
छायापते ! ग्रहकुलाधिप ! लोकबन्धो !

(छायापतिशतकम्/१००)

शतकमिदं काव्यरसिकानां सूर्योपासकानां च कृते समानरूपेण मोदकरम् । श्री विठलदेवुनिसुन्दरशर्ममहाभागाः एतत्कृतये अभिनन्द्यते ।

(५) श्रीकृष्णलीलातरङ्गिणी (बेल्लङ्कोण्डरामरायकवि-विरचिता) । सम्पा०—डा० प्र०ग० लाले । प्रका०-उस्मानिया विश्वविद्यालयः, हैदराबादः ।

संस्क० १९८२। मूल्यम्—रु० २०.०० ॥

वेल्लङ्कोण्डरामरायकविः आन्ध्रप्रदेशे गुण्टूरजनपदे 'पमिडिपाडु' स्थाने पञ्चसप्तत्युत्तराष्टादशशततमेशवीयेऽब्दे दिसम्बरमासे जनिं जग्राह। अनेन 'श्रीकृष्णलीलातरङ्गिणी', रचिता। इयं काव्यकृतिः श्रीकृष्णस्य गोपिकावल्लभरूपं प्रस्तौति। सप्तस्वपि तरङ्गेषु (सर्गेषु) विचित्रमार्गानुयायिनी कविता लभ्यते। कविरनुप्रासप्रियोऽस्ति। षष्ठे तरङ्गे 'अश्वधाटी' वृत्तस्य छटा अवलोकनीया विद्यते।

गोपालने पृथुकगोपालने बहुलपापार्दने व्रजगत-
स्त्रीपालने पृथुकगोपावने व्रजगगोपावने सुमनसाम्।
गोपालने व्यथितगोपालने मधुरगोपालने च वशतः
लेपाशयं हृदवलेपापहं स्वमृतकूपाकृतिं हरिमये ॥ (६/२८४)

डा० प्र० ग० लाले महाभागैरस्य ग्रन्थस्य सम्पादनं कृत्वा भूमिका-कवि-परिचयादिसहितं संस्करणं प्रस्तुतम्। एतादृश- दुर्लभग्रन्थस्य सुलभीकरणार्थम् इमे धन्यवादार्हाः। यद्येतेषां प्रेरणयास्य ग्रन्थस्य संस्कृत-टीकापि केनचिद्विदुषा विरच्येत तथा सुवर्णसुगन्धयोगः सम्पद्येत। (रमाकान्त शुक्लः)

देववाणी-परिषद्वार्ता

(१) देववाणी-परिषदः सहसचिवस्य आचार्यरवीन्द्रनागरमहाभागस्य सत्प्रयत्नैः 'मारीशस' देशे देववाणी-विद्यालयस्य स्थापना सञ्जाता। तत्रत्याश्छात्रा तत्रत्ये दूरदर्शने नियमतः 'अक्षरश्लोकं' प्रस्तुवन्ति। एते छात्रा देववाणी-परिषदा निर्धारितं पाठ्यक्रममनुसृत्य संस्कृतं पठन्ति।

(२) परिषद् अस्मिन् वर्षे अखिलभारतीयसंस्कृतसम्मेलनं, नाट्यसमारोहम्, अक्षरश्लोकं, संस्कृतसङ्गीतकं, संस्कृतनृत्यं, संस्कृतसमूहगानप्रतियोगितां, सद्यःपद्यपाठप्रतियोगिताञ्चायोजयति। तिथिनिर्देशो यथाकालं करिष्यते।

(३) ९-७-१९८३ तारिकायां परिषदस्तत्त्वावधाने 'आर ६, वाणी-विहार, नयी दिल्ली-११००५९' इति स्थाने भरतनाट्यविशारदाया श्रीमत्याः कमालिनीदत्तमहाभागायाः 'भारतीयनृत्यानि संस्कृतं चे'ति विषयमवलम्ब्य भाषणं सञ्जातम्।

(रमा शुक्ला)

अर्वाचीनसंस्कृतम्
(R. N. 34554/79)

※

१.	प्रकाशन का स्थान	नयी दिल्ली
२	प्रकाशन की आवधिकता	त्रैमासिक
३	मुद्रक तथा प्रकाशक का नाम, राष्ट्रीयता तथा पता	डा० रमाकान्त शुक्ल (देववाणी-परिषद्, दिल्ली-कृते) भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९
४.	सम्पादक का नाम, राष्ट्रीयता तथा पता	डा० रमाकान्त शुक्ल भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९
५.	उन व्यक्तियों के नाम और पता जो इस पत्रिका के मालिक या साझेदार हैं अथवा जो इसकी सारी पूँजी के एक प्रतिशत से अधिक के हिस्सेदार हैं।	देववाणी-परिषद्, दिल्ली ६, वाणी-विहार, नयी दिल्ली-११००५९

मैं, डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद् दिल्ली
प्रकाशक

देववाणी-परिषदा प्रकाशिताः ग्रन्थाः

१.	अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (प्रथमखण्डः) (सं० : डा० रमाकान्तशुक्लः)	रु० १५.००
२.	" " " (द्वितीयखण्डः)	रु० ३०.००
३.	" " " (तृतीयखण्डः)	रु० ३०.००
४.	कर्णभूषणम् (डा० सी० आर० स्वामिनाथन्)	रु० ५.००
५.	श्री बदरीशसुप्रभातम् (")	रु० १०.००
६	श्रीपादसप्ततिः (पादपरागव्याख्या) (")	रु० ४०.००
७.	श्रीकृष्णचरितम् (डा० रमेशचन्द्रशुक्लः)	रु० ३०.००
८.	सुगमरामायणम् " "	रु० ३५.००
९.	हरविजयस्य साहित्यिकमध्ययनम् (डा० कृष्णकान्तशुक्लः)	९०.००
१०.	श्रीमदप्पयदीक्षितचरितम् (डा० हरिनारायणदीक्षितः)	रु० २०.००
११.	भारतस्वातन्त्र्यसंग्रामेतिहासः (डा० रमेशचन्द्र शुक्लः)	रु० ३५.००
१२.	सदाशयसमुच्चयः (पं०टी०वी० परमेश्वर अय्यरः)	रु० १५.००
१३.	आभाणकमञ्जरी (" ")	रु० १५.००
१४.	मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा)	रु० २०.००
१५.	रघुवंश : एक विश्लेषण (" ")	रु० २०.००
१६.	अभिज्ञानशाकुन्तल : एक विश्लेषण (")	रु० २०.००
१७.	कालिदास की कला और संस्कृति (भाग २) (लेखक : डा० देवीदत्त शर्मा)	रु० ६०.००
१८.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्तशुक्लः)	रु० ३०.००
१९.	अर्वाचीनसंस्कृतसाहित्यपरिचय (प्रथम खण्ड) (")	रु० ३०.००
२०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
२१.	साधारणीकरण और समानान्तर चिन्तन की पूर्वपीठिका (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
२२.	अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्र शुक्लः)	रु० २०.००
२३.	भट्टनायक और अभिनवगुप्त की साधारणीकरण-विषयक अवधारणा (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
२४.	अभिनवोत्तर संस्कृत काव्यशास्त्र में साधारणीकरण-विमर्श (डा० सुलेखचन्द्रशर्मा)	रु०. ५०.००
२५	साधारणीकरण : प्राच्य और प्रतीच्य चिन्तन : (डा० सुलेखचन्द्रशर्मा) (यन्त्रस्थ)	रु०. ५०.००
२६.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्तशुक्लः)	रु० ४०.००
२७.	संस्कृत साहित्य में राष्ट्रिय भावना (भाग १) (डा० हरिनारायण दीक्षित)	रु० ५०.००
२८.	संस्कृत साहित्य में राष्ट्रिय भावना (भाग-२)	५०.००
२९.	" " (भाग-३)	५०.००
३०.	साहित्यकौतुकम् (काव्यम्) (पं०टी०वी०परमेश्वर अय्यरः)	रु० ४०.००
३१.	पूर्णकुम्भः (ललितनिबन्धसंग्रह) (पं० विष्णुकान्त शुक्लः)	रु० ७०.००
३२.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
३३.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

पञ्चमवर्षे चतुर्थोऽङ्कः

१५ अक्तूबर १९८३

प्रधानसम्पादकः

डा० रमाकान्तशुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

परामर्शदातृमण्डलम्

(१) डा० रामसुरेशपाण्डेयः
एम०ए०, पीएच० डी०, व्याकरणाचार्यः

(२) डा० कृष्णकान्तशुक्लः
एम० ए०, पीएच० डी०, साहित्याचार्यः

(३) डा० उमाकान्त शुक्लः
एम०ए०, पीएच० डी०, साहित्याचार्यः, सांख्ययोगाचार्यः

(४) डा० सुलेखचन्द्र शर्मा
एम०ए०, पीएच० डी०, साहित्याचार्यः

विषय-सूची

क्रमः	लेखः/रचना (लेखकः)	पृष्ठाङ्कः
१.	सम्पादकीयम्	२५१-२५२
२.	श्रीपादपरागशुद्धिपत्रम्	२५३-२५४
३.	श्रीपादसप्तते: 'श्रीपादपरागा'ख्या व्याख्या (डा० सी० आर स्वामिनाथन्)	२५५-३१२
४.	अहं स्वतन्त्रता भणामि (कविता) (डा० रमाकान्त शुक्लः)	३१३-३१६
५.	देववाणी-परिषद्वार्ता (श्रीमती रमा शुक्ला)	३१७-३२०
६.	पुस्तक समीक्षा (सम्पादकः)	३२१-३२२
७.	देववाणी-परिषदोऽष्टमसङ्कल्पनादिवसे मुख्यातिथे: श्री पी०के० थुंगनमहाभागस्याभिभाषणम्	३२३-३२६

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् Rs. 20-00 (भारते)
पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription
Rs. 20-00 (In India)
5 Dollars or Pounds (Abroad)

सम्पादकीयम्

'अर्वाचीनसंस्कृत'स्य पञ्चमवर्षे चतुर्थोऽङ्कः पाठकानां करकमलेषूपायनीक्रियते। अस्मिन्नङ्के 'श्रीपादपरागा'ख्या अर्वाचीनसंस्कृतटीका, कवितैका, देववाणी-परिषद्वार्ता पुस्तक-समीक्षा च प्रकाश्यन्ते।

संस्कृतस्य टीकासाहित्यं विपुलमस्ति। स्वदेशकालस्थितानां पाठकानां स्तरानुरूपं रुच्यनुरूपं च टीका विरच्यन्ते टीकाकारैः। पुरातनरचनाः परवर्तिभ्यः पाठकेभ्योऽवदाताः स्युरित्यर्थं प्रायष्टीका विरच्यन्ते विद्वद्भिः। रचनाकारस्य रचनायां कोऽभिप्राय आसीदिति स्पष्टीकर्तुं त एव टीकाकाराः प्रभवन्ति ये रचनाकाराणां परिवेशेनाधिकाधिकं परिचिताः भवन्ति। मूलरचनाकारस्य जीवने तन्मुखात्काव्यं शृण्वतां कृते प्रायष्टीका न अपेक्ष्यन्ते यतो हि काव्यं पठन् कविः पृष्टः अपृष्टो वा, कठिनानां सन्दिग्धानां वांशानां व्याख्यां स्वमुखेनैव कर्तुं शक्नोति। एवं कञ्चित्कालं यावत् श्रुतिपरम्परया सा व्याख्या प्रचलति। किन्तु दिवं याते तस्मिन् कवौ दिवं यातेषु च समकालीनेषु श्रोतृषु यदि मूलरूपेण सा कविता परवर्तिश्रोतृणां पुरतः प्रस्तूयते तदा सम्भवतः सा काञ्चिद्व्याख्यामपेक्षते यतो हि काव्योल्लिखिता प्राक्कालिका अनेके सङ्केताः, प्रयोगाः, अनेका घटनाश्च गूढाभिप्राया अपि सम्भवन्ति। तदभिप्रायस्फोटनार्थं व्याख्या अपेक्ष्यते। एतादृश्यां स्थितौ येषां विदुषां प्रतिभा कवेरभिप्रायेण साकं संवादं कर्तुं प्रभवति त एव सरस्वतीदत्तवरप्रसादाः विद्वांसो मूलरचनाया अभिप्रायं विशदीकर्तुं समर्था भवन्ति। केचित्तु विद्वांसः कविकृतरचनायां स्वमनोगताभिप्रायस्य आरोपणमपि कुर्वाणा दृश्यन्ते। एतादृशः टीकाकाराः एकस्यैव पद्यस्य व्याख्यायां परस्परं विभिद्यन्तेऽपि। एतत्तु निश्चितं यत् कापि टीका परवर्तिनि काले पूर्ववर्तिन्याः रचनायाः लोकप्रियत्वं विद्वत्प्रियत्वं वा सूचयति। इत्थं कवीनां व्याख्याकर्तॄणां च परम्परा परस्परं सम्बद्ध्यते। डा॰ सी॰ आर॰ स्वामिनाथकृता श्रीनारायणभट्टपादप्रणीतश्रीपादसप्ततेः श्रीपादपरागाख्या व्याख्या इदमेव तथ्यं पुष्णाति।

'श्रीपादसप्ततिः' केरलेषु 'तिरुनावाय'—इत्याख्ये क्षेत्रे १५६० तमेशवीयेऽब्दे समुत्पन्नेन प्रसिद्धभक्तिकाव्य'नारायणीय'कर्त्रा 'मेप्पत्तूरभट्टतिरी'त्यपरनाम्ना श्रीनारायणभट्टपादेन मुक्तिक्षेत्रे प्रतिष्ठिताया देव्या महिषासुरमर्दिन्याः पादद्वयमवलम्ब्य प्रणीता। श्रीपादसप्ततिः भक्तानां काव्यरसिकानां च कृते अनुपमो रसनिधिरस्ति। अस्या रचनायाः केरलेषु बहुप्रचारो वर्तते। अस्याः काचित् संस्कृतव्याख्या कोटिलिङ्गपुरवास्तव्येन 'मुण्टनाट् शङ्करन्

नम्पूतिरि'-महाभागेन बहो: कालात् पूर्वं विलिख्य प्रकाशितासीत् । किन्तु केरलाद्बहिस्तस्या व्याख्याया: श्रीपादसप्ततेर्वा प्रचुरप्रचारो नाभूत् । १०.३.१९२७ तारिकायां केरलराज्यान्तर्गत 'पालघाट' नाम्नि स्थाने समुत्पन्नेन एम०ए०-साहित्याचार्य-एम० लिट्०-पीएच०डी०-प्रभृत्युपाधि-भूषितेन, 'कर्णभूषणम्', 'श्रीबदरीशसुप्रभातम्' गीताभाष्याणां तुलनात्मक-मध्ययनम्' इत्याद्यनेकग्रन्थप्रणेत्रा, अद्यत्वे च भारतशासनस्य शिक्षासंस्कृति-मन्त्रालये संस्कृते उपपरामर्शदातृपदमधिष्ठितेन, 'कार्यकारो'पाह्व श्रीशास्त्र-पुरम् रामकृष्ण (सी० आर०) स्वामिनाथमहाभागेन १९८३ तमेशवीयेऽब्दे नवदिल्ल्यां रचितयानया 'श्रीपादपरागा ख्यया व्याख्यया भक्ता: काव्यरसिकाश्च उपकृता भविष्यन्ति । अस्या: टीकाया मूलग्रन्थेन साकं प्रकाशनमित: पूर्वं ३१ अगस्त १९८३ तारिकायां देववाणी-परिषदा पुस्तकाकारेण कृतमासीत् । सैव व्याख्या अस्माकं पाठकेभ्योऽल्पमूल्येनैव सुलभा स्यादित्यर्थमियमस्मिन्नङ्केऽपि प्रकाश्यते । अर्वाचीनसंस्कृतटीकास्वियं टीका विशिष्टं स्थानं भजते ।

'अहं स्वतन्त्रता भणामि' इत्येषा कविता प्रस्तुतपङ्क्तिलेखकेन १५-८-१९८३ तारिकायां प्रणीता । सर्वप्रथममं चास्या: पाठ: २१-८-१९८३ तारिकायां देववाणी-परिषदायोजितेऽखिलभारतीयसंस्कृतकविसम्मेलनेऽभूत् । अस्यां कवितायां वर्तमानकालिककटुयथार्थस्य मनाक् संकेत: क्रियते, किन्तु आशावादो नैव त्यज्यते ।

'देववाणी परिषद्वार्तायां' विगतमासत्रये सञ्जातानां परिषत्कार्यकला-पानां संक्षिप्तं विवरणं दीयते ।

पुस्तकसमीक्षायां कतिपयानि अर्वाचीनसंस्कृतपुस्तकानि समीक्ष्यन्ते ।

अनेनाङ्केन अर्वाचीनसंस्कृतस्य पञ्चमवर्षसम्पूर्तिर्भवति । उत्तरोत्तरमस्य पृष्ठसंख्या वर्धते, प्रकाशनव्ययोऽपि द्विगुणतां यात:; डाकव्ययोऽपि वृद्धिं गत:, किन्त्वस्य ग्राहकशुल्कं नैव परिवृद्धिं याति । यद्यस्माकं कृपालव: पाठका: अस्य प्रचारार्थं, समयेन ग्राहकशुल्कप्रेषणार्थं च सानुक्रोशा भवेयुस्तदा नूनमस्य बलसंवर्धनं भवेत् ।

पाठका: अग्रेप्रदत्तशुद्धिपत्रानुसारं मुद्रणत्रुटी: संशोधयितुं सादरं प्रार्थ्यन्ते । विदुषामाश्रव:

१५-१०-१९८३

सम्पादक:

श्रीपादपरागस्य शुद्धिपत्रम्

(प्रथममशुद्धं रूपं, तदनु शुद्धं रूपं, तदनु पृष्ठसंख्या तदनन्तरं च पंक्तिसंख्या दीयन्ते। पंक्तिसंख्यागणनाकाले शीर्षकपंक्तिः श्लोकाङ्कपंक्तिश्च न गणनीये।)

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः	पंक्तिसंख्या
मर्धान्तरे	मूर्धान्तरे	२५८	१४
भवनि	भवति	२५९	५
परमश्वरि	परमेश्वरि	२५९	१२
पूर्वश्लोके	पूर्वश्लोके	२६१	१८
सरसीरुहध्रुक्तं	सरसीरुहद्रुवतं	२६१	२१
अन्तदृष्ट्या	अन्तर्दृष्ट्या	२६२	१
दूरीकतु	दूरीकर्तुं	२६३	११
त्वनाद्यविद्यामय	त्वनाद्यविद्यामय	२६३	११
आनम्रपु	आनम्रेपु	२६५	२
लाक्षापातवशन	लाक्षापातवशेन	२६६	१
तदोष्ठपुटचुम्बित	तदोष्ठपुटचुम्बितं	२६९	१२
०प्याधिकं	०प्यधिकं	२७१	२
सखो	सखी	२७१	१९
फलान्तरे	फालान्तरे	२७९	१७
श्रीदेवी	श्रीदेवीं	२८०	२२
०मश्मारोपणायामश्मन्या०	०मश्मारोपणायाऽश्मन्या०	२८१	१४
स्त्रीरत्नभूता	स्त्रीरत्नभूतां	२८२	६
मृगेंन्द्रोपर्यङ्कितया	मृगेन्द्रोपर्यङ्कितेन	२८३	२१
आकषण	आकर्षण	२८६	१
त्रैलोकम०	त्रैलोक्यम०	२८६	४
स्थगा०	स्थगी०	२८६	११
स्ववरिण:	स्ववैरिण:	२८६	१६

अशुद्धम्	शुद्धम्	पृष्ठांकः	पंक्तिसंख्या
यां॰ मङ्गली॰	॰यामङ्गुली॰	२८७	१३
पञ्चा॰	पश्चा॰	२८७	२२
अङ्गलय	अङ्गलय	२८९	१४
शीतलतातयालेपनं	शीतलता तया लेपनं	२९१	५
उद्वगकारणषु	उद्वेगकारणेषु	२९२	१
मदिन्यामपि	मेदिन्यामपि	२९३	१
न्यस्मते	न्यस्यते	२९३	१
महिमान	महिमानं	२९४	६
तद्वयम्	तद्द्वयम्	२९६	१२
पञ्चभिः आत्मनः	पञ्चभिः	२९७	१
॰मञ्जीरयोश्चद्वयी॰	॰मञ्जीरयोश्च द्वयी	२९९	२
आम्बिके	अम्बिके	२९९	३
दृष्यन्त	दृश्यन्त	३०१	१०
शोभागुलि	शोभाङ्गुलि	३०२	११
युद्ध	युद्धे	३०३	११
दव्याः	देव्याः	३०३	१२
सुरपतेरथना	सुरपतेरर्थना	३०३	१३
आज्यन	आज्येन	३०३	१८
शनः	शनैः	३०४	१२
महिषाभिहन्त्रिचकितं	महिषाभिहन्त्रि चकितं	३०४	१३
तम्म	तन्मे	३०५	३
कालस्यान्तकस्यसं	कालस्यान्तकस्य		
प्रार्थना	सम्प्रार्थनाः	३०५	४
प्राथना	प्रार्थनाः	३०६	१
॰द्योतिकाः	॰द्योतकाः	३०७	१७
चतुर्णा	चतुर्णां	३१०	१२

नारायणभट्टपादविरचिता

श्रीपादसप्ततिः

कार्यंकारोपाह्व डाक्टर शास्त्रपुररामकृष्णस्वामिनाथकृत-

'श्रीपादपराग'-व्याख्यासंवलिता

(१)

दक्षाधःकरपल्लवे लसदसिं दक्षोर्ध्वगे शूलिनीं
वामोर्ध्वे फलकोज्ज्वलां कटितटन्यस्तान्यहस्ताम्बुजाम् ।
शूलाग्राहतकासरासुरशिरोनिष्ठां प्रहृष्टां सुरै-
र्जुष्टामिष्टवरप्रदां भगवतीं मुक्तिस्थलस्थां भजे ॥

कार्यंकारोपाह्व स्वामिनाथरचितः श्रीपादपरागः

महिषासुरवधेन समुन्मूलितजगद्भयां सुरगणैरभिष्टुतां मुक्तिस्थलाख्ये क्षेत्रे विराजमानां भगवतीं सप्ततिश्लोकैः स्तोतु प्रवृत्तः श्रीनारायणभट्टपादकविः प्रथमं देव्याः स्वरूपानुसन्धानं करोति—दक्षेति । दक्षे दक्षिणभागस्थिते अधः अधोभागवर्त्तिनि करपल्लवे, करः पल्लव इव तस्मिन् । लसन्तं शोभमानमसिं करवालं दधानां; दक्षोर्ध्वगे दक्षभाग उर्द्ध्वगतेन करेण शूलिनीं शूलायुधं बिभ्राणां; वामोर्ध्वे वामभागस्थे ऊर्ध्वकरे फलकोज्ज्वलां चर्मायुधेन देदीप्यमानाम् । अन्यहस्ताम्बुजां वामभागे अधोविद्यमानः करः अम्बुजमिव, कटितटे न्यस्तम् अन्यहस्ताम्बुजं यया ताम् । कटितटे करं निवेश्य तिष्ठन्तीं । शूलाग्राहतः शूलाग्रेणाहतः निहतः कासरासुरः महिषासुरस्तस्य शिरसि निष्ठां तिष्ठन्तीं प्रहृष्टां सर्वबाधाप्रशमनाख्यं स्वकीयं कर्त्तव्यं निर्वर्त्य कृतकृत्यतया प्रकृष्टं हर्षमनुभवन्तीं; सुरगणैः शक्रादिभिर्जुष्टां सेविताम् इष्टफलप्रदां स्वाश्रितेभ्योऽभीष्टं वरं दातुमुत्सुकां मुक्तिस्थलस्थां मुक्तिस्थलमिति प्रसिद्धे केरलदेशवर्तिनि क्षेत्रे कृतसान्निध्यां भगवतीं भजे मनोवाक्कायचेष्टाभिः प्रपद्ये ॥१॥

(२)

यत्संवाहनलोभिनश्शशिकलाचूडस्य हस्ताम्बुज-
स्पर्शेनापि च लोहितायति मुहुस्त्वत्पादपङ्केरुहम् ।
तेनैवोद्धतकासरासुरशिरःशृङ्गाग्रसञ्चूर्णन-
प्राचण्ड्यं तदनुष्ठितं किल कथं मुक्तिस्थलस्थे शिवे ।।

हे मुक्तिस्थलस्थे शिवे शिवमहिषि ! अथवा मङ्गलस्वरूपिणि ! त्वत्पादपङ्केरुहं पद्मवदतिकोमलं पदं यद्वर्त्तते तस्य संवाहनाय लोभिनः कृताभिलाषस्य संवाहनलोभिनः शशिकलाचूडस्य खण्डेन्दु-मौलेः परमेश्वरस्य हस्ताम्बुजस्पर्शेनापि अम्बुजवदतिकोमलो हस्तस्तस्य तादृशमृदुस्पर्शेनाऽपि मुहुर्वारं वारं लोहितायति शोणिमानं वहति । अम्बुजेनाम्बुजं स्पृष्टं तदपि न सहते इति भावः । तत्रापि धावल्यं शैत्यं चाधातुं चन्द्रकलां वहति तदानीमपि लोहितायति । पूर्णश्चन्द्रः पङ्कजस्य परिपन्थीति कृत्वा कलामेव वहति तदापि न सहते । एवं सौकुमार्यं वहत् यत्पादपद्मं कामुकस्य मृद्वङ्गुलि-स्पर्शमप्यसहमानं उद्धतस्य वीर्योन्मत्तस्य कासरासुरस्य महिषा-सुरस्य शिर एव शृङ्गः शिखरस्तस्याग्रस्य सञ्चूर्णनं तस्मिन् यत्प्राचण्ड्यं तैक्ष्ण्य-काठिन्य-कर्कशत्वादिविशिष्टस्य महिषासुरस्य करोट्यास्सञ्चूर्णने प्राचण्ड्यं प्रावीण्यमनुष्ठितं कथमिति महदा-श्चर्यम् । "यदादाय न्यस्तं दृषदि दयमानेन मनसा" इति सौन्दर्य-लहर्यां विवाहावसरे अश्मारोपणमपि पदपद्मस्य सौकुमार्यानुरूपं नासीदिति यदुक्तं तदत्र स्मारितम् ।।२।।

(३)

त्वत्पादं निजमस्तके घटयितुं के के नु लोके जनाः
किं किं नारचयन्ति दुश्चरतपश्चर्यासपर्यादिकम् ।
मन्ये धन्यतमं तु देवि महिषं वैरस्थयैव त्वया
यन्मूर्ध्नि स्वयमेव पातकहरं पादाम्बुजं पातितम् ।।

लोकेऽस्मिन् के के जनाः कतिविधा नराः तापत्रयनिरसनाय जिज्ञासया ऐहिक सुखातिशयलाभाय वा मोक्षेच्छया वा प्रेरिताः कतिप्रकारकाः जनाः निजमस्तके त्वत्पादं घटयितुं निजशिरसि भगवत्याश्चरणरेणुसन्धारणानुरूपां घटनां सम्पादयितुमर्थात् भगवत्याश्चरणस्पर्शमात्रेण तत्प्रसादपरिपाकमयमीप्सितफलमवाप्तुं दुश्चरतपश्चर्यासपर्यादिकं चान्द्रायणादितपश्चर्यां महायागादि सपर्याविधिमन्यान्यर्चनास्तोत्रादीनि दुश्चराणि कृच्छ्रसाध्यानि कानि कानि नानुतिष्ठन्ति ? येन केन प्रकारेणापि भगवत्याः प्रसादः सम्पादनीय इति निश्चयेन नानाविधानि तपांसि वरिवस्यादीनि वा स्व स्व वर्णाश्रमावस्थाशक्त्यनुरोधमाचरन्तीति भावः । किन्तु तेभ्यस्तु महिषं महिषासुरं धन्यतमं मन्ये, यतः वैरस्थया एव त्वया शत्रुगोष्ठ्यां तेन परिगण्यमानयैव त्वया तस्या मूर्ध्नि स्वयमेव तस्याभ्यर्थनां विनैव तदर्थं तपःपूजाध्यानादिक मननुतिष्ठत एव तस्य शिरसि पातकहरं समस्तदुरितापनोदनं पादाम्बुजं पातितम् । महिषमूर्ध्नि स्वपादाघातरूपस्तपस्विजनदुर्लभो-ऽनुग्रहः कृतः । अतस्स एवानवरतं वरिवस्यादिकमाचरद्भ्यो भक्तेभ्यो धन्यतम इति विश्वसिमि । 'चित्त कृपा समरनिष्ठुरता च दृष्टा' इति सप्तशत्यां भगवत्या कृतो निग्रहोऽपि कृपापारवश्यजनितोऽनुग्रह एवेति सूचितम् ।।३।।

(४)

त्वत्पादाम्बुजमर्पितं क्व नु शिवे किं नु त्रयीमस्तके
नित्यं तत्त्वविचारदत्तमनसां चित्ताम्बुजाग्रेषु वा
किं वा त्वत्प्रणयप्रकोपविनमन्मारारिमौलिस्थले
किं प्रोत्खण्डितघोरसैरिभमहादैत्येन्द्रमूर्धान्तरे ।।

हे शिवे ! शिवसहचरि ! त्वत्पादाम्बुजं क्वन्वर्पितं कुत्र कुत्र विन्यस्तमिति परिसंख्यातुमथवा कुत्र कुत्रान्वेषणीयमिति निर्णेतुं

न शक्यते। किं त्रयीमस्तके नु? त्रयो वेदास्तेषां समाहारस्त्रयी तन्मस्तके उपनिषत्सु वेदान्तभागेषु प्रतिपादितं किम्? वेदान्तेष्वन्वेषणीयमित्यर्थः। अथवा नित्यमनवरतं तत्त्वविचारदत्तमनसां तत्त्वस्य विवेचने दत्तं मनो यैस्तेषाम्, व्यग्राणां ज्ञानिनां चित्ताम्बुजाग्रेषु हृदयग्रन्थिं भित्वा अपरोक्षानुभूतिमुत्पादयन्ती सन्निधत्स इति श्रूयते; तत्र वा मृग्यम्? अथवा त्वत्प्रणयप्रकोपावसरे प्रणयकलहवेलायां प्रणय प्रकोपे विनमन् स चासौ मारारिः शिवस्तस्य मौलिस्थलं तत्र विन्यस्तं तव पदं तत्र विनमिते नम्रीभूते मारारेः शिवस्य मौलौ वा तव पदं न्यस्तम्? दग्धमदनस्यापि तादृशकामोद्दीपनदक्षा त्वं यत्प्रणयकुपितां त्वां सान्त्वयितुं नतमस्तकस्सन् शिवो यदा स्वकामपरतन्त्रतां त्वत्पुरः प्रकटयति तदानीं क्षमापण व्याजेन तन्मौलौ न्यस्तं भवति ते पदम्। तत्र वान्वेषणीयम्? अथवा प्रोत्खण्डितः शूलाग्रदलित-सैरिभमहादैत्येन्द्र-महिषाकारस्याति भीकरस्य दैत्यराजस्य मर्धान्तिरे कपालविवरे मृग्यं किम्? यदा शूलेन महिषशिरःकपालः द्विधा भिन्नस्तदानीं तद्विवरे देव्याः पदं पङ्कमग्नमिव समभूदित्यर्थः। एवं विविधस्थानेषु मृग्यं भवति त्वत्पदं वेदान्तिभिरुपनिषत्सु; तान्त्रिकैर्हृदयकमले; अन्यैरुपासकै शिवशिरसि महिषमूर्ध्नि वा स्व स्व भावनानुरूपमित्याशयः॥४॥

(५)

त्वत्पादाञ्चलरूपकल्पलतिकाबालप्रवालद्वयं
ये तावत्कलयन्ति जातु शिरसा नम्रेण कम्रोज्ज्वलम्।
तेषामेव हि देवि नन्दनवनक्रीडासु लभ्यं पुनः
स्वर्वल्लीतरुणप्रवालभरणं सेवानुरूपं फलम्॥

ये तावद्भक्ताः जातु कदाचिदपि त्वत्पादाञ्चलरूपकल्पलतिकाया पादाग्र एव कल्पवल्ली तस्याः बालप्रवालद्वयं पदतलद्वयं कम्रं मनोहरमुज्ज्वलं देदीप्यमानं शिरसा कलयन्ति मौलौ धारयन्ति

अर्थात् प्रणमन्ति तेषामेव नेतरेषामिति निश्चयार्थे हि। नन्दनवन-क्रीडासु स्वर्गीयनन्दनारामविहरणसमये स्ववंल्लीतरुणप्रवाल-भरणं स्वर्गस्थाया इष्टकामदात्र्याः कल्पलतिकायाः नवपल्लवानां भरणं धारणं पुनः प्रारब्धजनित मनुष्यदेहत्यागानन्तरं लभ्यं प्राप्यं भवति। अत्र हेतुरुच्यते सेवानुरूपं फलमिति। भगवत्याश्चरणपल्लव-सेवा तदनुरूपां कल्पवल्ली पल्लवैस्सेव्यमानामवस्थां स्वर्गादिप्राप्ति प्रसूयत इत्यर्थः ॥५॥

(६)

धावल्यं परिलाल्यते पुररिपोरङ्गेन तुङ्गश्रिया
किञ्च श्यामलिमाऽपि कोमलतरे भात्येव गात्रे हरेः।
तत्तादृक्पदवीं ममाऽपि जनयेत्यस्तोकसेवारसा-
दारुण्यं तव लीयते चरणयोः कारुण्यमूर्त्ते शिवे ॥

हे कारुण्यमूर्त्ते शिवे! कृपामयि परमेश्वरि! धावल्यं श्वेतवर्णः पुररिपोः त्रिपुरान्तकस्याङ्गेन परिलाल्यते शिवशरीरकान्त्या परिणतत्वात् गौरवान्वितया तुङ्गश्रिया भाति ऐश्वर्योत्कर्षमावहति। किञ्चापरत्र श्यामलिमाऽपि कृष्णवर्णः कोमलतरे अतिमनोहरे हरेर्गात्रे शरीरे भात्येव तुङ्गश्रिया विभातीति सर्वविदितम्। कृष्णाख्यैव प्रकटितम्। एवं श्यामलधवलवर्णयोर्देवताद्वयाश्रयेण यो महिमा वर्त्तते तादृशीं तत्समानां पदवीं ममाऽपि जनय मह्यमप्यनुग्रहरूपेण देहीति प्रार्थनया आरुण्यमरुणवर्णः अस्तोकसेवारसादमितेन सेवारसेन सेवायां यो रसस्तेन सोत्साहया सिसेविषया भगवत्याश्चरणयोर्लीयते। तव चरणौ शरणं प्रपद्य तद्रूपतां प्राप्नोति तयोरनन्यतां भजति। अत्राऽयमपि ध्वनिः - शिवविष्ण्वोश्शरीरव्यापादचूडमभिव्याप्य यो गरिमा श्वेतकृष्णवर्णाभ्यां प्राप्तः तमेव भगवत्याश्चरणमात्राश्रयेण प्रापित्सत्यरुणवर्णः ॥६॥

(७)

आरुण्यं यदिदं त्वदीयपदयोराभाति तत्केचन
प्राहुस्तुङ्गनितम्बभारभरणक्लान्त्या किलोपागतम् ।
अन्ये माहिषमूर्धपेषमिलितं रक्तद्रवं मन्वते
मन्येऽहन्तु नतेषु सान्द्रमनुरागोद्गारमेवानयोः ॥

हे देवि त्वदीयपदयोर्यदिदमारुण्यं पूर्वोक्तमाभाति तत् तुङ्ग नितम्बभारभरणक्लान्त्या पीवरनितम्बभारधरणायासेनोपागतमिति किल कविसमयानुरोधेन केचन प्राहुः । अधिकभारवहनात् रक्त-प्रवाहाधिक्यं तेन जनितोऽयमरुणिमेत्युत्प्रेक्षन्ते । अन्ये पुनर्वदन्ति यदयमरुणिमा महिषमूर्धपेषमिलितंरक्तद्रवं महिषासुरशिरः पेषणावसरे ततः प्रवहन्तीभिः रक्तधाराभिर्मिलनेनोत्पादित इति मन्वते अभिप्रयन्ति । अहमुभयमपि नाङ्गीकरोमि । पदयोर्नमस्कुर्वतां भक्तानां कृते सान्द्रं निबिडं यथा तथा अनुरागः कृपा तस्य उद्गार एव । भक्तजनमौलिस्पर्शमात्रेण चन्द्रपादसंपर्कमात्रेण स्वयं प्रद्रवच्चन्द्र-कान्तमणिरिव द्रवीभवदनुरागनिधानभूतं देव्याः पदमिति हेतोररुणं वर्त्तते । 'भयात् त्रातुं दातुं फलमपि च वाञ्छासमधिकं शरण्ये लोकानां तव हि चरणावेव निपुणौ' इत्युक्तया रीत्या वरदाभयहस्ताद्यवय-वान्तरनिरपेक्षं देव्या इच्छामात्रमप्यप्रतीक्षमाणं पदयुगलमेव प्रणमतामनुग्रहाय स्वयं कृपाधारां प्रस्रवतीति हेतोः भक्तकुल-मस्तक स्पर्शेनैव स्वयं कृपार्द्रमरुणं च भासत इत्यपह्नुत्युत्प्रेक्षाभ्यां द्योत्यते ॥७॥

(८)

प्राहुः पद्मसमाश्रयं शतधृतिं त्वत्पादपद्माश्रया-
दन्तस्त्वत्पदपद्मवीक्षणवशात्कृष्णोऽपि पद्मेक्षणः ।
यत्पद्मार्चनमामनन्ति सुधियो दारिद्र्यविद्रावणं
मुक्तिक्षेत्रगते भवानि ! तदपि त्वत्पादपद्मार्चनम् ॥

हे मुक्तिक्षेत्रगते भवानि ! मुक्तिस्थलाख्ये मन्दिरे विराजमाने पार्वति ! शतधृति ब्रह्माणं त्वत्पादपद्माश्रयात् न तु विष्णुनाभिप्ररूढ-कुशेशयवासात् पद्मसमाश्रयं प्राहुर्जनाः सम्बोधयन्ति। श्रीकृष्ण-स्यापि पद्मेक्षणत्वं स्वान्तर्मनसि त्वत्पादपद्ममनवरतं वीक्षत इति हेतोः, न पुनः कमलदलाकारनेत्रवत्त्वात्। सर्वाङ्गेषु कृष्णवर्णोऽपि केवलं नयनयोस्तस्यारुण्यं भगवत्या अरुणचरणध्यानेनान्तर्दृष्ट्या वीक्षणेन नेत्रेन्द्रियस्य सारूप्यप्राप्त्या सञ्जातम्। यल्लोके प्रसिद्धं पद्मार्चनं पद्मकुसुमैः पद्मायाः महालक्ष्म्याः पुष्पाञ्जलिप्रदानरूप माराधनं (भगवतीसेवा इति केरलेषु प्रसिद्धः वरिवस्याक्रमः) दारिद्र्यविद्रावणं दारिद्र्यस्य दूरीकरणोपायत्वेन सुधियः शिष्टाः आमनन्ति, कथयन्ति, तदपि न कमलदलार्चनद्योतकं नाऽपि पद्मायाः लक्ष्म्या अर्चनमिति हेतोः किन्तु तव पदपद्मस्यार्चनत्वा-देवेत्यर्थः ॥८॥

(६)

पादं ते सरसीरुहद्रुहमिमं यत्सेवते पद्मभू-
र्नूनं तत्स्वनिवासपङ्कजवरश्रीलङ्घनाशङ्कया ।
गोविन्दोऽपि च वारिराशिदुहितुर्वासाब्जबाधाभिया
स्वस्यैवाग्रकरोद्गृहीतकमलत्राणाभिलाषेण वा ॥

पूर्वश्लोके विधिहरी भगवत्याः पदपद्ममेवाराधयतः तदेवानु-ध्यायत इत्युक्तं तत्रापि हेतुरस्तीति श्लोकेऽस्मिन् निरूपयति। यत्ते इदं पदं पद्मभूर्विधिः सेवते तत्रास्ति कारणम्। कीदृशं ते पदं सरसीरुहं द्रुह्यति इति सरसीरुहध्रुक्तं सरसीरुहद्रुहम्। सरोजपरिपन्थि स्वनिवासभूतस्य पङ्कजस्य चतुर्मुखब्रह्मणो निवासस्थानत्वाद्या वरिष्ठता लोके वर्त्तते सा श्रीः त्वत्पद-पङ्कजश्रिया पराजिता भविष्यतीति भिया मम स्थानस्यावनतिर्मा भूदिति प्रार्थयन् त्वत्पादमासेवते। गोविन्दोऽपि सदा त्वामनुसन्धाय

त्वत्पदमेव अन्तर्दृष्ट्या साक्षात्कुर्वन् वर्त्तत इति यदुक्तं तत्र हेतुः वारिराशिदुहितुः समुद्रसंभूतायाः कान्ताया वासाब्जबाधा निवासभूतस्य कमलस्य मानहानिर्न स्यादिति नूनं निश्चयमासेवते। अथवा स्वस्यैवाग्रकरोद्गृहीतस्य स्वकरतले धृतस्य पद्मस्य त्राणाभिलाषेण स्वकराग्रे विराजमानं कमलं लोके निन्दास्पदं मा भूदिति भगवत्याः पदपद्मादभयं याचते ॥९॥

(१०)

सेवन्ते कुलसम्पदे नखमया शीतांशवस्त्वत्पदं
तत्पाको ननु वीक्षते हि सुतरामन्येषु शीतांशुषु।
एको बालक एव मौलिमयि ते यातो ललाटात्मता-
मन्यो निर्मलगण्डमण्डलदशामन्यौ तु धन्यौ गतौ॥

नखमयाश्शीतांशवः नखाकारतां प्राप्ताश्चन्द्रविम्बाः कुलसम्पदे वंशसमृद्ध्यै निजवंशस्य संपत्समृद्धिमाकाङ्क्षन्तः, कुलवृद्धैराचरिता धर्माः वंशोद्भूतानां सन्ततीनां श्रेयसे भवन्तीति विश्वसन्तः त्वत्पदं भगवत्याश्चरणं सेवन्ते। तादृशपदसेवाजनितपुण्यस्य परिपाकस्तत्फलभोगावस्थायामन्येषु शीतांशुषु चन्द्रान्तरेषु सुतरां वीक्ष्यते हि प्रसिद्धतया दरीदृश्यते। प्रत्यक्षगोचरं सर्वविदितं वर्त्तते। एकश्शीतांशुः बालक एव बाल्यावस्थायामेव ते मौलिम् अयि भगवत्याश्शिरोभूषणतां प्राप्तवान्। "कुटिलशशिचूडाल मुकुटम्" इति सौन्दर्यलहर्याम्। स्वाश्रितवंशजं बालमपि शिरसा धत्से आश्रितपरतन्त्रतयेत्यर्थः। अन्यश्चन्द्रः ललाटात्मतां यातः ललाटरूपेण परिणतः। "अष्टमीचन्द्रबिभ्राजदलकस्थलशोभिता" इति ललितासहस्रनामस्तोत्रे। अन्यावुभौ चन्द्रडिम्भौ निर्मलगण्डमण्डलदशां गतौ भगवत्याः स्वच्छगण्डस्थलाकारतां लब्ध्वा धन्यौ स्तः। एवं वंशप्रसूतानां ख्यातिमौन्नत्यं च वीक्ष्य इतरेषामप्येता-

दृशं गौरवं प्रपित्सवः चन्द्रविम्वाः नखच्छद्मना भगवत्याश्चरण-मनवरतमासेवन्ते ॥१०॥

(११)

घोरं पादसहस्रकं प्रकटयन्नाशासु भासां पति-
र्ध्वान्तं नो पुनरान्तरं शमयितुं शक्नोति शैलात्मजे ।
त्वत्पादद्वितयेन कोमलतरेणानेन चेतस्पृशा
जन्तूनां बहिरन्तरन्धतमसं कृन्तस्यनन्तं शिवे ॥

हे शैलात्मजे शिवे ! हैमवति हे शिवमहिषि ! भासां पतिस्सूर्यः स्वयं सर्वतेजोनिधानत्वेन प्रसिद्धः आशासु सर्वासु दिक्षु घोरं पद-सहस्रकं प्रकटयन् अतिचण्डं स्वकीयं किरणसहस्रं प्रसारयन् पुनः तथाऽपि आन्तरं ध्वान्तं शमयितुं नो शक्नोति । अभ्यन्तरस्थं तमोगुणरूपं ध्वान्तमथवाज्ञानरूपमन्धतामिस्रं दूरीकर्तुं न प्रभवति । त्वत्पदयुगलेन देव्याश्चरणयुगलेन कोमलतरेणातीवमृदुस्पर्शभाजा चेतःस्पृशा मनोहरेण सर्वथा शैत्यहृद्यमृदुस्वभावेन, न केवलं वहिर्व्यापकेन किन्तु चेतःस्पृशा मनोमुकुरमप्युद्घाट्य तत्र प्रकाशं वितरता, जन्तूनां समस्तजीवराशीनां वहिरन्तरन्धतमसं वहिरन्धकार श्चेतसि मोहध्वान्त इत्युभयमपि युगपत्कृन्तसि निर्मूलयसि । कीदृशं तमः—अनन्तम् । सूर्यांशुभिः केवलं भूतले तत्तद्देशेषु विद्यमानं बहिष्ठं तम एव निरस्यते । भगवत्याः पदं त्वनाद्यविद्यामय दुरन्तं तमिस्रं दूरीकरोति । न चैवं दूरीकृतं तमः पुनः कालान्तरे तत्र प्रविशति । सूर्यकिरणैः सहस्रसंख्याकैः संभूय प्रचण्डातपेन जनान् प्रताप्य भागशः यत्तमस्तात्कालिकतया निरस्यते तेन सर्वत्र सर्वदा आमूलं तमसो निरसनं न भवति । यत्तादृक्चण्डपराक्रमाटोपेनाऽपि न सिद्ध्यति तत्तदधिकं च भगवत्याः पदद्वयेन विनाक्लेशं साधितं भवति । अतः सूर्याद् वैशिष्ट्यं भगवत्याश्चरणयोः ॥११॥

(१२)

सूर्येन्द्वग्निसमीरणादिसकलस्वर्वासिनामुन्मद-
स्सर्वाण्येव पदानि यो मथितवान् दुर्वारशौर्योष्मणा ।
तं घोरं महिषासुरं निजपदेनैकेन सम्मृद्वती
यत्त्वं प्रत्यकृथास्ततः किमपरं त्वद्वैभवं ब्रूमहे ॥

उन्मदः मदोद्धतो यो महिषासुरः सूर्येन्द्वग्निसमीरणादि सकलस्वर्वासिनां सूर्यचन्द्रवह्निवाय्वादिनिखिलत्रिदिवौकसां पदान्यधिकारस्थानानि वीर्याणि वा दुर्वारशौर्योष्मणा दुर्निवार्येण स्वपराक्रमानलेन मथितवान् नाशितवान् । महिषासुरस्य पराक्रमेण सर्वा देवताः स्थानभ्रष्टा निर्वीर्या निर्वषट्काराश्च कृताः । तं त्रैलोक्यकण्टकं घोरं भयङ्करं महिषासुरं एकेन निजपदेन सम्मृद्वती एकेनैव पादेन निर्मथ्य यत् प्रत्यकृथाः देवताभ्यस्तेन कृतस्योपद्रवस्य प्रतीकारमकृथास्ततः तस्मादपरं तव वैभवं विभुत्वप्रमापणं किमस्ति वक्तव्यम् । सर्वदेवतापरिभवस्य प्रतिक्रिया अनन्यसाध्या एकपदेन त्वयानुष्ठिता इति हेतोः देवतान्तरापेक्षया तव गरिमा सर्वविदितः ॥१२॥

(१३)

एकं वामतयैव दक्षिणतयैवान्यत् पदं देहिनां
ख्यातं मुक्तिपुराधिवासिनि शिवे चित्रं त्वयि त्वीदृशम् ।
आनम्रेषु जनेष्वभीष्टकरणे पादावुभौ दक्षिणा-
वानम्रे तु कृतागसि स्मरहरे वामाक्षि वामावुभौ ॥

हे मुक्तिपुराधिवासिनि शिवे ! मुक्तिस्थलनिलये मङ्गलस्वरूपिणि परमेश्वरि ! देहिनां देहवतां जन्तूनामेकं पदमन्यस्मात् पदाद्वामतयैव वामपादत्वेनैव ख्यातम् । एवमेवापरं पदमन्यस्मात् वामपादापेक्षया दक्षिणमित्येव व्यवहारे प्रसिद्धम् । किन्तु त्वयि

भगवत्यास्तव विषये परं त्वीदृशं चित्रं वर्त्तते वक्ष्यमाणरीत्या लोकव्यवहारविलक्षणं वर्त्तते कथमिति चेदुच्यते। आनम्रेषु जनेषु नमस्कुर्वत्सु भक्तेषूभावपि पादावभीष्टकरणे वाञ्छितवरप्रदानविषये दक्षिणावर्तिसमर्थौ दक्षिणेतरत्वमन्योन्यस्य नास्तीत्यर्थः। एवं कृतागसि अपराधिनि सपत्नीपक्षपातादिदोषजुष्टे स्मरहरे परमेश्वरे, हे वामाक्षि वामेतरत्वमन्योन्यस्य न स्वीकुर्वतः। वामाक्षीति संबुद्ध्या मत्तोऽप्यधिकसौन्दर्यवती नास्ति तथापि कथमन्याप्रसक्तोऽसीति स्वकान्तापराधेनाधिकक्रुद्धा वामा इति द्योतयति। एवमेकं पदमितरापेक्षया वाममितरच्चान्यापेक्षया दक्षिणमिति लोकव्यवहारः न संगच्छते भगवत्या विषये ॥१३॥

(१४)

आनम्रस्य पुरद्रुहश्शिरसि ते पादाब्जपातश्शिवे
जीयाद्येन बभूव पङ्कजवती मौलिस्रवन्ती क्षणम्।
किञ्चोदञ्चितबालपल्लववती जाता जटावल्लरी
लाक्षापातवशेन सान्ध्यसुषमासान्द्रा च चान्द्री कला॥

हे शिवे! शिवपत्नि! आनम्रस्य प्रणयप्रार्थनाकाले नम्रीभूतस्य पुरद्रुहः त्रिपुरारेश्शिरसि ते पादाब्जपातः चरणाम्भोजघातो यो भवति स जीयात् सर्वोत्कर्षेण वर्तिषीष्ट। येन पादाघातेन मौलिस्रवन्ती शिवशिरसः प्रस्रवन्ती स्वर्धुनी क्षणं क्षणकालं यावत्पङ्कजवती बभूव। पादाम्भोरुह संगमेनैव क्षणमात्रमपि गंगायाः कमलिनीत्वम्। किं च नैतावन्मात्रम्; जटावल्लरी शिवशिरः कपर्द एव वल्लरी लता प्रायशः शुष्का निष्पत्राऽपि उदञ्चितबालपल्लववती क्षणं बभूवेत्यध्याहार्यम्। सद्यःस्फुटितबालप्रवालयुगलमण्डिता प्रवालाकाराभ्यां भगवत्याः कोमलपदाभ्यां प्रवालवती भवति परमेश्वरशिरोलग्ना जटालता। एवमेव चान्द्री कला शिवमस्त-

कालंकारभूता इन्दुकला लाक्षापातवशेन भगवत्याश्चरणार्पितलाक्षा-रसपातेन सान्ध्यसुषमा सायन्तनश्रीः तया सान्द्रा सन्ध्याकाल-साधारणो यो ऽरुणिमा तेन निविडिता निविडरागारुणिता भवति। एवं शिवशिरोवर्त्तिनां गंगाजटाचन्द्रबिंबानां सौभाग्यवृद्ध्यै भवति भगवत्याश्चरणाघातः।

(१५)

दृष्ट्वा रात्रिषु चन्द्रपादजनितां पाथोरुहाणां व्यथाम्
देवि त्वं करुणाकुलेव कुरुषे तद्वैरनिर्यातनम् ।
मानानम्रमहेशमौलिवलभीवासस्य शीतत्विषो
नित्यं पङ्कजपादपातजनिता बाधा यदाधीयते ॥

हे देवि ! रात्रिषु चन्द्रपादजनितां पाथोरुहाणां व्यथां ज्योत्स्ना-स्पर्शेन व्यथामनुभवतां मुकुलीभवतां पङ्कजानां दुरवस्थां वीक्ष्य करुणाकुलेव तेषु स्वकीयत्वाभिमानेन त्वं तद्वैरनिर्यातनं कुरुषे पद्मद्वेषिणश्चन्द्रस्य दण्डदानेन प्रतिक्रियामाचरसि । कथमिति चेदुच्यते। मानानम्रस्य प्रणयकलहावसरे क्षमायाचनायानम्रस्य महेशस्य मौलिवलभीवासस्य मौलिरेव वलभिर्गोपानसी तत्र वासः यस्य शिवशिरोजटावलये वसतः। यथा कश्चिदपराधी राजपुरुषेभ्यः आत्मानं गूहितुं जालकघटिते वलभौ रहोवासं कुर्यात्तद्वत् वसतः शीतत्विषश्चन्द्रबिंबस्य पङ्कजपादघातजनिता बाधा पद्माकारेण पादेन यो आघातस्ताडनं तज्जनिता या बाधा क्लेशः आधीयते। चन्द्रपादाघातेन पङ्कजानां यथा बाधा तत्तुल्यामेव बाधां पदपङ्कजा-घातेन चन्द्रस्यापि जनयति। मद्वंशजाः मदावासभूताः मत्पादपाणि-वदनादिसारूप्यं भजन्ति पङ्कजानि। तानि त्वया यथा पादाघातेन प्रतिदिनं परिपीड्यन्ते तथैव त्वामपि मच्चरणताडनेन पीडयामीति शिवशिरोघट्टनमिषेण वैरनिर्यातनमाचरसि ॥१५॥

(१६)

संभ्रान्तिस्तव देवि सा विजयते मानावनम्रे शिवे
त्वत्पादाम्बुरुहप्रहारमुदिते मन्दं समुत्थायिनि ।
लाक्षारागरसारुणं निपतितं गंगापयःशीकरं
दृष्ट्वा शोणितशङ्कया तरलिता कान्तं यदालम्बथाः ।।

हे देवि ! मानावनम्रे शिवे प्रणयकुपितां त्वां सान्त्वयितु नतमस्तके भर्त्तरि त्वत्पादाम्बुरुहप्रहारं लब्ध्वा कोपोपशमसूचकं पादप्रहारं शिरस्यनुभूय, परिसान्त्वितेयं मम खण्डिता नायिका, इति स्वानुनयप्रयाससाफल्येन मुदिते लब्धप्रत्यये शिवे मन्दं यथा तथा शनैरुत्थायिनि उत्तिष्ठति सति, तच्छिरसः प्रस्रवद्गङ्गापयःशीकरं गंगाजलकणं लाक्षारागरसारुणं देवीचरणार्पितलाक्षारसेनारुणं दृष्टवा शोणितशङ्कया तरलिता, पादाघातेन व्रणितमस्य शिरः यतो रक्तबिन्दवः स्रवन्तीति स्वदण्डाधिक्यजनितपश्चात्तापपीडिता, घृणया अपराधवोधेन च तं कान्तं यदा आलम्बथाः करेण गृहीत्वा पर्यवस्थापयितुं क्षमां याचितुं च व्यवसिता स्वसंभ्रान्ति प्रदर्शयेथाः सा सम्भ्रान्तिः पतिव्रतालंकारभूता उत्तमनायिकालक्षणरूपा विजयते सर्वोत्कर्षेण वर्त्तत इति भावः ।।१६।।

(१७)

सा पादद्वितयाहृतिर्विजयते यस्यां गिरीन्द्रात्मजे
प्राचीनेन्दुयुते नखेन्दुदशके मौलिस्थलीसंगते ।
स्वस्यैकादशरुद्रतासमुचितानैकादशैवोडुपान्
आबिभ्राण इवाबभौ स भगवानेकोऽपि रुद्रः स्वयम् ।।

हे गिरीन्द्रात्मजे ! नगपतितनये ! सा पूर्वोक्ता लोकोत्कर्षेण वर्णिता तव पादद्वितयाहृतिः प्रणयप्रार्थनावनम्रस्य कान्तस्य शिरसि

पादद्वितयाभ्यामाहतिः ताडनं पुनर्जयति। कथमिति चेदुच्यते—नखेन्दुदशके भगवत्याः नखाकाराणामिन्दूनां दशानां समाहारः नखेन्दुदशकं तस्मिन्नखेन्दुदशके प्राचीनेन्दुयुते प्रागेव शिवशिरसि विद्यमानेन चन्द्रेण युते योजिते मौलिस्थलीसंगते कान्तस्य मौलिना संगते सति, स शिव एक एव रुद्रोऽपि सन् एकरुद्राकारेण वर्त्तमानोऽपि वस्तुतः एकादशात्मकः मौलावेकादशचन्द्रकलाः युगपद्वहन् रुद्रैकादशतां बिभ्राण इवावभौ। एकैव मूर्त्तिः प्रसिद्धां स्वैकादशाकारतां बिभ्रतीव भ्रममुत्पादयति तत्संख्याकानां इन्दुशकलानां धारणात्। वामदेवः ज्येष्ठः, श्रेष्ठः, रुद्रः, कालः, कलविकरणः, वलविकरणः, वलः, बलप्रमथनः, सर्वभूतदमनः, मनोन्मनः इति एकादशरुद्राः प्रसिद्धाः। अत्र तु एक एव रुद्रः देव्याः नखेन्दुदशकैः स्वकीयचन्द्रकलया च साकमेकादशाकारतां विभर्ति। एक एव रुद्रः दशगुणं गौरवं भजति देव्याः पदस्पर्शनेति ध्वनिः॥१७॥

(१८)

किं वैरिञ्चकरोटिकोटिनिहतं किं वा फणिग्रामणी-
निःश्वासानिलखेदितं त्विदमिति प्रेमार्द्रसंलापिना।
मानस्योपशमे करेण शनकैरामृद्नता शम्भुना
भूयश्चुम्बितमम्बुजद्युतिपदं ध्यायामि माये! तव॥

हे माये! महामायास्वरूपिण्यम्बिके तव पदाम्बुजद्वितयं पद्मसमानकोमलं चरणयुगं ध्यायामि चित्तैकाग्रताविषयीकरोमि। कीदृशं पदयुगमिति विशिनष्टि शंभुना भूयश्चुम्वितमिति। करेणशनैर्मृद्नता कान्तेन भूयः वारं वारं चुम्वितम्। मानस्योपशमे प्रणयकलहाऽवसरे रुष्टां प्रियां क्षमाप्रार्थनया परिसान्त्वयन् तस्याश्चरणयोः प्रणिपत्योत्थितः शान्तः कोप इत्युत्पन्नविश्वासः शिवः स्वकराभ्यां देव्याः पदद्वयं परिमृजन् पुनः पुनः चुम्बति। स्वप्रणतिसमये तयोः पदयोः क्वाऽपि वेदना दत्ता स्यादित्याशंक्य, प्रतिचुम्वनम्, अमुक हेतुना

क्लेशितम् वा इति पृच्छन् चुम्बति। प्रणतिसमये क्लेशस्य अवकाशः कथमिति चेत्-उच्यते—वैरिञ्चकरोटिकोटिनिहतं स्यादिति परिशंक्यते। विरिञ्चेरयं वैरिञ्चः, करोटिः शिरःकपालः तस्य कोट्या अग्रेण निहतं व्रणितं स्यादिति प्रथमः सन्देहः। असत्य-भाषणाय पञ्चमुखब्रह्मणः एकं शिरः शिवेन कृत्तम् तत्कपालश्च स्वशिरस्याभरणत्वेन धृत इति पौराणिकी कथा। नतमस्तकस्य मम शिरोभूषणायितेन द्रुहिणकरोट्याः कोटिना कठिनाग्रेण तवेदं कोमलं पदं व्रणितं वा इति प्रश्नः। अथवा फणिग्रामणी, शिव-शिरसि स्थितः सर्पराजः शेषः तस्य निःश्वासानिलेन निःश्वासभूत विषवायोरूष्मणा खेदितं वा ते कोमलं पदम् इति द्वितीया आशंका। "अतिस्नेहः पापशङ्की" इति न्यायेन कान्ताप्रसादनैकत्वरां प्रदर्शयति। एवं शिवकराभिमृष्टं तत् प्रणयवचनमधुसिक्तं तदोष्ठपुटचुम्बित भगवत्याश्चरणयुग्मं ध्यायतामपराधक्षमापणाय दुरितोपशमनाय दुःखदूरीकरणाय च प्रभवतीति तात्पर्यम् ॥१८॥

(१९)

पूर्वं जह्नुसुता सकृन्मुररिपोः श्रीपादसंक्षालना-
पुण्यादीदृशवैभवा समभवत् गोविन्दवन्द्ये शिवे।
सेयं संप्रति शम्भुमौलिनिलया मानप्रसंगानतौ
नित्यं त्वच्चरणावसेचनभुवा पुण्येन कीदृग्भवेत् ॥

जह्नुसुता गङ्गा पुरा त्रिविक्रमावतारसन्दर्भे,सकृदेकवारं मुररिपोः श्रीपादसंक्षालनापुण्यात् त्रिविक्रमरूपस्य विष्णोर्मङ्गलमयस्य पादस्य संक्षालनजनितसुकृतविशेषात् ईदृग्वैभवा समभवत्। प्रजापतेः कमण्डलोरुत्पन्ना सुरापगा त्रिविक्रमस्य पाद्योदकतां प्राप्य भुवनेष्वद्य परिदृश्यमानवैभवा सर्वजगत्पवित्रीकरणदक्षेति प्रथामीदृशीं लब्ध-वती। सेयं भागीरथी विष्णुपादोद्भवा गङ्गा संप्रत्यधुना वक्ष्यमाण-सन्दर्भे कीदृग्भवेत् पूर्वाधिक्यवैभवयुता भवेदिति किमु वक्तव्यम्?

कोऽयं सन्दर्भ इति विवृणोति-शंभुमौलिनिलयेत्यादिना। शंभुमौलिनिलया शिवशिरसि वर्त्तमाना गंगा मानप्रसंगानतौ नित्यं प्रतिदिनं मानप्रसंगे प्रणयकुपितां कान्तां सान्त्वयितुं प्रणतौ शिवे नतशिरसि सति भगवत्याश्चरणावसेचनमाचरति। भगवत्याश्चरणक्षालनं पूर्वमनुष्ठिताद्विष्णुपादसेचनाद्‌बहुतरपुण्याय भवतीति द्योतयितुं साभिप्रायविशेषणं गोविन्दवन्द्ये इति। विष्णुपादक्षालनं सकृत् कृत्वा निखिलमपि विश्वं पुनाना गंगा तत्पुण्यविशेषाच्छिवशिरसि स्थितिमाप। अधुना मानावनतस्य शिवस्य शिरसि वर्त्तमाना प्रतिदिनं देव्याश्चरणक्षालनसौभाग्यं भजति, या देवी गोविन्देनाऽपि वन्द्या तस्याः पाद्यत्वं भजमाना पूर्वाधिकपुण्यनिधानभूता लोकोत्तरवैभवं प्राप्नोतीति वक्तव्यं किमित्याशयः ॥२०॥

(२०)

पूर्वं व्याकरणप्रपञ्चनविधौ लब्ध्वाप्यनेकं पदं
किं नो तृप्तिमगादगाधिपसुते शेषः फणिग्रामणीः।
आलीनः शशिमौलिमूर्धनि चिरं प्रेमप्रकोपानतौ
लब्धुं ते पदमेकमेव कुतुकी नित्यं यतो वर्त्तते॥

हे अगाधिपसुते! पर्वतराजपुत्रि! फणिग्रामणीर्नागराजोऽनन्तः पूर्वं कालान्तरे पाणिनिरूपेणावतीर्य व्याकरणप्रपञ्चनविधौ शब्दशास्त्ररचनाप्रसङ्गेन अनेकं पदं लब्ध्वाऽपि सुप्तिङन्तानां बहूनां पदानां रूपनिष्पत्तिं सम्पाद्याऽपि तृप्तिं नोऽगात्किम्? पदसञ्चयः पर्याप्त इत्यलंबुद्धिं न प्राप्तवानिति मन्ये। कुतश्चेद्यतः स नागराजः शशिमौलिमूर्धनि चन्द्रशेखरस्य शिरसि चिरं बहोः कालादालीनः निलीय तिष्ठन् नित्यं प्रतिदिनं प्रेमप्रकोपानतौ यदा यदा प्रेमकलहावसरे तच्छिरः आनतम् भवति तदा तदा त्वत्पदमेकमेव लब्धुं कुतुकी वर्त्तते। प्रतिसूत्रं नवनवानामसंख्यानां पदानां निष्पत्ति-

लाभेनासन्तुष्ट: प्रतिदिनमेकमेव भगवत्या: पदं सर्वशब्दशास्त्रेभ्यो-ऽप्याधिकं स्पृहणीयमिति तस्मिन्नेव कुतुकी प्रयतमानो वर्तते। शास्त्रज्ञानमखिलमपि देवीचरणभक्तिरूपपराविद्याया साधनमिति तात्पर्यम्।

(२१)

तिष्ठन्त्यां प्रणयप्रकोपवशतो बाष्पाकुलाक्ष्यां त्वयि
श्रीकण्ठे नखदर्पणप्रतिफलद्रूपे पुरो वर्त्तिनि।
पादाग्रे पतितोऽयमित्यभिहिते सख्या तवालोकनं
लोलं पादतले विभाति सहसा साकोपमालीमुखे॥

त्वयि प्रणयप्रकोपवशत: बाष्पाकुलाक्ष्यां तिष्ठन्त्यां सत्यां, यदा त्वं खण्डितनायिकासाधारणेनेर्ष्यया बाष्पपूरितनयना तिष्ठसि श्रीकण्ठे नखदर्पणप्रतिफलद्रूपे पुरोवर्त्तिनि, परमेश्वरे तदानीं त्वन्नख एव दर्पणं मुकुरस्तस्मिन् प्रतिफलद्रूपे प्रतिबिम्बितनिजरूपे पुरस्तिष्ठति आर्द्रापराधिन्यास्तव पुर: तिष्ठति सति। नखमुकुरे शिवप्रतिकृतिं दृष्ट्वा, श्वेतवर्णस्य शिवस्य प्रतिरूपं तत्समानवर्णे नखमुकुरेऽपि श्रीकण्ठत्वात् नीलकन्धरत्वात् झटिति प्रतीयमानं भवति, तद् दृष्ट्वा शिव एव देव्या: पादयो: पतित इति भ्रान्त्या, अथवा प्रतिबिम्ब इति जानन्नपि देवीं प्रतारयितुकामया वा सख्या "अयं पादाग्रे पतित" इत्यभिहिते, देव्या आलोकनं पादतले सहसा लोलं यथा तथा पतति। कितवेन निजापराधोऽङ्गीकृत: क्षमां च याचत इति बुद्ध्या सखोवचनप्रत्ययात् तस्या दृष्टि: क्षणमात्रं ससाध्वसं पादे पतति। उत्तरक्षण एव सख्या अलीकमुक्तमित्यवगम्य आलीमुखे सखीवदने साकोपं, कथं मां वञ्चयितुं मिथ्यां वदसीतीर्ष्यया च पतति। एवं क्षणमात्रं दयार्द्रमुत्तरक्षणे कोपकलुषं ते आलोकनं विभात्यन्यादृशीं शोभामावहति॥

(२२)

कान्तालोकनलज्जया विनमिते कान्ते मुखाम्भोरुहे
याऽसौ भूतलपातुका नयनयोश्शोभा तवाभसते ।
सा तावत्तरुणारुणाम्बुजयुगभ्रान्त्या तवाङ्घ्रिद्वय-
प्रान्ते भाति मरन्दपानकुतुकभ्रान्तेव भृङ्गावली ॥

कान्तालोकनलज्जया कृतापराधस्य नायकस्य मुखालोकने लज्जामनुभवन्त्याः तव देव्याः कान्ते मनोहरे मुखाम्भोरुहे कमलवदतिकोमले वदने विनमिते सति नयनयोश्शोभा भूतलपातुका धरातले पतन्ती (पतिष्णुः) आभासते आसमन्ताद्भ्राजते । सा तावन्नेत्रशोभा तवाङ्घ्रिद्वयविषये तरुणाम्बुजयुगभ्रान्त्या सद्योविकसितारुणपद्मद्वन्द्वमिति भ्रान्त्या तयोः प्रान्ते परिसरे मरन्दपानकुतुकभ्रान्ता भृङ्गावलीव मधुपानलिप्सापरवशस्य भ्रमरसमूहस्यावस्थां प्राप्नोति । नेत्रकान्तिः पदयुगले परिपतति । सा च भृङ्गावलीत्युत्प्रेक्ष्यते । एतावत्पर्यन्तं मुखकमले मरन्दमासेवते स्मेयं भृङ्गावलिः । अधुना लज्जावनतं ईर्ष्याघृणासाध्वसादिबाधितं मुखं परिम्लानं पङ्कजमिव मधुपानाय न योग्यमिति तत्त्यक्त्वा भ्रमरालिः पद्मान्तरान्वेषणप्रसङ्गे तरुणारुणकमलाकारं सद्यःसंफुल्लकमलसदृशं पदयुगलं दृष्ट्वा तत्प्रान्ते मधुपानेच्छया भ्रमति ।

(२३)

किं ब्रूमः कुटिलात्मकोऽपि कबरीभारस्त्वदीयश्शिवे
केलीविश्लथितस्तनोति यदयं त्वत्पादसंस्पर्शनम् ।
तद्भूयस्सुमनोगणादृतगुणस्त्वन्मौलिसंलाल्यतां
धत्ते चित्रमसौ त्वदंघ्रिभजनात्किं केन नो लभ्यते ॥

हे शिवे ! कुटिलात्मकोऽपि कबरीभारस्त्वदीयः प्रकृत्या कुटिलः कपटस्वभावो वा ते कचभारः केलीविश्लथितः क्रीडावसरे मुक्तबन्ध-

तस्सन् त्वत्पादसंस्पर्शनं यदयं तनोति यतस्तव पादपर्यन्तं प्रसृतः पदस्पर्शं करोति तेन पुण्यविशषेण महान्तं लाभं प्राप्नोति भूयः। पुनरपि सुमनोगणादृतगुणः सुमनोगणैः पुष्पनिचयैः देवतागणैर्वा केशालंकरणायोपयुक्तैः पुष्पैरादृतगुणः निबद्धः तद्वत् सौन्दर्यसौरभ्यादिगुणैस्सम्मानितः; देवपक्षे सुरगणैः स्तूयमानगुणातिशयः त्वन्मौलिसंलाल्यतां भगवत्याः मौलौ चूडाबन्धरूपेण परिलाल्यमानामवस्थां धत्ते इत्यसौ चित्रमाश्चर्यम्। अत्रार्थान्तरन्यासेन हेतुमाह "त्वदंघ्रिभजनात् केन किं न लभ्यम्" इति। अतितुच्छेनाप्युच्चैः पदं प्राप्तुं त्वदङ्घ्रिसेवावैभवाच्छक्यते। कुटिलस्वभावः केशभारः देव्याश्चरणस्पर्शमात्रेण तस्याः शिरसि पुष्पनिचयालंकृतः सुरगणैरभिष्टूयमानमहिमायुतः भवति। लोकेऽपि यः कोऽपि स्यादधमः सकृदपि देव्याः पदयोः पतन् तस्याः कारुण्यविशेषेण प्राक्तनदुरितेभ्यो मुक्तः लोकोत्तरं स्थानं भजतीत्यस्य देव्याः कचभार एव साक्षी॥

(२४)

रागद्वेषभरा हि विभ्रमभरा नश्यन्ति विश्वेश्वरि
त्वत्संगादिति मुक्तिदेशनिलये मिथ्या जनैः कथ्यते।
उद्यद्द्वेषमुदारविभ्रमभरं गात्रं दधत्या त्वया
रागोऽपि ध्रियतेऽधिकं चरणयोश्शोणाम्बुजच्छाययोः॥

हे मुक्तिदेशनिलये विश्वेश्वरि! विश्वविमोहिनि महामाये! रागद्वेषमुखा विभ्रमभराः कामक्रोधादयः विभ्रमेण भ्रियन्त इति विभ्रमभराः अविद्याविलासाः त्वत्सङ्गात् ज्ञानस्वरूपिण्या भगवत्याः ध्याननामोच्चारणादिचित्तवृत्तिसंगात् नश्यन्ति। यस्य चित्ते देव्याः स्वरूपध्यानं भवति तस्य कामक्रोधाद्यरिषड्वर्गास्तेषां मूलभूतया अविद्यया सह सद्यो नश्यन्तीति यत्कथ्यते प्रसिद्धतया उच्यते तन्मिथ्या,

तन्न प्रमाणसिद्धमिति भाति। कुतः ? उद्यद्द्वेषं भासमानस्वरूपकान्तिं (उदीयमानद्वेषभावं वा) उदार विभ्रमभरमत्यधिक शृङ्गारानुगुणविकारैर्भरितं (महामायास्वरूपत्वात् महाभ्रान्तिभरितं वा) गात्रं वहन्त्या त्वया शोणाम्बुजच्छाययोः रक्तकमलसमानकान्त्योश्चरणयोः रागोऽप्यधिकं ध्रियते। देव्या गात्र एव द्वेषविभ्रमरागादयः अधिकतया दृश्यन्ते कथं पुनस्तत्संगात्,रागादीनां नाश इति विरोधोक्तिः।

(२५)

देवि त्वत्पदसत्परागमनिशं मौलौ समाबिभ्रतां
साधूनामपरागतैव भवतीत्याश्चर्यमास्तामयम्।
पादस्ते नखरप्रभावलसितो जागर्ति सोऽयं पुन-
श्चित्रं नाम खरप्रभावलसितो दुष्टासुरं पिष्टवान्॥

हे देवि ! त्वत्पदसत्परागं तव पदपङ्कजस्य श्रेष्ठं परागं पदरेणुं मौलौ समाबिभ्रतां शिरसा धारयतां साधूनां भक्तानामपरागतैव परागाभाव एव अपगतः रागः तस्य भावोऽपरागता वीतरागत्वमेव भवतीत्याश्चर्यमास्ताम्। परागधारणेनापरागतां यातीति यत् आश्चर्यं तदास्ताम्। ततोऽप्याश्चर्यावहमुच्यते। तव पादः नखरप्रभावलसितः नखराणां प्रभावलेन कान्तिमण्डलेन, अथवा ववयोरभेदात् प्रभाबलेन प्रभामहिम्ना सितः नखकान्त्या धवलीकृतश्चरणः। तथाऽपि सोऽयं पुनस्स एव चरणः सन्दर्भान्तरे खरप्रभा—वलसितः तीक्ष्णेन तेजोवलयेन सितः अथवा प्रभावेन लसितोऽलंकृतः दुष्प्रसहपराक्रमेणोज्ज्वलितस्सन् दुष्टासुरं महिषासुरं पिष्टवान् मर्दितवानित्येतत् चित्रं नाम पूर्वोक्तादप्याश्चर्यकरं खलु ? श्लेषमूलकविरोधाभासालङ्कारेण भगवत्याश्चरणपदरेणूनां रागादिदोषनाशनक्षमतां नखकिरणानां दुष्टशिक्षणक्षमतां चैवं शिष्टोद्धारणदुष्टदमनावुभावपि चरणरेणुरेव निर्वहतीति द्योतयति।

(२६)

द्वित्वेन स्थितयोस्त्वदीयपदयोर्द्वैतं निरस्य स्फुटं
कैवल्यप्रतिपादने कुशलता जातेति कोऽयं क्रमः ।
किं वा युक्तिभिरत्र मुक्तिकरता व्यक्तैव ते पादयो-
र्मुक्ता एव हि विस्फुरन्ति विमलास्त्वत्सङ्गिनोऽमी नखाः ।।

त्वदीयपदयोर्द्वित्वेन स्थितयोः द्विसंख्यावत्त्वेन वर्त्तमानयो-र्द्विवचननिर्देश्ययोः स्वाश्रितेषु द्वैतं निरस्य जीवेश्वरभेदबुद्धिमपोह्य अहं ब्रह्मास्मीत्यादि महावाक्यबोधिततत्त्वज्ञानोत्पादनेन स्फुटं समस्तशङ्कानिरसनपूर्वकं दृढमद्वैतज्ञानमुत्पाद्य कैवल्यस्यात्मसाक्षा-त्काररूपस्य केवलानन्दस्वरूपावस्थितेः प्रदाने कुशलता जातेत्यत्र कोऽयं क्रमः ? स्वयं द्वैतभावमपरित्यजतोश्चरणयोरद्वैतज्ञानोत्पादने देशिकत्वं तद्द्वारा जीवब्रह्मैक्यानुभवरूपकैवल्यदातृत्वमिति विचित्रोऽयं कार्यकारणभावः। अत्र युक्तिभिः किं वा ? युक्तिवादैरयं कार्यकारणसम्बन्धो न घटयितुं शक्यः। तव पादयोर्मुक्तिकरता मुक्तिप्रदानक्षमता व्यक्तैव प्रसिद्धा एव यतस्तत्सङ्गिनोऽमी नखाः प्रत्यक्षप्रमाणगोचराः विमला विगताखिलकलङ्काः निरस्तसर्वकर्म-बन्धाः मुक्ता एव विस्फुरन्ति मुक्ताफला इव नित्यमुक्ता इव विस्फुरन्ति । मौक्तिकमणिसमानाकारा नखा मुक्तात्मान इति श्लेषमूलेन विभाव्य तेषामवस्थारूपाद्धेतोः पदयोर्मुक्तिदातृत्वरूपं कारणमनुमानेनाभ्युपगन्तव्यम् । अतस्तयोश्चरणयोर्द्वैतभावावस्थां दृष्ट्वा तयोरद्वैतभावाख्यफलोत्पत्तौ युक्तिवादैः शङ्का न करणीया, यतोऽत्र प्रत्यक्षानुमानाभ्यां प्रमाणाभ्यां साध्यावगतिरास्ते अन्यत्र युक्तिवादे कारणात्कार्यानुमितिरिति एकमेव प्रमाणम् ।

(२७)

पादाग्रं तव कामदं सुरलताशाखाग्रमाचक्ष्महे
जाता यत्र हि बालपल्लवरुचिः स्वैरेव रागोद्गमैः ।
उत्सर्पन्नखमण्डलीसुषमया पुष्पालिरुत्पादिता
सञ्जातालिरुतिश्च मञ्जुलतरैर्मञ्जीरशिञ्जारवैः ॥

तव पादाग्रं कामदं सकलाभीष्टदायकं सुरलता शाखाग्रं कल्पलतिकाग्रमाचक्ष्महे निस्सन्देहं वदामः । यत्र हि स्वैरेव रागोद्गमैर्निजैरेवारुण्यविलसितैः बालपल्लवरुचिः बालप्रवालशोभा जनिता। हि आश्चर्यार्थे। लताग्रे नवपल्लवोद्गमेनाकृत्रिमं यदारुण्यं तदेवात्रापि । उत्सर्पन्नखमण्डलीसुषमया प्रसरन्नखसमूहप्रभया पुष्पालिरुत्पादिता पुष्पगुच्छा उत्पाद्यन्ते पुष्पसमूहानां प्रतीतिरुत्पादिता। लताग्रेषु पल्लवोद्गमानन्तरं पुष्पाणां विकसनमपि स्वाभाविकम्। तेन मकरन्दपानाय भ्रमराणां कोलाहलो भवति। अत्र मञ्जुलतरैर्मञ्जीरशिञ्जारवैर्नूपुरयोरतिमधुरैरालापैरलिरुतिर्भ्रमरक्वणितमपि सम्पाद्यते। एवं पल्लवकुसुमोद्गमभ्रमरनादैः लताविशेषणैस्समग्रैस्सम्पन्नं देव्याः पदं सर्वकामप्र दातृत्वात्कल्पवल्ली सर्वथा अनुकरोतीति भावः ॥

(२८)

देवीयं तव सन्नतेशमुकुटस्वर्लोककल्लोलिनी-
कल्लोलाहतिभिर्विशेषविमला जीयान्नखश्रेणिका ।
यद्भावल्यमवाप्तुमात्तकुतुकास्तोये तपस्यन्त्यमी
दीनाः फेनकणाश्च मौक्तिकगणाश्शंखाश्च शङ्कामहे ॥

हे देवि ! इयं ते नखश्रेणिका नखपङ्क्तिः जीयाल्लोकोत्तरवैभवा विलसताम्। सन्नतस्य प्रणयकोपशमनाय पुरोऽवनतस्य ईशस्य मुकुटे जटाचूडे वर्त्तमानायाः स्वर्ल्लोककल्लोलिन्याः स्वर्गंगायाः

कल्लोलाहतिभिस्तरङ्गसंघट्टनैर्विशेषेण विमला अतितरां शुभ्रा वर्तते। यस्याः नखश्रेण्याः धावल्यं धवलकान्तिमवाप्तुं कुतुका तत्समानां कान्तिं कामयन्तः दीनाः धावल्यदारिद्रयमनुभवन्तः फेनकणाः मौक्तिकगणाश्शंखाश्च धावल्यगुणविशिष्टा इति लोके प्रथां प्राप्तवन्तोऽपि एते त्रयः त्वन्नखश्रेण्याः पुरतः दैन्यमापन्नाः तस्यास्समानतां प्राप्तुं तोये तपस्यन्तीति शङ्कामहे। फेनशंखमुक्तानां जले वासस्तपश्चर्यार्थमित्युत्प्रेक्षा।

(२९)

माने शम्भुशिरःप्रहारचरितं नैव त्वदिच्छाकृतं
जाने देवि पदाब्जयोस्तु पुरजिन्मूर्ध्ना विरोधादिदम्।
एते पादनखांशुबद्धकलहाः शीतांशुमन्दाकिनी-
भोगीन्द्राः किल शङ्करस्य शिरसा शङ्कां विना रक्षिताः॥

हे देवि! माने प्रणयकलहजनितकोपावसरे यच्छम्भुशिरः प्रहारचरितं शंम्भोश्शिरसि पादप्रहाररूपं यद्वृत्तं तदेतत्त्वदिच्छाकृतं नैवेति जाने। सतीनां धुरि स्थितया त्वया स्वेच्छया नैव पत्युः शिरसि पदप्रहारः कृत इति मे मतम्। कथं पुनः पादाघात इति चेत् त्वच्चरणयोः शंभुशिरसा स्वतस्सिद्धो वैरभावो वर्त्तते। एते शीतांशुमन्दाकिनीभोगीन्द्राः तव पादनखांशुवद्धकलहाः आकारधावल्य शीतलत्वपावनत्वादिगुणेषु तानतिशेरते तव नखांशव इतीर्ष्यया कलहायमाना वर्तन्ते। शीतलत्वपावनत्वगुणयोर्मन्दाकिनी; शीतलत्वाह्लादकत्वधावल्यकुटिलत्वगुणेषु शशिकला; शीतलत्व कुटिलत्वधवलत्वगुणेषु भोगीन्द्रश्च त्वन्नखैः पराजिता, असूयया कलहायमाना वर्त्तन्ते। तथाऽपि ते शंकरस्य शिरसा शङ्कां विना रक्ष्यन्ते किल। देव्या स्वजना वयं नखांशवः, अस्मान् जानन्नपि अस्मत्परिपन्थिनां चन्द्रमन्दाकिनीसर्पराजानां कथं शरण्यो भवसीति

शिवशिरसि स्थाने कोप: नखानां, शंकर: [आस्तां सर्वेषां शिवंकर:, आशुतोष:, शरणागतवत्सलश्च, तथापि देव्या अपराधिनामपि शरणं यच्छता तेन देव्या विपक्षानुकूल्यमाचरितमिति देव्या आज्ञामिच्छां वा अप्रतीक्ष्यैव शिवशिरस्ताडनं पादेन स्वयं कृतमित्यभिप्राय: ।।

(३०)

देवि त्वच्चरणोच्चलन्नखमणिश्रेणीषु लीनो नम-
न्नाभाति स्फटिकाचलस्फुटतटीशायीव सायंनट: ।
हंसालीनवपु: स्वयं कमलभू: क्षीराब्धिशायीव च
श्रीभर्त्ता मघवापि नाकसरसि स्नायन्निवालोक्यते ।।

हे देवि ! त्वच्चरणोच्चलत् तव चरणाभ्यां नि:सरत् नखमणिश्रेणीषु नखाकाराणां मणीनां कान्तिकल्लोलेषु लीन: नमन्मग्न: सायं नट: सन्ध्याताण्डवप्रिय: शिव: स्फटिकाचलस्फुटतटीशायीव कैलासाचलस्य स्फुटतटी प्रकाशमाना उपत्यका तस्यां शायीव कैलासस्य भासमाने धवले तटे शेत इव भाति । कमलभूर्ब्रह्मा स्वयं हंसालीनवपु: स्वमहिष्या: सरस्वत्या वाहनभूते हंसे हंसशरीरकान्त्यामालीनवपु: लीनशरीर इव धावल्येन तन्मयतां गत इवाभाति । श्रीभर्त्ता लक्ष्मीकान्तो विष्णु: क्षीराब्धिशायीव तदाऽपि क्षीरसागर एव शयान इवाभाति । मघवाऽपि इन्द्रोऽपि नाकसरसि स्वर्गंगायां स्नायन्निव स्नानं कुर्वाण इवालोक्यते । भगवत्या: चरणकमलयोर्नमस्कुर्वन्त: हरविरिञ्चविष्णुशतमखा: तन्नखश्रेणिधावल्ये मग्ना: स्वां स्वां शरीरकान्तिं विहाय क्रमेण कैलासतटे शयान इव हंसशरीरे लीन इव, क्षीरसागरे शयान इव स्वर्धुन्यां मज्जमान इव दृश्यन्ते । निसर्गसिद्धेषु स्वस्ववासस्थलेषु यादृशीमात्मीयतां तल्लीनतां वा अनुभवेयुस्तादृशीं स्वस्थानसहजां स्वकीयतां निर्वृतिं च भगवत्याश्चरणयो: प्रणतिप्रसङ्गे लभन्त इति तात्पर्य: ।

(३१)

डोलाकेलिविधौ हिमाचलशिलादेशे समभ्याहता-
त्पादाग्रात्तव यानि यावकरसप्रस्यन्दनान्यम्बिके ।
तान्यभ्यागतसुम्भसंगरभवद्रक्ताम्बुविस्तारणा-
बिन्दुक्षेपनिभानि नन्ददमरीवन्द्यानि वन्दामहे ॥

डोलाकेलिविधौ डोलाक्रीडावसरे हिमाचलस्य शिलाप्रान्ते समभ्याहतात् डोलायाश्चालनाय पुरोवर्त्तिनि शिलाप्रान्ते संघट्टितात् तव पादाग्रात् यानि यावकरसप्रस्यन्दनानि लाक्षारसबिन्दूनां स्रवणानि तानि अभ्यागतसुम्भसंगरभवद्रक्ताम्बुविस्तारणाबिन्दुक्षेपनिभान्यासन् । निकटभाविनि करिष्यमाणो यस्सुम्भसंगरः सुम्भासुरेण सह युद्धः तस्मिन् भवत् उत्पत्स्यमानः रक्ताम्बुविस्तारणा रक्तद्रवप्रवाहः तेन जनितानि बिन्दुक्षेपनिभानि रक्तकणानां क्षेपणानीव विराजन्ते । तेनैव हेतुना नन्ददमरीवन्द्यानि, निजभर्तॄणां सुराणां दानवोत्थं भयमपोह्य स्वमाङ्गल्यं रक्षितमिति हर्षमनुभविष्यन्तीभिर्देवाङ्गनाभिरीड्यानि कृतज्ञतापूर्वमभिवन्द्यानि पदन्यासजनितलाक्षारागचिह्नानि वन्दामहे ॥

(३२)

डोलाकेलिषु यं हिमाचलशिलालग्नं वने वासिनो
भक्त्या योगिवरास्त्रिपुण्ड्रकलिते लिम्पन्ति फलान्तरे ।
यं सिद्धप्रमदास्समेत्य तिलकं कुर्वन्ति नत्वा मुहु-
स्तं दाक्षायणि ! ते कदा नु पदयोरीक्षेय लाक्षारसम् ॥

हे दाक्षायणि ! दक्षस्यापत्यं स्त्री तस्यास्संबुद्धिः दक्षप्रजापतिसुते ! ते पदयोर्लाक्षारसं कदा नु ईक्षेम ? कदा वा त्वत्पदकमलसेवावसरप्रसङ्गे अथवान्तर्दृशा त्वत्पदानुसन्धानजनितसाक्षात्कारावसरे सुलभं तत्रत्यलाक्षारागदर्शनसौभाग्यं मे भविष्यति ? कीदृशः

लाक्षारसः ?—यं डोलाकेलिषु डोलाक्रीडावसरे हिमाचलशिलालग्नं डोलायाः शीघ्रतरगतिमुत्पादयितुं पुरःस्थपर्वतशिलायां पदघट्टनावसरे लग्नं लाक्षारसं देव्याः प्रसादपरिपाकमयमिति भक्तास्स्वीकुर्वन्ति। वने वासिनः योगिवराः वानप्रस्थाः योगिश्रेष्ठाः त्रिपुण्ड्रकलिते पूर्वं भस्मत्रिपुण्ड्रेणालंकृते फालान्तरे तं लाक्षारसं लिम्पन्ति लेपं कुर्वन्ति । यं च लाक्षारसं सिद्धप्रमदास्सिद्धाङ्गनाः समेत्य संघश उपेत्य नत्वा तेनैव सिन्दूरतिलकं रचयन्ति । लाक्षारागाङ्कित स्थाने मस्तकं न्यस्य तेनैव तिलकधारणविधिं सम्पादयन्ति, तादृशं लाक्षारसं कदा नु ईक्षेय अर्थात् लाक्षारुणं देव्याः पदयुगं कदा वा मम प्रत्यक्षानुभवगोचरं भविष्यति ?

(३३)

देवि त्वं मुरवैरिणः प्रणमने यत्किञ्चिदाकुञ्चय
श्रीपादाम्बुजमन्यथाऽस्य शिरसि त्वत्पादलाक्षाञ्चिते ।
श्रीभूम्योरितरप्रणामकृतमित्यन्योन्यमाशङ्कया
रोषव्याकुलयोश्चिराय स भगवान् जायेत पर्याकुलः ।।

हे देवि ! श्रीपादाम्बुजं मङ्गलमयं पदकमलं मुरवैरिणः प्रणमने महाविष्णोर्नमस्कारवेलायां त्वं यत्किञ्चिदाकुञ्चय ईषन्मात्रमाकुञ्चय तस्य मौलिस्पर्शनं यथा न स्यात्तथा किञ्चिदपावर्त्तितं कुरु। यद्येवं न करोषि तर्हि महाननर्थः सम्भविष्यति । यदि तव पदाम्बुजमनाकुञ्चितमेव वर्त्तेत तदा हरिशिरः त्वत्पादलाक्षाञ्चितो भविष्यति तत्रत्यलाक्षारसेनाञ्चितं मुद्रितं भविष्यति । अनेन श्रीभूम्योः श्रीदेव्या भूदेव्याश्च विष्णुगृहिण्योर्मनसि इतरप्रणामकृतमिति अन्योन्यमाशङ्कया रोषव्याकुलभावे उदेष्यति । श्रीदेवी प्रसादयितुं तस्याः पदयोः प्रणतवानयं कितवः मत्तोऽधिकं तां मानयतीति भूदेव्या मनसि, तथैव लक्ष्म्या मनसि भूदेवीमधिकृत्य च शङ्कां जनयिष्यति तेन उभे अपि मिथः सपत्नीसहजया ईर्ष्यया कलुषिते भविष्यतः ।

तौ युगपत्परिसान्त्वयितुमसमर्थः स भगवान् सर्वशक्तो भगवत्पद-वाच्योऽपि हरिः चिरं पर्याकुलो जायेत। एककाले उभयोः समान-रूपा शङ्का चरणगतलाक्षारसेनोत्पाद्यते। उभावपि शङ्किष्येते उभयोस्सान्त्वनं नितरां दुष्करं भविष्यति अतः निजपादं किञ्चिदा-कुञ्चय ॥

(३४)

प्रागुद्वाहविधौ हिमाचलसदस्यश्माधिरोपाय य-
न्न स्प्रक्ष्यामि वियद्धुनीमिति पुनः सत्यं विधातुं च यत्।
दैत्योत्पेषणसाहसे विरचिते संवाहनार्थं च य-
त्तत्पादग्रहणत्रयं विजयते शर्वेण शर्वाणि ते ॥

हे शर्वाणि ! शिवमहिषि शर्वेण तव कान्तेन कृतं ते पादग्रहणत्रयं त्रिवारं यत्तव पदयोर्ग्रहणमनुष्ठितं तद्विजयते लोकोत्तरकीर्त्या विराजते। कदा कदा तदभूदिति पादत्रयेण विवृणोति प्रागित्यादि। प्राक् प्रथमं तावदुद्वाहविधौ विवाहमंगलसन्दर्भे हिमाचलसदसि हिमवतः राजधान्यामश्मारोपणायामश्मन्यारोपणाय भर्त्रा शिवेन ते पादग्रहणं कृतम्। "अश्मानमिममारोह अश्मेव त्वं स्थिरा भव" इति मन्त्रपठनपूर्वकं वध्वा दक्षिणं पदं प्रगृह्य अश्मन उपरि वर आरोपये दिति विवाहविधिमनुसरता यत्तदानीं शिवेन कृतं तत्प्रथमवारपाद-ग्रहणम्। पुनः पश्चात् वियद्धुनीं गंगां न स्प्रक्ष्यामि स्पर्शमात्रमपि न करोमीति सत्यं विधातुं शपथग्रहणावसरे यद्देव्याः पदयुगस्य ग्रहणं तद्द्वितीयवारपादग्रहणम्। तृतीया घटना यदा भगवत्या दैत्योत्पेषण-साहसं विरचितं तदानीम्। महिषमर्दनरूपं साहसं निर्वर्त्य देव्यां तिष्ठन्त्यां सत्यां तच्छ्रमापनोदनाय संवाहनकृत्यमनुष्ठातुं पादग्रहणम्। इत्थं त्रितयमपि शंभुकृतपादग्रहणं विजयते ॥

(३५)

सुम्भस्ते किल देवि रागकलहे पादप्रहारोत्सवं
लब्धुं कांक्षितवानुपायमिह खल्वज्ञो न विज्ञातवान् ।
यद्यायोत्स्यति घोरमाहिषवपुर्धारी स वैरी ततः
प्राघानिष्यत मूर्ध्नि कोमलरुचा पादारविन्देन ते ।।

हे देवि ! सुम्भः रागकलहे ते पादप्रहारोत्सवं लब्धुं किल कांक्षितवान् । स्त्रीरत्नभूता त्वं मां पत्नीत्वेन भज इति भवत्याः प्रणयप्रार्थनां कुर्वन् भर्त्ता भवितुमैच्छत् सुम्भदैत्यः । तत्र हेतुः परिणयानन्तरं प्रणयकलहावसरे पादप्रहारोत्सवं काँक्षन्नेव स एवं कृतवानित्युत्प्रेक्षा । किन्तु तामाशां पूरयितुमज्ञः सः उपायं न विज्ञातवान् । अभीष्टलाभे व्यग्रोऽपि तत्प्राप्त्युपायः मूर्खेन तेन नावगतः । यदि घोरमाहिषवपुर्धारी स वैरी शत्रुभूमिकां गृहीत्वा भयङ्करं महिषरूपं धृत्वा यदि त्वया सह युद्धमकरिष्यत् ततः कोमलरुचा मनोहरशोभावहेन ते पादारविन्देन तव चरणकमलेन मूर्ध्नि शिरसि प्राघानिष्यत पादाघातमन्वभविष्यत् । महिषासुरेण उपायज्ञेन यो मार्ग आदृतः स एव भगवत्याश्चरणप्रहारलाभाय वरीयानुपाय इति मूर्खेन सुम्भासुरेण न ज्ञातं यतस्स प्रणयप्रार्थनां कुर्वन् खड्गप्रहाराहतो बभूव ।।

(३६)

आनम्रे गिरिशे पदप्रहरणे दत्ते भवत्या रुषा
नाथे किं महिषोऽहमित्यभिहिते देवेन तस्मिन् क्षणे ।
आलीष्वाकलितस्मितासु पुनरप्युद्दामपुष्यद्रुषा
तन्मौलौ जयति द्वितीयमपि ते पादाब्जसन्ताडनम् ।।

आनम्रे गिरिशे प्रणयापराधक्षमापणाय परमेश्वरे तव पुर आनम्रे नतमस्तके सति, रुषा पदप्रहरणं भवत्या दत्ते खण्डितनायिका-

सामान्येन कोपेन भवत्या पादाघातरूपदण्डे दत्ते सति तस्मिन् क्षणे देवेन "हे नाथे किमहं महिष" इत्यभिहिते किं मां महिषासुरममन्यथा यतः पादप्रहारं करोषीति पृष्टवान् शिवः। इदं नर्मवचनमन्यथा व्युत्पाद्य "महिष्यास्तव नायकोऽहं महिष इति कृत्वा स्मारित महिषासुरया पादताडनं कृतं किमिति पृच्छतीति महिषशब्दस्य साकूतत्वमवगम्य आलीषु आकलितस्मितासु सखीषु आकलितस्मितासु कामातुरत्वात्सत्यमयं महिष्याः पतिर्महिष एव सञ्जात इति तात्पर्यद्योतकं स्मितं परिहासलक्षणं हसितं कुर्वतीषु सत्सु पुनरेकवारमपि उद्दामपुण्यद्रुषा अनियन्त्रितमुदीयमानेन रोषेण दुष्टमहिषासुरस्य नामसाम्यं वहतीति हेतोः द्वितीयमपि पादाब्जसन्ताडनं यद्दत्तं तत्ते जयति। प्रथममन्याप्रसक्त इति हेतोः पुनरेकवारं साधुजनद्रुहा महिषेण नामसाम्यं वहतीति हेतोश्चरणप्रहारः कृतः॥

(३७)

पादाग्रं तव संगरश्रमवशादाक्षायि लाक्षारसं
विन्यस्तं मृगनायकोपरि चिरं जीयादगेन्द्रात्मजे।
यत्कान्त्यैव च लोहितो मृगपतिर्दैत्यप्रहारोद्गल-
द्रक्ताम्भःकणिका वहन्नपि तथा नामानि वैमानिकैः॥

हे अगेन्द्रात्मजे ! नगराजतनये ! संगरश्रमवशाद्युद्धपरिश्रमकारणात्तत्क्लान्त्यपोहनाय मृगनायकोपरि स्ववाहनभूतमृगेन्द्रस्योपरि अर्पितं न्यस्तम् आक्षायिलाक्षारसं पदं, प्रस्रवद्लाक्षारसं पदं चिरं जीयाल्लोकोत्तरं विजयताम्। यस्य लाक्षारसस्य शोणिम्ना एव मृगेन्द्रोपर्यङ्कितया, दैत्यप्रहारोद्गलद्रक्ताम्भःकणिका वहन्नपि, दैत्यकृतशस्त्रप्रहारैर्जनितेभ्यो व्रणेभ्यः प्रस्रवद्रक्तविन्दून् वहन्नपि तदीयोऽयं शोणिमा इति नामानि वृन्दारकैः। वैमानिकैराकाशे विमानैरागतैस्समरदर्शनार्थमुपागतैः वृन्दारकवृन्दैः देवगणैः देव्याश्चरणकमलस्रवल्लाक्षारसजनितो अरुणिमेत्येवावगतम्। देव्या वाहनभूते सिंहे केवलं

स्वपराक्रचिह्नमङ्कितं दैत्येन। तस्यापि यशः तेन न प्राप्तं यतस्सर्वं तम् रक्तबिन्दुकृतम् शोणिमानम् भगवत्याश्चरणलाक्षाजनितम-मन्यन्त ॥

(३८)

नैवालिम्प निलिम्पमूर्धसु न वा सिंहोपरि त्यज्यतां
मा चेदं महिषस्य मूर्ध्नि रभसादालिप्य लोलुप्यताम्।
पत्युर्मौलिनदीजले परमिदं संक्षालनीयं त्वये-
त्यालीकेलिगिरो जयन्ति गिरिजे त्वत्पादलाक्षार्पणे ॥

हे गिरिजे ! त्वत्पादलाक्षार्पणे तव पदयोर्लाक्षारसेन प्रसाधन-वलायामालीजनानां सखीनां केलीगिरः नर्मालापाः जयन्ति। किं किमालपन्ति ता इति पादत्रयेण वर्णयति नैवालिम्पेत्यादिना। निलिम्प-मूर्धसु नैवालिम्प, अस्माभिरर्प्यमाणोऽयमलक्तकरसः एष चरणयोः प्रणमतां देवानां मूर्धसु नालिम्पनीयः तत्र न संक्रमितव्यः। न वा सिंहोपरि त्यज्यताम्। वाहनभूतस्य सिंहस्योपरि न विजसर्जनीयः। न चायं महिषस्य मूर्ध्नि रभसादालिप्य पदप्रहरणवेगेन महिषासुर-शिरस्यालिप्य सम्मृज्य लोलुप्यतां निःशेषतां न गमयितव्यः। कुत्र वा तस्यापमार्जनं सम्मतमिति चेदुच्यते—पत्युर्मौलिनदीजल एव संक्षालनीयं शिवशिरोवर्तिन्यां गंगायामेव प्रक्षालनीयोऽयं लाक्षारसः। "मूर्धानं पत्युरारोह" इति विवाहमन्त्रार्थं सार्थयन्ती स्वाधीन-वल्लभा भव सपत्नीभ्यः पादसेवां कारयेत्यभिप्रायः ॥

(३९)

नत्वैव प्रथमं त्वदङ्घ्रिकमलं तौ पुष्पवन्तावुभौ
त्रैलोक्यं महसाभिभूय चरतो व्योमान्तरप्रान्तरे।
नाथे तौ कथमन्यथा परिगलल्लाक्षारसक्षालितौ
वीक्ष्येते भृशशोणबिम्बमुदयारम्भे प्रियंभावुकौ ॥

पुष्पवन्तौ सूर्यचन्द्रमसौ तावुभौ त्वत्पादसेवनादेव गौरवं प्राप्तौ। "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरा" वित्यमरकोशः।[1] सूर्यचन्द्रौ प्रथमं त्वदङ्घ्रिकमलं नत्वैव तज्जनितपुण्यविशेषेणैव न तु स्वशक्त्या त्रैलोक्यं महसा अभिभूय तेजोभिर्भुवनत्रयमभिव्याप्य व्योमान्तर-प्रान्तरे आकाशवीथ्यां चरतः। समस्तजगद्भासकशक्ति सर्वोच्चेन पथा सञ्चारक्षमतां च चित्प्रकाशरूपायाः खेचरीप्रभृतीनां विद्यानामाधार-भूतायास्तवानुग्रहबलेनैव चन्द्रादित्यौ लभेते। हे नाथे! सर्वप्राणिनां नाथभूतयोरपि नाथे स्वामिनि! अन्यथा, प्रथमं तवाङ्घ्रिसेवां न कृतवन्तौ चेत् कथमुदयारम्भे उदीयमानावस्थायां त्वल्लाक्षारसक्षा-लितौ तव पदयुगस्रवल्लाक्षासवेन क्षालितावत एव भृशशोणबिंबं यथा तथात्यन्तं रक्तं मण्डलं बिभ्राणौ प्रियं भावुकौ प्रेक्षकाणां प्रियं प्रेयः-श्रेयः प्रदौ च वीक्ष्येते। भगवत्याश्चरणसेवोपात्तलाक्षारसप्रसाद-धारणेनैव शोणप्रभौ सन्ध्योपासनं कुर्वतां प्रेयःश्रेयःप्रदानकुशलौ चकासतः, अन्यथाऽसंख्यास्तारागणा नभोमण्डले वर्त्तन्त एव न तु तेषामेवं प्रियंभावुकत्वम्॥

(४०)

त्रैलोक्यं वशयन्ति पापपटलीमुच्चाटयन्त्युच्चकै-
र्विद्वेषं जनयन्त्यधर्मविषये प्रस्तम्भयन्त्यापदम्।
आकर्षन्त्यभिवाञ्छितानि महिषस्ववैरिणो मारणा-
श्चित्रं त्वत्पदसिद्धचूर्णनिवहाः षट्कर्मणां साधकाः॥

त्वत्पदसिद्धचूर्णनिवहाः तव पद एव सिद्धः मन्त्रसिद्धिं प्राप्त उपासकः यस्य चूर्णनिवहाः येनाभिमन्त्र्य दत्ताश्चूर्णमुष्टयः अर्थात् तव पदपांसव एव सिद्धचूर्णाः मान्त्रिककृत्यमखिलं निर्वाहयन्ति। यथा सिद्धपुरुषैरभिमन्त्र्य प्रयुक्ता अञ्जनचूर्णादयः षट्कर्मनिर्वाहणे प्रभवन्ति तद्वत्तव पदधूलयोऽपि समर्थाः। मन्त्रशास्त्रप्रसिद्धानां

---

१. पुष्पं विकासोऽस्त्यनयोरिति अमरव्याख्या।

वशीकरणोच्चाटन-विद्वेषण-प्रस्तम्भन-आकर्षण-मारणाख्यानां षण्णामपि कर्मणां साधकास्सम्पादकास्सन्तीति चित्रमाश्चर्यम् । वशीकरणं नाम समस्तस्य विश्वस्य प्रयोक्तुर्वशे आनयनम् । भगवत्याश्चरणरेणवः त्रैलोकमप्याराधकस्य वशे स्थापयन्ति । उच्चाटनं नाम प्रयोक्तुश्शरीरे आविष्टानां भूतप्रेतादीनामुच्चाटनमपोहनम् । अत्र देव्याश्च्चरणपांसवः आराधकस्य पापपटलीं भूतप्रेतादीनामपि प्रवेशद्वारभूतं पापसमूहमुच्चाटयन्ति । विद्वेषणं नाम प्रयोक्तुः प्रतिद्वन्द्विभ्यः यत्रकुत्राप्यनुरागो वर्त्तते चेत्तत्र तत्र द्वेषभावस्योत्पादनं मैत्रीभंगः । चरणरेणवस्त्वाराधकानामधर्मविषये मैत्रीभंगं कुर्वन्त्यर्थात् धर्मापेतकृत्येषु विद्वेषं त्याज्यबुद्धिमुत्पादयन्ति । अहितमाचरितुमुद्यतस्य तत्करणविषय क्षमताऽथवा चिकीर्षा तस्याः स्थगाकरणं प्रस्तम्भनमित्युच्यते । भगवत्याः पदपांसवः आपदमाराधकानां विपज्जालं स्तम्भयन्ति विफली कुर्वन्ति । आकर्षणं नाम दूरस्थं दुष्प्रापमपि वस्तु प्रयोक्तुः कृते सुलभतया प्रापणम् । देव्याश्चरणरेणवः आराधकस्याभिवाञ्छितानि सर्वाण्यभीष्टानि तत्सविधे प्रापयन्ति । मारणं नाम शत्रोरुन्मूलनम्, तच्चात्र स्ववैरिणः महिषासुराख्यस्य देवशत्रोर्मारणेन प्रदर्शितम् । इत्थं तवचरणाम्बुजपरागाः सिद्धचूर्णा इव वशीकरणादिषट्कर्मकुशला इति चित्रमाश्चर्यजनकम् ।

(४१)

किं पञ्चायुधबाणपञ्चकमिदं मारारिसम्मोहनं
किं कल्पद्रुमपञ्चकं प्रणमतामाकाङ्क्षितापादने ।
सूक्ष्मं किञ्चन पञ्चभूतवपुषो विश्वस्य किं कारणं
त्वत्पादाङ्गुलिपञ्चकात्मकमिदं किं भाति शंभोः प्रिये ॥

हे शंभोः प्रिये ! त्वत्पादाङ्गुलिपञ्चकात्मकमिदं तव पादाङ्गुलीनां पञ्चानां समाहारोऽयं किं पञ्चायुधस्य वाणपञ्चकम् ?

मन्मथस्य पञ्चानां बाणानां समाहार इव भाति । किमर्थमत्रैकत्रीकृतमिति चेन्मारारिसम्मोहनम् । मदीयधनुषा प्रयुक्ता इमे बाणाः परमेश्वरमोहनेऽसफलास्सञ्जाताः तव पदाश्रयेणैव तेषाममोघत्वं भविष्यतीति मन्मथः देव्याश्चरणयोरस्त्रन्यासं कृतवानिति द्योतयितुं मारारिसम्मोहनमिति विशेषणम् । अथवा प्रणमतां भक्तानामाकाङ्क्षितापादने वाञ्छितवरप्रदाने कल्पद्रुमपञ्चकं किम् ? एकः कल्पद्रुमः युगपत्सर्वेषामिच्छापूरणे न समर्थः स्यादिति विचार्य पञ्चकल्पवृक्षाः अङ्गुलीपञ्चकरूपेण विराजन्त इत्युत्प्रेक्षा । 'पञ्चैते देवतरवो मन्दारः पारिजातकः सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्' इत्यमरः । अथवा पञ्चभूतवपुषः विश्वस्य पृथिव्यादि भूतपञ्चकात्मकस्य प्रपञ्चस्य सूक्ष्मं किञ्चन कारणं किम् ? "कारणपूर्वकः कार्यगुणो दृष्ट" इतिन्यायानुसारं प्रपञ्चस्य पञ्चभूतानि सूक्ष्मकुड्मलावस्थायां मङ्गुलीपञ्चकत्वेन वर्तन्त इत्युत्प्रेक्षा ॥

(४२)

डोलाकेलिषु दूरदूरगमने प्रेङ्खोलनाविभ्रमे
मेदिन्यामनिपातितं जयति ते नाथे पदाम्भोरुहम् ।
भक्त्या सन्नमतां त्वदाननगलद्गानामृतामूर्छया
भूपृष्ठे चिरवासिनां दिविषदामाघट्टनासाध्वसात् ॥

हे नाथे ! डोलाकेलिषु डोलाक्रीडावसरे प्रेङ्खोलनाविभ्रमे उत्पत्योत्पत्य डोलाचालनात् दूरदूरगमने प्रत्यान्दोलनं दूराद्दूरतरं गच्छति डोला, प्रथमं कतिवारं भूमौ पादावुत्खनन् डोलावेगे वर्धिते पश्चात्पादौ भूमावनिक्षिप्यैव प्रेङ्खोलनामात्रेण शरीरस्य पुरतः पश्चाच्चाकुञ्चनमात्रेण डोलायां प्रचलन्त्याम् सत्याम् मेदिन्यामनिपातितं भूस्पर्शमकुर्वत् वर्तमानं ते पादाम्भोरुहं जयति । भक्त्या सन्नमतां नमस्कुर्वतां नमनावसरे देव्या वदननिःसरन्मधुरगानाख्य-

ममृतं निपीय मूर्छिताः स्वशरीरस्मरणं विना गानरसे लीनावस्थां प्रापिताः देवा भवन्ति। भूपृष्ठ एव चिरवासिनां नतावस्थायामेव भूतले चिरं शयानानां तेषामुपरि पादाघट्टनसाध्वसात् पादघट्टनं मा भूदिति भूस्पर्शं परिहरत् ते पदं जयति लोके परमोत्कर्षेण वर्त्तते ॥

(४३)

मञ्जीरप्रसरच्च सारसुषमारूपा कलिन्दात्मजा
स्वच्छच्छायनखांशुसञ्चयमयी गंगा च संगामुका।
शोणः पादरुचां चयश्च मिलितो येन त्वदग्रे नता
मज्जन्तीव नमन्ति तत्र मुनयस्सर्वेऽपि शर्वाङ्गने ॥

हे शर्वाङ्गने शिवमहिषि ! मञ्जीरप्रसरत् पदघटितनूपुरात्प्रवहत् यथा स्यात्तथा सारसुषमारूपा नीलमणिप्रभारूपा कलिन्दात्मजा यमुना वर्त्तते। स्वच्छच्छायाविमलतरधवलच्छायायुतः नखांशुसञ्चयः नखमयूखानां समूहः एव संगामुका गंगा संगमनोत्सुका स्वर्धुनी। तत्रैव पादरुचां चयश्च पदपल्लवस्यारुणकान्तीनां निचयश्च शोणः तदाख्यनदः मिलितः संगतः। एवं यमुनागंगाशोणाः मिलित्वा तत्कारणेन त्वदग्रे नता जनाः मज्जन्तीव तीर्थत्रयसंगमे निमज्जनस्यानुभवं प्राप्नुवन्ति। यदृच्छया त्वत्पादाग्रे नतानां गंगायमुनासरस्वती संगमरूपे तीर्थराजे स्नानलाभो वर्तत इति अवगम्य सर्वेऽपि मुनयस्तत्र नमन्ति। प्रयागादितीर्थस्नान लाभः देव्याश्चरणवन्दनादेव प्राप्तुं शक्य इति द्योतयति ॥

(४४)

मञ्जीरार्पितशक्रनीलशकलश्रीचञ्चरीकाञ्चितं
राजद्रेणुविभूषितं परमहंसालीभिरासेवितम्।
त्वत्पादाब्जसरोजमङ्गुलिदलच्छायाभिराभासुरं
विष्वग्रोचिनखांशुजालपयसि स्वच्छे समुच्छोभते ॥

त्वत्पादाब्जसरोजं तवाब्जमिव पदं पादाब्जं तदेव सरोज कमलतां प्राप्य समुच्छोभते अतितरां प्रकाशमानं वर्तते। कविभिः प्रायेण पद्मेनोपमितं किन्तु पद्माद्भिन्नत्वेन वर्ण्यमानं चरणं सरोजत्वमेव प्राप्तं सरोजगतैस्समस्तैर्गुणैर्विराजमानत्वात्। चन्द्र इव वदनमित्युपमानोपमेयसम्बन्धेन यथा वर्ण्यते तदा चन्द्रगतानां कतिपयानामेव धर्माणां मुखे सद्भावो विवक्ष्यते। अत्र तु पादाब्जशब्देन तादृशः समानधर्मावष्टब्धोपमानोपमेयभावो द्योत्यते। तदनन्तरं सरोजपदेन सरोजाभेदत्वं विवक्षितम्। अभेदः कथमिति वर्ण्यते मञ्जीरेत्यादिना। मञ्जीरार्पितानां नूरपुरघटितानां शक्रनीलशकलानामिन्द्रनीलमणीनां श्रिया कान्त्या चञ्चरीकाञ्चितं भ्रमरमण्डलाश्रितं भाति। राजत् प्रकाशमानरेणुविभूषितं पांसुभूषितत्वात् परागरेणुभिश्शोभमानं वर्तते। पदपांसुभिः परागभरितमित्यर्थः। हंसैर्यथा पद्मं सेव्यते तथा परमहंसालिभिः त्यक्तेषणैः स्थितप्रज्ञैर्हंसवत्वं पदस्यापि। पुनश्च अङ्गुलय एव दलानि तेषां छायाभिः आभासुरं आसमन्तात् भासमानं विद्यते। कोमलारुणविकसितत्वगुणविशिष्टा अङ्गुल्य एव दलानि भवन्ति। पद्मस्य स्थित्यै कमलिनी आवश्यकी। विष्वग्रोचि सर्वत्र प्रभातति वितरन् नखांशुजाल एव नखमरीचिचय एव तत्कार्यं निर्वहत् पयःपटलवद्वर्तते। प्रसरन्नखमयूखजलपूरिते स्वच्छे निर्मले सरसि पदपद्मं पूर्णसरोजधर्मैः समुच्छोभते राराजते॥

(४६)

मञ्जीरस्वनमञ्जुझिञ्झिकरवे तत्संगिनीलोपल-
च्छायारूपतमोलवे नखमिषादक्षीणतारागणे।
सन्ध्यारागनिभस्वकान्तिपटले त्वत्पाद मूलात्मक-
प्रत्यूषोपगमे हि देवि लभते लोकः प्रबोधोदयम्॥

पदस्य सरोजत्वं निर्वर्ण्य तस्योदयाय न केवलं किन्तु विश्वस्याप्युद्बोधनाय प्राकृत: सूर्यः नापेक्ष्यते स्वयमेव देव्याश्चरणमुषसः कार्यमपि निर्वहतीति वर्णयति मञ्जीरेत्यादिना। मञ्जीरस्वन एव मञ्जुविष्किररवः नूपुरशब्द एव मनोहरः पक्षिनिनादः य उषःकाले श्रूयते। तत्सङ्गी तस्मिन् मञ्जीरे घटितानां नीलोपलानां नीलमणीनां छाया एव तमोलवः अन्धकारशकलाः ये सूर्योदयवेलायां तत्र तत्र निलीना दृश्यन्ते। नखमिषान्नखाकारेण वर्त्तमानाः अक्षीणं यथा तथा प्रकाशमानास्तारागणा एव प्रभाते दृश्यमानास्तारागणाः नक्षत्रसमूहाः नखाकारेण राजन्ते। सन्ध्यारागनिभः स्वकान्तिपटलः पदयुगस्य कान्तिपटलः शोणवर्णविस्तारः सन्ध्यारागप्रतीतिं जनयति। एवमुषसस्सर्वविशेषणैरन्वितं त्वत्पदमूलम्। तादृशपादमूलात्मकस्योषस उपगमे, चित्तनभोमण्डले यदा तस्योषस आविर्भावो भवति तदा लोक उपासकजनः प्रबोधोदयं ज्ञानरूपस्य प्रकाशस्योदयं लभते। समस्ताज्ञानध्वान्तमामूलमुत्सार्य, पुनरन्धकारस्यावकाशो यथा न भवति तथा ज्ञानभानुप्रकाशः तदानीमेव भवति यदा समस्तज्ञानस्रोतोरूपाया जगदम्बाया चरणकमलयोरनवरतानुसन्धानजनितसाक्षात्कारः चित्ते भवति। सर्वविद्याविशारदस्यापि साधनचतुष्टयसम्पन्नस्यापि देव्याः प्रसादेनैव ज्ञानोदय इति भावः।

(४७)

विद्यामुक्तिरमावधूषु नितरां कामातुरा मानवा-
स्तप्तास्त्वन्नखकान्तिचन्दनरसैरालिप्य गात्रं निजम्।
त्वत्पादाब्जरुचिप्रवालनिचिते भूमीतले शेरते
नित्यं देवि ! भवत् कृपाप्रियसखी विश्वासतः केवलम्॥

विद्यामुक्तिरमावधूषु कामातुरा मानवाः, ज्ञानेच्छया विद्यादेवतायाँ, मोक्षप्राप्तये मोक्षलक्ष्म्यामैश्वर्यलाभाय श्रीदेव्यां च काम-

परवशतां गता नराः तत्तदुपलब्ध्यै गुरुकुलवास-भिक्षाटनादीनि यमनियमप्राणायामादीनि कृषिवाणिज्यादीनि च यथाक्रममनुष्ठाय क्लेशपरम्परामनुभूय शारीरमानसतापान् भुक्त्वा अन्ते त्वन्नख-कान्तिचन्दनरसैः स्वगात्राण्यालिप्य तव नखप्रभा एव चन्दनवदति-शीतलातयालेपनं विधाय तापापनोदनं कुर्वन्ति। अर्थादैश्वर्यविद्या-मोक्षाणां प्राप्तये पुरुषकारमात्रं न पर्याप्तमित्यवबुद्ध्य देव्याः कृपाविशेषेणैव त्रयाणामपि प्राप्तिर्भवतीति निश्चित्य अथवा भगवत्याः कृपापीयूषपानस्य पुरतः त्रयोऽपि ते तुच्छा इति निश्चित्य, देव्याश्चरणयोश्शरणं गताः तत्रत्यनखमयूखा एव चन्दनरसास्तैर्निज-गात्राण्यालिप्य देव्याः पदाब्जयोः रुचिः कान्तिस्सैव प्रवालास्तरणं पदयोः शोणप्रभा एव शैत्योपचारोपयुक्ता प्रवालशय्या तादृशशय्या-निचिते आस्तृते भूमितले शेरते। तत्र निश्चिन्तं शयानानां तेषां किमवलम्बनमिति चेद्भवत्कृपाप्रियसखीविश्वासतः भगवत्याः कृपारूपा प्रियसखी नो नूनमभिगमिष्यतीति विश्वासेन शेरते। एतावत्पर्यन्तं कामातुरैरस्माभिरन्विष्यमाणा मोक्ष-विद्या-सम्पदादयः भगवत्याः कृपालक्ष्म्याः पुरतस्तुच्छा इति मत्वा वा, कृपाख्या सखी निष्प्रयासं मोक्षैश्वर्यविद्याभिधानां वधूनां संगमे य आनन्दः प्राप्यते ततोऽप्यधिकानन्दं प्रापयिष्यतीति विश्वासेन वा, तापत्रये-भ्यो मोचनं यद्विद्यामोक्षादिभिः प्रयत्नसाध्यं तदेव भगवत्याः कटाक्ष-लेशेन सुलभमिति मत्वा वा, मोक्षपर्यन्ताभ्यः कामनाभ्यो निर्विण्णा, भगवत्याः कृपामात्रमेवालं स्वाद्यतमं तयैव वयं कृतकृत्या भवेम इति चरणसेवारसमेव नित्यं काङ्क्षन्तः मोक्षमपि तृणाय मत्वा नित्यशान्तिमनुभवन्ति ॥

(४७)

मञ्जीरक्वणितैः क्षिपन्निव मुहुः श्रीमन्नखांशूद्गमै-
दैत्येन्द्रं प्रहसन्निवारुणरुचा रुष्यन्निवास्मै भृशम्।
धीरायां त्वयि निर्विकारमनसि त्वत्पाद एव स्फुटं
पुष्णन् वैरिविकारमेष महिषध्वंसो परित्रायताम् ॥

धीरायां त्वयि उद्वेगकारणेषु सत्स्वपि विक्रियारहितं स्थैर्य-मालम्ब्य तिष्ठन्त्यां त्वयि, एष त्वत्पाद एव मद्वर्णनाविषयभूतः चरण एव महिषासुरेण सह संग्रामावसरे सर्वं वैरिविकारं शत्रुविषयकं विकारजातं स्फुटं पुष्णन् स्पष्टं प्रदर्शयन् महिषध्वंसी महिषमर्द्दन-माचरन् तादृश एष पादः परित्रायतां मादृशं भक्तं रक्षतु। वैरिसहजा विकारास्सर्वे कथं देव्याः पदेन दर्शिता इति विवृणोति मञ्जीरेत्या-दिना। मञ्जीरक्वणितैर्मुहुः क्षिपन्निव मञ्जीरनादा एव वारं वारं शत्रुधिक्काराय प्रयुक्ता अधिक्षेपध्वनयः। श्रीमतां मनोहराणां नखांशूनां नखकान्तीनां धावल्यस्योद्गमैः प्रसारैः प्रहसन्निव शत्रुमप-हसन्निव राजते। अस्मै अरातये अरुणतया पदकमलस्य शोणप्रभया भृशं तीव्रं यथा तथा रुष्यन्निव रोषावेशमभिद्योतयन्निव वर्त्तते। एवं युद्धसमये शत्रुं प्रति ये ये क्रोधजनिता विकाराः प्रायेण दृश्यन्ते ते सर्वे सन्तुलितभावायां निर्विकारायां त्वयि न दृश्यन्ते किन्तु त्वपाद एवाभिव्यनक्ति। तादृशः पादः मां परित्रायतां मद्विषये कृपामृत-स्यन्दी भूयादित्यर्थ्यते ॥

(४८)

क्षिप्रं देवि शिरस्पदेन महिषं पिष्ट्वा ततोऽधः पदं
दित्सन्त्यां त्वयि कण्ठभञ्जनभिया कण्ठीरवे विद्रुते।
मेदिन्यामपि भीतिकम्पिततनौ प्रेमत्वराशालिना
शर्वेणैव निजाङ्कसीम्नि निहितं पादद्वयं ते जयेत् ॥

हे देवि ! शिरस्पदेन पादाग्रभागेन (पादस्याग्रभाग एवालमासी-न्महिषमर्द्दने) क्षिप्रं क्षणार्धेन महिषं पिष्ट्वा महिषं निर्मथ्य तत-स्तदनन्तरं पादं तन्मूर्ध्न उद्धृत्याधो दित्सन्त्यां निक्षेप्तुमिच्छन्त्यां त्वयि कण्ठभञ्जनभिया, असह्यप्रतापवानयं पादः कदाचिन्मम कण्ठ-मपि भञ्जयेन्निष्पेषयेदिति भिया कण्ठीरवे सिंहे विद्रुते पलायिते,

मदिन्यामपि भीतिकम्पिततनौ ममोपरि पादोऽयं न्यस्मते चेत्का गतिर्भविष्यतीति भीत्या वेपमानगात्रायां सत्यां, तत्पदं शर्वेणैव परमेश्वरेणैव प्रेमत्वराशालिना प्रेम्णा या त्वरा तच्छालिना प्रेम-वेगप्रचोदितेन निजाङ्गसीम्नि निजोत्संगतले निहितम् । अनन्यधार्यं पदं प्रेम्णा प्रगृह्य स्वोत्सङ्गे न्यस्तु परमेश्वर एव शक्तोऽभूत् । तादृशं पदं जयेत्सर्वोत्कर्षेण वर्तताम् ॥

(४९)

पूर्वं देवि पदाम्बुजेन महिषप्रध्वंसनाभ्यासतः
पश्चात्कुत्सितसुम्भदैत्यविजयोऽप्येवं कृतः किं त्वया ।
नो चेद्भाति कथं कुसुम्भविजयी पादाब्जदेशोऽयमि
त्यालापे गिरिशस्य तद्विजयते मन्दस्मितं देवि ते ॥

हे देवि ! पूर्वं प्रथमं पादाम्बुजेन महिषप्रध्वंसनाभ्यासतः पद-प्रहारेण महिषासुरस्य मर्द्दनं यत्कृतं तेनैवाभ्यासेन पश्चादनन्तरं कुसुम्भदैत्यस्य कुत्सितस्य निन्दितस्य सुम्भासुरस्य विजयोऽपि एवं रूपेण पादप्रहारेण किं कृतः सम्पादितः किम् ? मार्कण्डेयपुराणो-क्तरीत्या महिषासुर एव देव्या पदप्रहारेण निहतः, सुम्भस्तु खड्ग-प्रहारेण हतः । किन्तु कविनाऽत्र सुम्भोऽपि पादाघातेनैव निहत इति शङ्क्यते। तत्र हेतुरुच्यते नोचेदिति। नोचेदेवं कथमयं पादाब्जदेशः चरणकमलप्रान्तः कुसुम्भविजयी ? कथं कुत्सितसुम्भविजयी कुसुम्भाख्यस्य वृक्षस्य विजयीति प्रथां गतः ? रक्तवर्णयुतं द्रवं क्षीरं प्रस्रावयति कुसुम्भवृक्षः । लाक्षारसरञ्जितोऽयं पादः प्रस्रवद्रक्तद्रवं कुसुम्भवृक्षमतिशेते शोभया । अतः कु-सुम्भविजयोऽपि किं पादेनैव निर्वृत्त इति एवं प्रकारेण गिरिशस्यालापेन शिवकृतनर्मप्रसङ्गेन यन्मन्दस्मितं चाटूक्तिमभिनन्दन्त्या मुखे साधुवादद्योतकं यन्मन्द हसितं विकसति तद्विजयते लोकोत्कर्षेण विराजते ॥

(५०)

बिभ्राणेन मनोज्ञयावकरसं मञ्जुध्वनिं नूपुर-
श्लेषालङ्कृतिशालिना नखमणीजातप्रसादश्रिया।
एकेनैव पदेन देविमहिषध्वंसे महीयस्तरः
श्लोकोऽयं रचितस्त्वयेति विबुधास्संश्लाघनं कुर्वते॥

विबुधाः देवाः विद्वांसश्च संश्लाघनं कुर्वते तव श्लाघां कुर्वन्ति महिमान गायन्ति। भगवत्या महिषमर्दनव्याजेन काचिदपूर्वा काव्यरचना कृतेति प्रशंसन्ति। कीदृशं वैलक्षण्यं काव्यस्येति चेदेकेनैव पदेन महीयस्तरः श्लोकोऽयं रचितः। अन्ये कवयः कालिदासादयो नैकानां पदानां योजनेन रसात्मकवाक्यसमूहान् विरचय्य सर्गबन्धात्मकं काव्यं रचयन्ति। ततोऽपि महीयस्तरं सर्वलक्षणसंपन्नं चमत्कारातिशयजनकं सहृदयहृदयाह्लादकरं काव्यम् एकपदप्रयोगेनैव साधितं भगवत्या। अयं चमत्कारः महिषध्वंसे प्रदर्शितः। काव्यलक्षणानां कथं सन्निवेश इत्युच्यते बिभ्राणेनेत्यादिना। मनोज्ञयावकरसं बिभ्राणेन मनोहरं लाक्षारसं वहता। श्लोकपक्षे य-आ-व-क इत्यक्षराणां मनोज्ञरीत्या संघटनेन क्-आ व्-य इति काव्यपदवाचकत्वं भवति। तस्य रसः काव्यरसस्तं बिभ्राणेन। अभिधालक्षणाभ्यां व्यतिरिक्तः व्यञ्जनात्मकः रसध्वनिरेव यः काव्यात्मभूतः स एवात्र पादरूपे काव्येऽपि लाक्षारसरूपेण वर्त्तते। मञ्जुध्वनिं बिभ्रता काव्यविषये चित्ताह्लादजनकध्वनिविशिष्टः पादपक्षे नूपुरध्वनिं वहता। नूपुरश्लेषालंकृतिशालिना अलंकाररूपमञ्जीरघटितत्वाद् ध्वनिं कुर्वता। काव्यपक्षे श्लेषालङ्कारयुक्तेन तन्मूलाभिव्यञ्जननिष्ठध्वनिविशिष्टेनेत्यर्थः। पदशब्देन भगवत्याश्चरणं, सुप्तिङन्तवाच्यं पदमपि विवक्ष्यते। तदेव पदं रसध्वनिमभिव्यञ्जयत् काव्यलक्षणयुक्तं भवति। नखमणिभिः

नखा एव मुक्तामणयः तैर्जाता प्रसादश्रीः प्रसादात्मकधावल्य-गुणविशिष्टं चरणम् । श्लोकपक्षे प्रसाद गुणगुम्फितः । एवम् एकेनैव पदेन श्लोकरचनां सम्पादयन्ती विलक्षणं कवितासामर्थ्यं महिष-मर्द्दनव्याजेन दर्शितवतीति विबुधा दिविषदः विशिष्टा सहृदया वा श्लाघन्ते ॥

(५१)

त्वं शंभोर्महिषी भवस्यगसुते तेनोपहासाय ते
दैत्योऽयं महिषीभवन्नुपगतस्सोऽयं कथं क्षम्यते ।
इत्थं नूपुरनिस्स्वनैरिववदन् पादस्त्वदीयो रुषा
शस्त्रप्रग्रहणात्पुरैव महिषं पिंषन् परित्रायताम् ॥

त्वदीयः पादः नूपुरनिस्स्वनैरित्थं वक्ष्यमाणप्रकारं वदन् रुषा कोपावेशेन शस्त्रग्रहणावसरमदत्वैव शस्त्रादानविलम्बमप्यसह-मानः महिषं पिंषन् महिषासुरं पिष्टवान् तादृशः पादः मां परित्रायताम् । अभयमुद्राग्रहणाय करस्य समयमदत्वैव मां झटिति त्रायताम् । ईदृशी त्वरा पादस्य कथमिति तन्नूपुरारावद्वारा कथयति स्म । त्वं देवि शंभोर्महिषी भवसि । हे अगसुते हिमवत्पुत्रि ! तेन कारणेनोपहासाय ते त्वामुपहसितुं व्यवसितोऽयं दैत्याधमः । महिषी मृगविशेषवाचीति कृत्वा अयं दैत्यः महिषीभवन्नुप-गतः महिषाकारतां स्वीकुर्वन्नुपससर्प । महिषो भवामि यतो मामियं स्वीकरिष्यतीति भ्रान्त्या त्वच्चारित्रनिष्ठामजानन्नागतः कथमयं क्षणमात्रमपि क्षम्यत इति नूपुररवैर्वदन्, स्वस्वामिनीं प्राकृतपशु-वदुपहसन्तं दैत्यं चरण एव पिष्टवान् ।

(५२)

देव्या पङ्कशयोऽद्य कोऽपि महिषच्छद्मा महान्कण्टकः
पादेनाहत इत्युदूढहसितं सख्या समावेदिते।
सद्यःकण्टकशालिना करतलेनासाद्य पादाम्बुजं
गृह्णन्नार्तिविनोदनाय गिरिशो जीयात्प्रियस्ते शिवे॥

पङ्कशयः कोऽपि महिषच्छद्मा महान् कण्टकः पङ्के निमग्नः कोप्यलक्षितः तीक्ष्णः कण्टकः देव्या पादेनाहतः कण्टकविद्धं देव्या पादमिति महिषमर्दनलीलां व्याजोक्त्या कथयन्ति सख्यः शिवसन्निधौ। सखीभिः सह स्नातुं गताया नायिकायाः जलान्तर्गतेन कण्टकेन यदि पादो विद्धो भवति तर्हि गृहं प्रत्यागत्य तत्संभवं पत्युर्यथा निवेदयन्ति तथा देव्याः सख्यः ऊढहसितं हासमप्रकटयन्त्यः "कथमयं वार्तामिमां श्रुत्वा कण्टकवेधनं यथार्थं मन्वानः प्रतिक्रियां करिष्यति" इति परीक्षितुं ततः परिहसितुं चेच्छया व्याजोक्त्या निवेदयन्ति। सद्यस्तदानीमेव कण्टकशालिना करतलेन पादाम्बुजमासाद्य संभ्रमजनितपुलकपूरितेन करेण प्रियायाश्चरणकमलं प्रगृह्य आर्त्तिनिवारणाय कण्टकवेधव्यथामपोहितुं कृतत्वरः, कण्टकेनैव कण्टकमुद्धरणीयमिति न्यायेन पुलकाकारैः कण्टकैः परिकरायितैः समर्थे करे तत् पादाम्बुजं निवेशयन् स ते प्रियः कान्तः जीयात् लोकोत्कर्षेण विराजते॥

(५३)

त्वत्पादाङ्गुलिपल्लवैरगसुते देवि स्वयं पञ्चभिः
पञ्चत्वं गमितो महासुर इति स्वात्मानुरूपं कृतम्।
एतैरेव नतो जनस्त्रिदशतां नीतो महेशः पुन-
र्लक्षत्वं गमितः प्रसूनधनुषो विस्मापनं तद्वयम्॥

हे अगसुते पार्वति! देवि स्वयं पञ्चभिः देहमात्रेण स्वयं

पञ्चभिः आत्मनः पञ्चभिराकारैस्त्वत्पादाङ्गुलीभिः महासुरः महिषासुरः पञ्चत्वं गमितः मारितः इति एतत् स्वात्मानुरूपं कृतम्। पञ्चाङ्गुलीभिः पञ्चत्वं प्रापितं इत्यत्र सामञ्जस्यं वर्त्तते। एतैरेवाङ्गुलीभिः नतो जनः पुरतः शरणं गतः जनः त्रिदशतां नीतः देवत्वं नीयते त्रिंशत्संख्यात्वं वा नीयते। महेशः पुनः प्रसूनधनुषो पुष्पधन्वनो मदनस्य लक्षतां बाणलक्ष्यतां लक्षसंख्यात्मतां वा गमितः। एतद्द्वयमपि विस्मापनं विस्मयावहमस्ति। पञ्चाङ्गुलयः पञ्चत्वं नयन्तीति उचितमेतत्। किन्तु तेषां त्रिदशत्वनयने त्रिंशद्गुणफलोत्पादने लक्षगुणनिष्पादने च या क्षमता सा विस्मयमुत्पादयति। प्रत्येकमङ्गुल्याः प्रभावः षड्गुणो भवति। षड्विकाराः 'जायते वर्धते' इत्यादयः। तेषां षण्णां विकाराणामभावः त्रिदशानां देवावस्थायाम्। षड्विकारस्वभावानां नतजनानां त्रिदशत्वं च विरोधाभासः। पञ्चानां त्रिदशत्वोत्पादनं च विरोधः। पञ्च एव कामबाणाः लक्षत्वं च जनयन्तीत्याश्चर्यम्।

(५४)

ब्राह्मं माघवनञ्च वाहनमहो मन्दैर्गतैर्निन्दितं
धावल्येन नखत्विषा विहसितो वाहोऽपि माहेश्वरः।
इत्थं वाहनवैरितां भजति ते पादस्ततो मन्महे
कात्यायन्यमुना न्यघानि महिषः कात्तान्तवाहभ्रमात्॥

हे कात्यायनि! कतस्यापत्यं स्त्री कात्यायनी। कतनाम्नो मुनेः पुत्रीत्वेनावतीर्णा देवीति पुराणप्रथा। ब्राह्मं माघवनं च वाहनं ब्रह्मणो वाहनं ब्रह्मणो वाहनभूतं हंसमिन्द्रस्य वाहनं गजं च हंसगमना गजगामिनीति प्रथाहेतुभूतैर्मन्थरगमनैर्निश्चितमधरीकृतवती पराजितवती। नखत्विषा नखानां धावल्येन माहेश्वरो वाहोऽपि शिवस्य वाहनभूतो वृषभोऽपि विहसितः पराजितः परिहासास्पदं प्रापितः।

इत्थमनेन प्रकारेण वाहनवैरितां भजति ते पादः। देवतान्तराणां वाहनानां जिगीषा देव्याः पादस्य स्वाभविकीव भाति। अत एवामुना पादेन महिषः महिषासुरः कार्त्तान्तवाहनभ्रमात् कृतान्तो यमस्तस्यायं कार्तान्तः यो वाहनः महिषस्तद्भ्रमात् दैत्यं यमस्य वाहनमिति विचिन्त्य निहितवतीति मन्महे अनुमन्यामहे।

(५५)

सीमन्तप्रकरे सुरेन्द्रसुदृशां सिन्दूररेखात्मना
माणिक्यद्युतिसंज्ञयैव मुकुटीकोटीषु दैत्यद्रुहाम्।
शंभोर्मूर्ध्नि जटाघटारुणरुचिव्याजेन पादप्रभै-
वैका ते परिणाममेति करुणामूर्त्ते गिरीन्द्रात्मजे॥

हे कारुण्यमूर्त्ते गिरीन्द्रात्मजे! करुणामयि पार्वति! एका ते पादप्रभैव तव पदकमलशोभा एकैव वक्ष्यमाणरीत्या परिणमति विविधाकारेण। सुरेन्द्रसुदृशां देवराजस्य स्त्रीणामप्सरसां सीमन्तप्रकरे शिरोमध्यस्थकवरीविभाजनस्थाने सिन्दूररेखात्मना माङ्गल्यसूचकसिन्दूरतिलकाकारेण परिणमति। दैत्यद्रुहां मुकुटीकोटिषु दैत्याः द्रुह्यन्त एभ्य इति तेषां देवानां किरीटाग्रेषु माणिक्यद्युतिसंज्ञयैव विराजते। चरणयोः प्रणमतां दिविषदां मुकुटाग्रेषु देव्याश्चरणयोः शोणिमा यः प्रसरति स एव माणिक्यकान्तिभ्रान्तिमुत्पादयति। माणिक्यशोभा इति संज्ञां भजति पादोद्गतः अरुणिमा। सैव पादप्रभा शंभोर्मूर्ध्नि प्रणयकलहावसरे देव्याश्चरणयोः पतितस्य शिवस्य शिरसि जटाघटारुणरुचिव्याजेन कपर्दवन्धस्य या अरुणरुचिश्शोणप्रभा तद्व्याजेन जटामण्डलारुण्यमिषेण राजते॥

(५६)

नो केशः परमाश्रयस्सुमनसां पादाब्जरेणुश्च ते
नो मन्दारसिता परं स्मित रुचिर्मञ्जीरयोश्चद्वयी ।
नो बाहुः कलहंसमेत्य जयति त्वद्यानलीलाप्यसौ
नो शुम्भत्तरलाक्षमाननमिदं पादाम्बुजं चाम्बिके ।।

हे आम्बिके ! तव केशः परं सुमनसां केवलमाश्रयः चूडालंकारोपयुक्तानां कुसुमानामेवाश्रयः। किन्तु ते पादाब्जरेणुश्च पदकमलपरागस्तु सुमनसां देवानामाश्रयो भवति। उत्तमाङ्गवर्त्तीति केशस्य यद्गौरवं वर्त्तते येन सुमनोभिर्मण्डनाय योग्यो भवति ततोऽप्यधिकं गौरवं पादाब्जरेणोरस्ति यतः पादाब्जरेणुः सुमनसां देवानामाश्रयः। नो परं न केवलं स्मितरुचिर्देव्या मन्दस्मितशोभा मन्दारसिता मन्दारकुसुमवद्धवला किन्तु मञ्जीरयोश्च द्वयी पदघटितौ मञ्जीरावपि मन्दम् आरसितौ मञ्जुलनादमुद्भाव्यमानौ वर्त्तेते। मन्दस्मितं मुखावयवस्थितमतो मन्दारसितमिति न तस्य गर्वस्यावकाशः। पदघटितौ मञ्जीरौ द्विगुणं मन्दारसितत्वं वहतः। नो बाहुः न केवलं तव करः कलहं समेत्य जयति दैत्यैस्सह युद्धं कुर्वन् विजयश्रियं भजते परन्तु असौ त्वद्यानलीलाऽपि तव यानमेव लीला गमनरूपः लीलाविशेषः कल-हंसमेत्य कलहंसं प्रतिद्वन्द्विनं कलहे प्रतियोगिनं समेत्य तं जयति। कलहंसगमनमभिभूय ततोऽप्यधिकां शोभां वहति ते अलसगतिः। ते इदमाननं नो शुम्भत्तरलाक्षं शोभमानौ तरलौ विलासयुतावक्षिणी यस्य तत् चञ्चलनेत्रद्वयशोभावहं विराजते किन्तु ते पादाम्बुजमपि शुम्भत्तरं लाक्षं यस्मिन् तत् ततोऽप्यधिकं शोभमानलाक्षारसरञ्जितं विराजते। एवं देव्या वदनगताः सौन्दर्यांशाः सर्वेऽप्याननादप्यधिकगौरवेण पादाम्बुजे वर्त्तन्त इति भावः। मुखकमलादपि पदकमलमेवाराध्यतरमिति ध्वनिः।

(५७)

नाथे तावकवाहसिंहचकितास्त्वत्पादमूले नता
नूनं बभ्रमुरभ्रमुप्रियमुखा दिक्कुम्भिवीराश्चिरम् ।
नो चेदेष कथं तदुन्नतशिरस्सिन्दूरसन्दोहजो
रागस्ते चरणाम्बुजे परिणमन्नद्यापि विद्योतते ॥

हे नाथे ! त्वत्पादमूले नताः अभ्रमुप्रियमुखाः अभ्रमुरैरावतस्य स्त्री तत्प्रियः इन्द्रहस्ती तन्मुखाः ऐरावतप्रभृतयो दिक्कुम्भिवीराः दिग्गजवर्याः तावकवाहसिंहचकिताः तव वाहनभूतान्मृगेन्द्राच्चकिताः भीतभीताः त्वत्पादमूले नताः भगवत्याश्चरणोपान्ते नमन्तः तत्रैव चिरं नूनं बभ्रमुः सम्भ्रान्तास्सन्तः चिरकालं यावत् बभ्रमुरित्यूह्यम् । किं प्रमाणं तत्र ? नो चेदेवं नाभवच्चेत् कथमेष तदुन्नतशिरस्सिन्दूर सन्दोहजो रागः तेषां दिग्दन्तिनामुन्नतशिरस्सु वर्तमानः सिन्दूरस्य संकलितो रागः अरुणिमा ते पदाम्बुजे परिणमन् संक्रम्य संस्थितः अद्यापि बहुकालानन्तरमपि विद्योतते शोभते। तेषां गजानां विशालोन्नतमस्तकस्थितः सिन्दूररागपटलः कालान्तरेऽपि भगवत्याः पदयोर्विराजते । सिंहाद्भीताः गजाः देव्या नमस्कारानन्तरमन्यत्र गन्तुमधैर्येण तस्या पादप्रान्त एव बभ्रमुः। चिरकालसंगमेन मस्तकस्था सिन्दूरच्छाया गाढं पदयोस्संक्रमिता चेत्यनुमितिः ॥

(५८)

त्वत्पादोऽयमजाश्रितश्च रुचिरस्पर्शान्वितो योगिना-
मन्तस्थाकृतिरूष्मभाक्चमहिषप्रध्वंसनप्रक्रमे ।
एवं खल्वखिलाक्षरात्मकममुं शैलेन्द्रकन्ये कथं
भाषन्ते नतवर्गबन्धुमपवर्गालम्बनं चाम्बिके ॥

हे शैलेन्द्रकन्ये अयं त्वत्पादः पूर्वोपवर्णितश्चरणः सकलाक्षरप्रपञ्चात्मकोऽपि विराजते। कथमिति चेदजाश्रितः अजः ब्रह्मा

तस्याश्रयः अथवा अचां अच्संज्ञकानां स्वराणामाश्रयः। अकारादि क्षकारान्ताः सर्वे वर्णाः बीजाक्षराः देवीवाचका इति मन्त्रशास्त्रे प्रसिद्धम्। रुचिरस्पर्शान्वितः मार्दवत्वात्सुखस्पर्शावहः। ककारादारभ्य मकारान्तैः पञ्चविंशतिस्पर्शवर्णैरन्वितः। योगिनां चित्तकमले सदा सन्निधत्त इति हेतोरन्तःस्था आकृतिः यस्य सः देव्याः पादः। अन्तःस्थसंज्ञकानामाकृतिः यरलवानामाकृतिर्यस्य पादस्य। महिषप्रध्वंसनप्रक्रमे महिषासुरध्वंसनोद्यमे ऊष्मभाक् शौर्योष्णमावहति अथवा श ष स इति ऊष्मवर्णास्त्रयोऽपि भजन्ति अथवा शषसवर्णात्मकं भवति पदम्। एवमक्षरसमाम्नायरूपं खलु ते पदम्? तथापि कथमेनं नतवर्गबन्धुं त थ द ध न इति तवर्गस्य बन्धुर्नभवतीति भाषन्ते? नतानां वर्गाणां प्रणमतां भक्तानां बन्धुरिति विरोधपरिहारः। एवमेव अपवर्गास्पदं प फ ब भ म इति पवर्गस्यास्पदं न भवतीति भाषन्ते? अपवर्गस्य मोक्षस्यास्पदमिति विरोधाभासपरिहारः।

(५६)

उन्मीलन्नखमण्डलोहिमकणश्शोणप्रभागैरिकं
बिभ्राणः परिशोभमानकटको भूयोवनैकाश्रयः।
गायत्सिद्धवधूनिषेविततलः पादस्त्वदीयश्शिवे
राजत्येष हिमाद्रिपादवदिदं युक्तं हिमाद्रेस्सुते॥

हे हिमाद्रेस्सुते! एष ते पादः हिमाद्रिपादवद्यच्छोभते तद्युक्तं घटते। कारणगुणाः कार्येऽवश्यं संक्रमन्ति। पितुर्गुणाः दुहितरि दृष्यन्त एव। उन्मीलन्नखमण्डली विस्फुरन्नखसमूह एव हिमकणः। शोणप्रभा एव गैरिकम् अरुणच्छायैव गिरिधातुस्रवणं तद्बिभ्राणः। परिशोभमानकटकः पादपक्षे दीप्यमानमञ्जीरः पर्वतपक्षे प्रकाशमानाभिरुपत्यकाभिरन्वितः। भूयो वनैकाश्रयः पर्वतः भूयसां वनानामेकाश्रयः बहुप्रकारेणावने रक्षणकृत्ये एकाश्रयः अनन्यसाध्यं रक्षाकृत्यं नाना-

प्रकारेण निर्वहतीति भावः। गायत्सिद्धवधूनिषेविततलः गायन्तीभिः सिद्धाङ्गनाभिर्निषेवितं तलं कटकभागः अथवा पादतलम् यस्य सः। एवं सर्वप्रकारेण पर्वतपादनिष्ठान् गुणान् वहत् देव्याः पदं पर्वतपुत्र्या श्चरणरूपोऽवयवः॥

(६०)

दिक्पालैर्दशभिः पृथक् पृथगयं त्वत्पादयोरर्पितो
दृश्यो भक्त्यनुराग एव दशधा शोणांगुलिश्रीमिषात्।
पादाभ्यामपि तान् प्रति प्रकटिता नूनं प्रसादाङ्कुराः
दृश्यन्ते नखकान्ति पङ्क्तिदशकव्याजेन शैलात्मजे॥

हे शैलात्मजे दशभिर्दिक्पालैः दिगीशैर्दशभिः पृथक् पृथक् यो भवत्यनुरागः भक्तिप्रयुक्तोऽनुरागः श्रद्धाविशेष एव दशधा विलसति शोभांगुलिश्रीमिषात् देव्याः अरुणाङ्गुलिशोभाव्याजेन। दशानां दिक्पालानामनुरागः दशांगुलिशोणप्रभायिता विराजन्ते। तस्यानुरागस्य पङ्क्त्यां प्रकटितः प्रसादः दशधा नखकान्ति पङ्क्तिनखव्याजेन अङ्कुरयति। रक्ता अङ्गुलयः नमद्दिक्पालानामनुरागेण, तेषु प्रसादोन्मुखौ पादौ नखधावल्यमिषेण प्रसादं चानुभावयन्ति॥

(६१)

मेघानां कुलिशस्य चाप्रतिहता धाराः क्रमन्तां चिरम्
नो नश्येन्मदद्दानवारिविभवो नाकस्य नागस्य च।
पुत्रोऽयं मम सैनिकाश्च दधतां नित्यं जयन्तस्सुखं
त्वत्पादाम्बुजपातिनस्सुरपतेरित्थं जयन्त्यर्थनाः॥

अष्टभिः श्लोकैरिन्द्राद्यैर्दिक्पालैः देव्याः पदयोः प्रणामावसरे किं प्रार्थ्यंत इति वर्णयति। मेघानां धाराः वर्षधाराः कुलिशस्य च

धारा वज्रायुधस्य तीक्ष्णाग्राश्च अप्रतिहता: क्रमन्तामव्यवहिता: प्रचलन्ताम् । "यज्ञाद्भवति पर्जन्य:" इत्युक्तरीत्या लोके मखा अधिकाधिकं प्रवर्तन्तां येन तुष्टोऽहं मेघै: वर्षधारा उत्पादयाम्यविच्छिन्नतया । ममायुधस्य धारा प्रहरणशक्तिरप्यकुण्ठिता स्यात् साधुद्रुहां रक्षसामपहत्यै । मददानवारिविभव: नाकस्य नागस्य च न नश्येत् । भगवत्या: कृपया स्वर्गस्य मदोत्पादकानां वारीणां सोमरसानां प्राचुर्यं सौलभ्यं वा न नश्येत् । लोके यागा: प्रवर्तन्तामनवरतं येन स्वर्गस्था: सदा सोमपायिनो भवेम । नागे मदीयवाहनभूते ऐरावते मदजनितदानवारि मदजलविभव: न नश्येदर्थात् गजो मम सदा मत्त: यौवनमनुभवतु । पुत्रोऽयं मम सुत: जयन्ताख्य: मम सैनिकाश्च जयन्त: युद्धे विजयिन: नित्यं सुखं दधतां सुखिनो भवन्तु । इत्थमुक्तप्रकारेण त्वत्पादाम्बुजपातिन: देव्या: पदयो: प्रणमत: सुरपतेरर्थना: जयन्ति ॥

(६२)

आज्यासक्तकरैर्द्विजन्मभिरहं हूयेय नो दानवै:
स्वाहारोचितमस्तु पार्श्वमनिशं तादृक् च हव्यं लभे ।
रक्षावानिति भूतिमानिति च मे शब्दप्रसिद्ध्या शिवे
नोपेक्ष्योऽहमिति त्वदंघ्रिनमने जीयासुरग्नेर्गिर: ॥

आज्येन आसक्तकरैर्द्विजन्मभि: घृताक्तपाणिभि: ब्राह्मणैर्यायजूकैरहं हूयेय आज्याहुतिभिर्हवनमयमाराधनं त्वत्प्रसादेन लभेय न तु आजौ युद्धे आसक्तकरै: उद्यतकरैर्दानवै: युद्धाय आहूतो मा

भवेयम्। मे पार्श्वं वामभागः सदा स्वाहारोचितमस्तु मत्पत्न्या स्वाहादेव्या सर्वदाऽलङ्कृतं स्यात्। तादृक् हव्यं स्वाहारोचितं स्वाहाकारेण मुखरितं हव्यं च सदा लभे येन तृप्तो भवेयम्। रक्षावान् भूतिमानिति मे शब्दप्रसिद्ध्या रक्षितोऽयं पूर्वमेव न तस्य रक्षाया आवश्यकता, भूतिमानयं न तस्यैश्वर्यस्य लिप्सा इति मदीय नामसकेताभ्यां निर्णीय उपेक्ष्योऽहं न त्वया। वस्तुतः उभे ते मम प्रथे मम दाहकत्वजनिते न तु रक्षितोऽस्मि न वा भूतिमान् स्यां भगवत्याः कृपां विना। अथवा मम रक्षावत्त्वप्रसिद्ध्या भूतिमत्त्वप्रसिद्ध्या च सर्वथा नोपेक्ष्योऽहम्। ते अनवरतं मयि सार्थकाः विराजेताम् एवं तव पादप्रणमनावसरे अग्निदेवतायाः गिरः जीयासुः॥

(६३)

त्वद्भक्ताघमबुद्धिपूर्वलिखितं स्याच्चेत्क्षमेथाश्शिवे
कान्तस्ते मयि रोषवान् कुरु पुनस्तस्यार्द्रभावं शनैः।
देवि त्वं महिषाभिहन्त्रिचकितं त्रायस्व मे वाहनं
कालस्येति जयन्ति ते पदनतौ लोलस्य संप्रार्थनाः॥

हे शिवे त्वद्भक्ताघं तव भक्तैः कृतं पापमबुद्धिपूर्वकं भक्तास्ते इत्यविचार्य लिखितं मम गणनपट्टिकायां भ्रमेण लिखितं पुण्यपापपरिगणनायां मया यदि प्रमादाल्लिखितं तत्क्षमेथाः। भक्तैरबुद्धिपूर्वकं कृतमित्यप्यन्वयः। तव भक्ताः कदाऽपि बुद्धिपूर्वकं पापं नाचरन्ति कदाचिदबुद्धिपूर्वमाचरितं चेत्तन्न मया परिगणनीयम्। यदि परिगणितं तत्क्षमेथाः। ते कान्तः शिवः मयि रोषवान् मृकण्डुपुत्रत्राणावसरे मय्यतीव रुष्टः। अतः शनैः वारं वारं मां प्रति

पुनरार्द्रभावं कुरु मयि कृपामुत्पादय तस्य मनसि। त्वं महिषाभिहन्त्रीति हेतोर्मे वाहनं महिषः चकितं त्वत्तोऽतीव भयमनुभवति। तन्मे महिषवाहनं त्रायस्व तस्याभयदानं कुरु। एवं कृतापराधवत्तव पदनमनलोलस्य भीतभीतस्य क्षमां याचतः कालस्यान्तकस्यसं प्रार्थनाः जयन्ति।

(६४)

धर्माचारपरोऽहमित्यवमतो रक्षोभिरेकान्वयै-
र्मह्यं देवि विनिन्दितां दिशमदुर्जातिद्विषश्चामराः।
दैवादित्युभयच्युतो विशरणो रक्ष्योऽहमित्यादय-
स्त्वत्पादप्रणतौ जयन्ति निऋतेरत्याकुलाः प्रार्थनाः॥

निऋतेः दक्षिणपश्चिमदिक्कोणाधिपस्य अत्याकुलाः अतीवदैन्यपारवश्यद्योतकाः प्रार्थनाः जयन्ति। का सा दीनता इति वर्णयति धर्माचारेत्यादिना। धर्माचारपरोऽहमिति धर्मे आचारे च निष्ठावानस्मीति एकान्वयैः रक्षोभिः अस्माकं कुले जातोऽप्ययं कुलोचितामधर्मे रतिं वा अनाचारेषु प्रतिपत्तिं वा न वहति अस्मच्छत्रूननुकरोतीति अभ्यसूयद्भिरवमतो अवमानितोऽस्मि। जातिद्विषः अमरास्तु निजपरजातिभेदवादिनो देवाः मां दैत्यान्वये जात इति हेतुना द्विषन्तः मह्यं विनिन्दितां मंगलकार्याणामाचरणायानर्हां कुत्सितां दिशं दक्षिणपश्चिमदिक्कोणाधिपत्यं ददुः। एवं स्वकीयैः परकीयैश्चावमतः दैवाद्दुर्दैववशादुभयच्युत उभयभ्रष्टः विशरणः कुत्रापि सम्मानमलभमानः अनन्यशरण्यया त्वया एव रक्ष्यः

पालनीयः इति निरूतेः त्वत्पादप्रणमनावसरे अत्याकुलाः प्रार्थनाः जयन्ति ॥

(६५)

मत्पुत्र्या मम वा मुकुन्दगृहताभाग्यं न संक्षीयतां
माऽहं पायिषि कुम्भजेन मुनिना कल्पान्तसूर्येण वा ।
द्वेधा मे सुरवाहिनीदयितता साधु त्वया रक्ष्यतां
त्वत्पादाम्बुजपातिनो जलपतेरित्थं जयन्त्यर्थनाः ॥

पश्चिमाशाधिपो वरुण इत्थं निवेदयति—मत्पुत्र्याः सागरसंभवाया लक्ष्म्या मुकुन्दगृहताभाग्यं मुकुन्दस्य विष्णोर्गृहिणीस्थानरूपं भाग्यं कदापि न संक्षीयताम् । विष्णुपत्नीत्वं स्थिरं भूयात् । ममाऽपि मुकुन्दस्य विष्णोर्गृहता वासस्थानयोग्यता न संक्षीयताम् । सर्वदा विष्णुर्मय्येव शेषतल्पे वसतु । कुम्भजेन मुनिना मा पायिषि अगस्त्यमुनेराचम्यतां नाऽहं पुनरनुभवेयम् । पुरा मां निपीय कुम्भसंभवः निर्जलं मां कृतवान् । पुनरेवं मा भूत् । कल्पान्तसूर्येण च नाऽहम् अपायिषि सर्वसंशोषकः द्वादशात्मा प्रलयकालसूर्यः मां न शोषं नयेत ? मे मम सुरवाहिनीदयितता द्वेधा साधु रक्ष्यतां त्वया । सुरवाहिन्याः देवसेनायाः नायकत्वं सुरवाहिन्याः स्वर्गङ्गायाः भर्तृत्वमेवं द्वेधा सुरवाहिनीदयितता सम्यक् रक्ष्यताम् । इत्थं त्वत्पादाम्बुजपातिनोऽपां पतेः प्रार्थनाः जयन्ति ॥

(६६)

विश्वप्राणमयी त्वमेव मम तु प्राहुर्जगत्प्राणतां
सर्वस्यापि सदागर्तिहि भवती मामेवमाहुर्जनाः ।
लज्जापादकमीदृशं जननि नः किं कुर्महे पाहि मा-
मित्येवं पवनस्य ते पदनतौ वाचो जयन्त्याकुलाः ॥

पश्चिमोत्तरदिक्कोणेशो वायुर्भगवतीं प्रणमन् आकुला वाचो या वदति ताः जयन्ति । आकुलत्व वाचां वर्णयति विश्वप्राणेत्यादिना । विश्वप्राणमयी त्वमेव समस्तस्य प्रपञ्चस्य प्राणस्वरूपिणी मूलप्रकृतिरूपा त्वमेव । किन्तु मम जगत्प्राणतामाहुः जगतः प्राणभूत इति मां वदन्ति । भवती सर्वस्यापि सदागतिः सर्वस्य जगतः सदाकालं प्राप्यस्थानम् । सर्वं जगत्त्वय्येव लीयते । अथवा सर्वप्राणिनां शरण्या । किन्तु मां सदागतिरित्याहुः सदा गमनशीलत्वात् सदागतिरिति वायोर्नामान्तरम् । आवयोरसमानयोरपीदृशं नामसाम्यं लज्जापादकं मयि ह्रियमुत्पादयति । अत्यन्तमनर्होऽहं त्वन्नाम्ना निर्देश्यो भवामीति लज्जा मां खेदयति । तत्र किं कुर्महे अनीशोऽस्मि नामव्यवहारं रोद्धुम् । गर्ववशात् धूर्तोऽयं स्वेच्छया मदीयां कीर्त्तिमात्मसात्कर्तुं व्यवस्यतीति मामन्यथा मा चिन्तय । नायं ममापराधः । मां पाहि त्रायस्वेत्येवम् आकुलाः भीतिद्योतिकाः वाचः जयन्ति ॥

(६७)

शङ्खोल्लासिगलोज्ज्वले समकरे पद्मेन कुन्दस्मिते
पादाग्रादृतकच्छपे मुखमहापद्मे मुकुन्दाश्रिते ।
इत्यस्मन्निधिगात्रि नीलनयने खर्वात्मिके पाहि मा-
मित्थं पादनतिश्शिवे विजयते सख्युः कुबेरस्य ते ॥

अधुना उत्तराशाधिपस्य कुबेरस्य प्रार्थनाप्रकारः प्रस्तूयते। शंखवदुल्लासि शंखाकारतां वहद्गलेन कण्ठेनोज्ज्वले शोभमाने! कम्बुग्रीवत्वाच्छंङ्खनिधिरेव भगवत्याः कण्ठाकारतां प्राप्त इत्युत्प्रेक्षा। पद्मेन समकरे कमलसाम्यं भजन्तौ कोमलौ करौ यस्यास्तस्याः सम्बुद्धिः। समकरे मकरनिधिना सह विराजमानेत्यपि द्योतयति। कुन्दस्मिते कुन्दपुष्पवदतिधवलं स्मितं यस्यास्तस्याः संबुद्धिः। निधिपक्षे कुन्दाख्यो निधिरेव देव्याः मन्दस्मिताकारतां वहतीति व्युत्पत्तिः। पादाग्रादृतकच्छपे पादाग्रेण आदृतः कच्छपः यया, कूर्मपृष्ठेन साम्यं वहता पादाग्रेण कच्छपस्सम्मानितो भवति। अथवा कच्छपनिधिमेव पादाग्रेण वहन्ती तस्मै निधित्वगौरवं ददाति। मुखमहापद्मे मुखाकारं महापद्मं विकसत्कमलं दधाना। निधिपक्षे महापद्माख्यो निधिरेव देव्या मुखरूपेण परिणत इति व्युत्पत्तिः। नीलनयने नीलवर्णं नयनं यस्याः सा तस्यास्संबुद्धिः। नीलाख्यं निधिं नयने दधाना। "महापद्मश्च पद्मश्च शंखो मकरकच्छपौ। मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव" इत्यमरः। खर्वात्मिके इतिस्थाने चर्चात्मिके इति पाठो दृश्यते। चन्दनादिसुगन्धिद्रव्यलेपनालंकृतेत्यर्थः। किन्तु नवसु निधिषु अन्येषां अष्टानामपि नामग्रहणं कृत्वा नवमस्य खर्वस्योल्लेख एवात्र साधु भाति। खर्वात्मिके खर्वनिधिं शरीरे वहमाना अथवा त्रिभंगुरशरीरशोभां वहतीति खर्वात्मिका। इत्येवं नवनिधीन् तत्तदवयवाकारेण वहन्तीति हेतोः अस्मन्निधिगात्रि! इति कुबेरकृता संबोधना। नवनिधिमयं गात्रमस्या इति तस्यास्संबुद्धिः। मां पाहि इति ते सख्युः कुबेरस्य, ईशानसुहृदिति कृत्वा शिवपत्न्या

अपि सखित्वं कुबेरस्य। इत्थं वदतः कुबेरस्य तव पादयोर्नति-र्विजयते ॥

(६८)

सन्नामेषु भवत्पदाम्बुजनखच्छायां जटासङ्गिनीं
गंगेत्यादि जना वदन्ति वितथं मा भूर्मुधा कोपिनी।
दृष्टिर्मय्यपि दीयतां परुषमप्येकं वचो दीयता-
मीशानस्य भवानि ते पदनताविथं जयन्त्यर्थनाः ॥

ईशानः भगवत्याश्चरणयोर्नमन्नेवं निवेदयति—सन्नामेषु मया भगवत्याः कृतेषु पुरतः कृतासु प्रणतिषु भवत्याः पादाम्बुजनखच्छायां चरणतलकान्तिं जटासंगिनीं मन्मस्तकस्थजटावलयेषु संगिनीमभि-व्याप्तां दृष्ट्वा आलीजनाः सखीजनाः गंगेति वितथं वदन्ति। मम शिरसि भवत्यास्सपत्नी स्वर्धुनी वर्त्तत इति पैशुन्यबुद्ध्या मिथ्या-पवादं कुर्वन्ति। तच्छ्रुत्वा मुधा कोपिनी मा भूः विना कारणं मयि रोषं मा कुरु। अयि प्रिये मयि दृष्टिर्दीयतां पराङ्मुखतां त्यक्त्वा मामीक्षस्व। परुषमपि एकं वचः कुत्सात्मकमप्यस्तु तव भाषणं किन्तु तन्मां प्रत्यभिधीयताम्। हे भवानि पदनतौ तव पदयो-र्नमस्कारं कुर्वतः ईशानस्य इत्थंभूताः प्रणयप्रार्थनाः जयन्ति लोकोत्कर्षेण वर्तन्ते ॥

(६९)

नाभीतोऽभवमादितस्तव बलात्पश्चादभीतोस्म्यहं
त्र्यक्षेण त्रिमुखीकृतोऽपि चतुरास्योऽहं तवैव स्तवैः।
त्वं विश्वात्मतयोपजन्य न पुनः स्रष्टारमाख्याहि मा-
मित्थं देवि जयन्ति ते पदनतौ वाणीपतेर्वाणयः ॥

वाणीपतेश्चतुर्मुखब्रह्मण: वाणय: भणितय: ते पदनतौ तव पदयो: प्रणमने उदीर्यमाणा: जयन्ति। कीदृशा वाणय इति विवृणोति नाभीत इत्यादिना। आदित: नाभीत: नाभीतोऽभवम्। आदौ विष्णुनाभिप्रदेशाद्यदा अभवं तदानीमेव न अभीत: अभवम्। नारायणस्य कर्णमलादुद्भूतयोर्मधुकैटभयोर्भीत: अभवम्। पश्चात्तदनन्तरं तव बलात् विष्णुमायायास्तव कृपाबलेन मधुकैटभयोर्नाशं संपाद्याधुना अभीतोऽस्मि निर्भयोऽस्मि। त्र्यक्षेण रुद्रेण त्रिमुखीकृतोऽपि त्रीणि मुखानि अस्येति त्रिमुख: अत्रिमुख: त्रिमुखसंपद्यमान: कृत: त्रिमुखीकृत: तथाऽपि तवैव स्तवै: त्वत्स्तुतिवचनोच्चारणेन चतुरास्योऽहं चतुर्मुख: पुनस्सञ्जात:। अथवा चतुरमास्यं यस्य स: सुवदनोऽहं सञ्जात:। तवैव स्तवनरूपाणां चतुर्णां वेदानामुच्चारणेन चतुरास्य: समभवम्। त्वं विश्वात्मकतया उपजन्य विश्वाकारेण परिणम्य पुनर्मां न स्रष्टारमाख्याहि सकलचराचरस्वरूपिण्यां भवत्यां सत्यां कोऽहं जगत्स्रष्टृत्वाभिमानार्ह: ? अत: मां जगत्स्रष्टेति मा आख्याहि। इत्थं वाणीपतेर्वाणयो जयन्ति ॥

(७०)

आशीरस्ति मुखे विडम्बयति मां भूयोऽपि चाशीस्पृहा
भोगास्सन्ति सहस्रधा पुनरहं भोगान् कथं प्रार्थये।
शेषोऽहं स्पृहयाम्यशेषसुखमित्येतच्च हासास्पदम्
नाथे चिन्तय सर्वमित्यहिपतेस्त्वत्पादपातो जयेत् ॥

अहिपतेर्नागराजस्यानन्तस्य त्वत्पादपातः तव पदयोर्नतिः जयेत्। मे मम मुखे आशीरस्ति आशंसा अस्ति अथवा विषदन्तास्सन्ति। भूयोऽपि चाशीस्पृहा पुनरपि त्वदाशिस्सु स्पृहा मां विडम्बयति परिहासपात्रतां नयति। प्राप्तस्य पुनः प्रेप्सा हास्याय भवति। सहस्रधा भोगाः सहस्रशः सुखानुभवाः अथवा सहस्रसंख्याका भोगाः फणाः पूर्वमेव मयि सन्ति। कथं पुनरहं भोगान् प्रार्थये भवत्या पुरतः भोगान् देहीति कथं प्रार्थये। अहं शेषः नाम्ना शेषः अशेषसुखं स्पृहयामि समस्तविधसुखानि वाञ्छामीत्येतच्च हासास्पदम्। यानि सुखानि शेषयोग्यानि न सन्ति तेषामप्याशां शेषोऽहं यदि व्रहेय तर्हि परिहसितो भवेयम्। शेषस्याशेषसुखप्राप्तिरिति विरोधः। हे नाथे! सर्वमेतत् चिन्तय। नाहं किञ्चिदर्थितुमपि योग्यः। अतः न जाने किं भवत्या वृणोमीति। अतस्त्वमेव सर्वं विचार्य यन्मे श्रेयस्करं तत्कुरु इति त्वत्पदप्रणतयः अहिपतेर्जयन्ति॥

(७१)

पार्वत्याः पदमत्र दृश्यमिति वा पादे भवत्वेन वा
साधुत्वात्तदुपास्तये हिततया पद्यान्यमूनि स्फुटम्।
सैषा मुक्तिपुरीगिरीन्द्रतनयाभक्तेन नारायणे-
नाबद्धा खलु सप्ततिर्दिशतु वः कल्याणहल्लोहलम्।

इति नारायणभट्टपादविरचिता श्रीपादसप्ततिस्समाप्ता॥

अत्र पार्वत्याः पदं दृश्यमिति वा अर्थादस्मिन् स्तोत्रे सर्वत्र भगवत्याः पदकमलं वर्णनाविषयत्वेन प्रतिभातीति हेतोः अथवा पादे भवत्वेन वा देव्याः पादाब्जमधिकृत्य प्रवृत्तमिति वा; पादप्राप्तये उपकुर्वतीति वा; तदुपास्तये देव्याश्चरणोपासनाय हिततया हितकरत्वात्सम्यगुपकरोतीति वा हेतोः अमूनि पद्यानि स्फुटं चकासति। श्रीपादसप्ततिरिति नाम्ना आबद्धा मुक्तिपुरीस्थायाः

गिरीन्द्रतनयायाः मुक्तिस्थलक्षेत्रमधिवसन्त्याः पार्वत्याः भक्तेन नारायणभट्टपादेन मेल्पत्तूरनारायणाख्येन भट्टपादकविना आवद्धा निबद्धा सैषा स्तुतिः वः पठतां शृण्वतां च कल्याणहल्लोहलं मङ्गलपरम्परामहमहमिकया कल्याणानां प्राप्तिं दिशतु वितनोतु ॥

इति श्रीरामकृष्णकार्यकारतनूजेन कार्यकारोपाह्वेन स्वामिनाथशर्मणा विरचितः श्रीपादपरागस्समाप्तः ॥

॥ शम् ॥

अहं स्वतन्त्रता भणामि

(डा० रमाकान्त शुक्लः)

अहं स्वतन्त्रता भणामि मद्वचो निशम्यताम् ।
निधाय मानसे च तद् यथोचितं विधीयताम् ।।
अहं स्वतन्त्रता भणामि……।

(१)

मदर्चनाकृते शिरांस्युपायनीकृतानि यैः,
धनं वपुस्तथा मनः सहर्षमर्पितानि यैः ।
अवापुरात्मवक्षसि ज्वलद्भुशुण्डिगोलिकाः,
गता त एव मे जनाः सदैव वन्दनीयताम् ।।
अहं स्वतन्त्रता भणामि……।।

(२)

भवद्भिरद्य दृश्यते यथार्थिकी समुन्नतिः,
भवद्भिरद्य दृश्यते नवा च या विनिर्मितिः ।
भवद्भिरद्य यः स्वतन्त्रतारसो निपीयते,
तदेतदात्मजीवने चिरं चिराय धार्यताम् ।।
अहं स्वतन्त्रता भणामि……।।

(३)

शुभा हि कामनाः भवत्कृते समर्पयाम्यहम्,
समुन्नतिः सुखं च वः सदैव चिन्तयाम्यहम् ।
परन्तु वर्तमानया विचित्रकाललीलया,
मनाग् विचिन्तिता यदेव वच्मि तन्निशम्यताम् ।।
अहं स्वतन्त्रता भणामि……।।

(४)

मया न कल्पितं कदापि दुर्बलाभिशोषणम्,
मया न कल्पितं कदापि दुर्जनाभिपोषणम् ।
मया न कल्पितं कदापि सज्जनावमाननम्,
सहेऽखिलं च तद्, यथा सहे न, तद्विधीयताम् ॥
अहं स्वतन्त्रता भणामि……॥

(५)

विलोकयामि वृत्तिहीनतामहं यदा यदा,
विलोकयामि नीतिहीनतामहं यदा यदा,
नतानना गतासुका भवाम्यहं तदा तदा ।
इयं दशा न मेऽस्तु येन, तत्सदा विधीयताम् ॥
अहं स्वतन्त्रता भणामि……॥

(६)

यदा यदा श्रृणोम्यहं वधूविदाहपातकम्,
यदा यदा श्रृणोम्यहं बलात्कृतिं विहिंसनम्,
तदा तदा भवाम्यरुन्तुदव्यथाप्रपीडिता ।
इयं व्यथा प्रणाशमेतु येन, तद्विधीयताम् ॥
अहं स्वतन्त्रता भणामि……॥

(७)

क्वचिद्विलाससाधनैर्विमण्डिता विलासिनः,
क्वचित्क्षुधाप्रपोडिता वसन्ति देशवासिनः ।
क्वचित्पयस्विनी धनस्य कुत्रचिच्च निःस्वता,
इयं दशा विलोपमेतु येन तद्विधीयताम् ॥
अहं स्वतन्त्रता भणामि……।

(८)

स्वदेशवासिभिः स्वदेशवासिनां विहिंसनम्;
पृथक्त्वभावपोषणं स्वदेशदेहदारणम् ।
अधीतिपण्यविक्रयं करप्रदातृनिःस्वतां,
विलोक्य यां शुचं गतास्मि, सा द्रुतं विलोप्यताम् ॥
अहं स्वतन्त्रता भणामि……॥

(९)

दलाद् दले पलायनं, प्रवञ्चनां क्षणे क्षणे,
प्रतारणं जने जने, विहिंसनं पणे पणे।
विलोक्य रोगदायकं विमिश्रणं कणे कणे,
गतास्मि यां शुचं हि, सा द्रुतं द्रुतं विलोप्यताम् ॥
अहं स्वतन्त्रता भणामि……॥

(१०)

अयोग्यता पदोन्नता, सुयोग्यता पदच्युता,
अमोघलाभकारिणी मता च चाटुकारिता।
इयं दशा स्वभारतस्य चेत्तदा मम स्थितिः
सुपुष्टतां भजेत्कथं ? भवद्भिरेव कथ्यताम् ॥
अहं स्वतन्त्रता भणामि……॥

(११)

अहं स्मरामि कष्टपद्धतिं पुरानृणां यदा,
अहं भवामि गद्गदाभिमानसंयुता तदा।
विलोक्य किन्तु वर्तमाननेतृलाभकांक्षितां
व्रजान्यहं मुदं ह्यथो शुचं ? स्वयं विचार्यताम् ॥
अहं स्वतन्त्रता भणामि……॥

(१२)

जलं न लभ्यते तथा, यथा सुरा पदे-पदे,
वचांसि सन्ति भूरिशो, न हि क्रियाः पदे पदे ।
पुनश्च भेदभावना प्रवर्त्यते पदे-पदे
इयं दशा समर्थनं किमर्हतीति चिन्त्यताम् ।।
अहं स्वतन्त्रता भणामि······।।

(१३)

धनस्य नास्ति कृच्छ्रता प्रभारते हि भारते,
श्रमस्य नास्ति कृच्छ्रता प्रभारते हि भारते ।
उदेति या यदा-कदा तथापि बुद्धिहीनता,
न सा कदाप्युदेतु येन, तत्सदा विधीयताम् ।।
अहं स्वतन्त्रता भणामि······।

(१४)

न निर्धनो न निर्बलो जनोऽत्र कोऽपि जायताम्,
न कस्यचित्समादरो विखण्डितश्च जायताम् ।
निजावलम्बनं जने जने सदा प्रवर्धताम्,
जनो जनोऽस्य भारतस्य मोदतां प्रमोदताम् ।।
अहं स्वतन्त्रता भणामि······।

(रचनातिथिः १५-८-१९८३)

देववाणी-परिषद्वार्ता

(१) डा० मण्डनमिश्रमहाभागः राष्ट्रपतिना सम्मानितः

१५-८-१९८३ तारिकायां डा० मण्डनमिश्र महाभागः संस्कृतस्योत्कृष्ट-सेवार्थं भारतस्य राष्ट्रपतिना सम्मानितः। दिल्ल्यां श्रीलालबहादुरशास्त्रि-केन्द्रीयसंस्कृतविद्यापीठस्य स्थापनायां डा० मिश्रमहाभागस्य ये सत्प्रयत्नाः कारणतां गताः, न ते कस्यापि अगोचराः। विगतत्रिशंद्वर्षेभ्यो डा० मण्डन मिश्रमहाभागः सुरभारत्याः नैकविधां सपर्यामाचरति। अस्मिन् महानुभावे वैदुष्यस्य, प्रशासनपाटवस्य, विनयस्य चाद्भुतो योगो दर्शनीयः। देववाणी-परिषदः समस्तेषु कार्यकलापेषु डा० मिश्रमहाभागस्य सर्वात्मना सहयोगः तस्याः प्राणप्रोषकस्तिष्ठति। परिषद आजीवनसदस्यस्यास्य सम्मानेन देववाणी-परिषत्परिवारः परमं हर्षमनुविन्दति वर्धापयति चैनं सुरभारतीसेवासमर्पिता-त्मानं विद्याविनयसंघातम्।

पुनश्चाद्यत्वे डा० मिश्रमहाभागः राष्ट्रियसंस्कृतसंस्थानस्य निदेशक-पदमप्यलङ्करोतीत्यपरः प्रमोदविषयः। आशास्महे यदस्य निदेशैः संस्थानं स्फूर्तिमत्तरं भविष्यति।

डा० मिश्र उक्तसम्मानद्वयलाभार्थं देशस्य विविधाभिः संस्थाभिरभि-नन्दितः।

(२) देववाणी-परिषदोऽष्टमसङ्कल्पनादिवसः

देववाणी-परिषदोऽष्टमः सङ्कल्पनादिवससमारोहः २१-८-१९८३ तारिकायाम् दिल्लीविश्वविद्यालयस्य 'टैगोर'-सभाभवने सम्मानितोऽभूत्।

अस्मिन्नवसरे मुख्यातिथिना भारतसर्वकारस्य उपशिक्षामन्त्रिणा श्री पी० के० थुंगनमहाभागेन परिषत्प्रकाशितानां 'स्फूर्तिसप्तशती'-पूर्णकुम्भ'-'साहित्य-कौतुका'ख्यानां त्रयाणां संस्कृतग्रन्थानां समुन्मीलनं (विमोचनं) कृतम्। शिक्षामन्त्रालये उपशिक्षापरामर्शदातृपदमलङ्कुर्वता (संस्कृते) डा० सी०आर० स्वामिनाथमहाभागेन समुन्मीलितग्रन्थानां प्रथमप्रतिरूपाणि स्वीकृतानि। उभाभ्यामप्येताभ्यां स्फूर्तिसप्तशतीकारस्य डा० शिवदत्तशर्मचतुर्वेदस्य (अनुपस्थितस्य), पूर्णकुम्भप्रणेतुः पण्डितविष्णुकान्तशुक्लस्य साहित्यकौतुक-रचयितुः पं० टी० वी० परमेश्वर अय्यरस्य च सर्वधर्षापनमभिनन्दनं कृतम्। श्रीथुंगनमहाभागेन संस्कृतस्य नूतनरचनानां प्रकाशनार्थं देववाणी-परिषद् वर्धापिता।

अस्मिन्नवसरे उपशिक्षामहोदयेन अखिलभारतीयं संस्कृतकविसम्मेलनम् अपि समुद्घाटितम्। अस्य कविसम्मेलनस्य अध्यक्षता भारतसर्वकारशिक्षा-संस्कृतिमन्त्रालये संयुक्तपरामर्शदातृपदमलंकुर्वता डा० रामकरणशर्ममहाभागेन कृता। सम्मेलनेऽस्मिन् डा० रामकरणशर्मा, डा० सी० आर० स्वामिनाथः, डा० नलिनी शुक्ला (कानपुरतः), श्री परमेश्वर नम्पूतिरिः (दिल्लीतः), श्री वी० स्वामिनाथ आत्रेयः (तञ्जौरतः), श्री श्रीभाष्यम् विजयसारथिः (हैदराबादतः), पं० कमलापति मिश्रः (लखनऊतः), डा० उमाकान्त शुक्लः (मुज़फ़्फ़रनगरतः), डा० महावीरः (दिल्लीतः), डा० रुद्रदेव त्रिपाठी (जयपुरतः), पं० विष्णुकान्तशुक्लः (सहारनपुरतः), प० वसन्त अनन्त गाडगीलः (पुणेतः), डा० वासुदेवकृष्णचतुर्वेदः (मथुरातः), शिशुः अभिनवशुक्लः (दिल्लीतः), डा० रहसबिहारी द्विवेदी (जबलपुरतः), श्री ओमप्रकाश त्रिवेदी (वरहनतः), डा० सत्यपाल नारङ्गः (दिल्लीतः), कवि-रत्नश्रीकृष्णसेमवालः (दिल्लीतः), डा० रमेशकुमार लौ (मुज़फ़्फ़रनगरतः), डा० सुधाकराचार्य त्रिपाठी (मेरठतः), पं० टी० वी० परमेश्वर अय्यरः

अग्रे दीयमानस्य चित्रस्य परिचयः

(१) डा० सी० आर० स्वामिनाथः कवितां पठति। (२) अखिल-भारतीयसंस्कृतकविसम्मेलने मञ्चस्थाः केचन कवयः (वामतो दक्षिणम्) डा० कृष्णकान्त शुक्लः, पं० कमलापति मिश्रः, आचार्य रमेशचन्द्र शुक्लः (परिषदध्यक्षः) डा० रामकरणशर्मा (कविसम्मेलनस्याध्यक्षः) डा० रमाकान्त शुक्लः (सम्मेलनसञ्चालकः देववाणीपरिषन्महासचिवश्च) पं० रघुनाथ प्रसादश्चतुर्वेदः, श्री ओमप्रकाश ठाकुरः, श्री ओमप्रकाश त्रिवेदी च। (३) परिषन्महासचिवः डा० रमाकान्त शुक्लः कवीन् अतिथींश्चाभिनन्दयति (४) मुख्यातिथिश्रीपी०के०थुंगनमहाभागः ग्रन्थविमोचनानन्तरं 'पूर्णकुम्भ'स्य प्रतिरूपं लेखकाय पं० विष्णुकान्तशुक्लाय समर्पयति। (५) कविसम्मेलने मञ्चस्थाः केचन कवयः (वामतो दक्षिणम्) कविरत्नश्रीकृष्णसेमवालः, डा० सुधाकराचार्य त्रिपाठी, डा० आशाराम त्रिपाठी, डा० रहसबिहारी द्विवेदी, डा० नलिनी शुक्ला च। (६) श्री पी० के० थुंगनमहाभागः ग्रन्थ-विमोचनानन्तरं 'साहित्यकौतुक'स्य प्रतिरूपं ग्रन्थकर्त्रे श्री टी० वी० परमेश्वर अय्यरमहाभागाय समर्पयति। मध्ये तिष्ठति प्रथमप्रतिरूप (copy) प्राप्त-कर्ता डा० सी० आर० स्वामिनाथन्।

1


2
देववाणी - परिषद्, दिल्ली
अष्टमसङ्कल्पनादिवस - समारोहः
२१ - ८ - १९८३
अखिल भारतीय संस्कृत कवि सम्मेलनम्


3


4


5

(दिल्लीतः), डा० आशाराम त्रिपाठी (लखनऊतः), श्री ओमप्रकाश ठाकुरः (दिल्लीतः), पं० रघुनाथप्रसाद चतुर्वेदः (मथुरातः), डा० कृष्णकान्त शुक्लः (बरेलीतः), डा० रमाकान्तशुक्लश्च (दिल्लीतः) स्व रचना अपठन्। कविसम्मेलनस्य सञ्चालनं डा० रमाकान्त शुक्लः कृतवान्।

अस्मिन्नवसरे मुख्यातिथिना श्री पी० के० थुंगनमहाभागेन प्रदत्तमभिभाषणं संस्कृतानुवादेन साकं ३२३-३२६ पृष्ठेषु दीयते। संस्कृतानुवादोऽयं परिषन्महासचिवेन डा० रमाकान्तशुक्लेन पठित आसीत्।

साहित्यसङ्गमेन देववाणीपरिषत्सदस्यौ सम्मानितौ

दिल्ल्याः 'साहित्यसङ्गम' नाम्न्या साहित्यिकसंस्थया १८.६.१६८३ तारिकायां ये षट् शिक्षकसाहित्यकाराः सम्मानितास्तेषु द्वौ देववाणी-परिषत्सदस्यौ स्तः। सुविख्यातहिन्दीनाट्यसमालोचक डा० दशरथ ओझा महाभागस्य मुख्यातिथित्वे समायोजितेऽस्मिन् समारोहे संस्थासचिवेन डा० सुन्दरलालकथूरियामहाभागेन देववाणी-परिषत्सदस्यौ डा० रमाकान्त शुक्ल-डा० सुलेखचन्द्रशर्माणौ साहित्यसेवार्थं प्रशस्तिपत्रेण ग्रन्थोपहारेण च सम्मानितौ। डा० शुक्लो 'हिन्दी-संस्कृत-सेतु'रूपेण डा० शर्मा च 'समीक्षक' रूपेण सम्मानितावभूताम्।

मोदीनगरे देववाणी-परिषदः शाखा

देववाणी-परिषदो विधानमनुसृत्य २१-८-१६८३ तारिकायां मोदीनगरे अस्याः शाखा गठिता। इयं शाखा परिषद उद्देश्यानुसारं केन्द्रीयकार्यालयस्य निर्देशानुसारं च विविध कार्यकलापान् समनुष्ठास्यति। अस्याः शाखाया वर्तमान-कार्यकारिणी इत्थमस्ति :— अध्यक्षः-श्री शिवदत्तशर्मा शास्त्री, उपाध्यक्षः श्री सत्यप्रकाश शर्मा, सचिवः डा० महेशचन्द्र शर्मा, कोषाध्यक्षा-श्रीमती सौभाग्यवती वार्ष्णेय, प्रचारमन्त्री डा० राजेन्द्रसिंह शास्त्री, सदस्याः श्री हरिदत्त गौतमः, श्री सुरेश चौहानः, डा० मनोरंजन ज्योतिषी, संयोजकः डा० वीरेन्द्र कौशिकः।

संस्कृतवार्तालापप्रशिक्षणम्

दिल्ल्याः 'संस्कृत-सेवा-संस्थानम्' अगस्तमासतो देववाणी-परिषत्सहयोगेन वाणी-विहारे संस्कृतवार्तालापप्रशिक्षणकार्यक्रमं चालयति। अस्मिन् कार्यक्रमे वाणी-विहारस्य 'गुडविल चिल्ड्रन पब्लिक स्कूलस्य' शिशवः स्थानीयाश्च नैके बालकाः निःशुल्कं संस्कृतं शिक्षन्ते। संस्कृतसेवासंस्थानेनै-

तदर्थं नियुक्ता श्रीमती वीणा बंसलमहाभागा अद्यत्वे शिशून् संस्कृतवार्तालापं शिक्षयति । कार्यक्रमोऽयं वर्षं यावत्प्रचलिष्यति ।

'अर्वाचीनसंस्कृतसाहित्यस्य सर्वेक्षणस्यावश्यकता तदर्थमुपयुक्ता उपायाश्चे'ति विषये विचारगोष्ठी

परिषदस्तत्त्वावधाने उक्तविषयमवलम्ब्य १९-६-१९८३ तारिकायाम् 'आर ६ वाणी-विहार, नयी दिल्ली-११००५९' इति स्थाने विचारगोष्ठी समायोजिताभूत् यत्र मुज़फ्फ़रनगरस्थसनातनधर्मस्नातकोत्तरकालेजस्य संस्कृतविभागप्राध्यापकैः डा० रमेशकुमार लौ - श्री उमाकान्त शुक्ल - डा० सुषमा अरोड़ा-डा० जयकुमार जैन-महाभागैः स्व विचाराः प्रकटिताः । विचारगोष्ठ्या आध्यक्षमाचार्यरमेशचन्द्रशुक्लैः विषयप्रवर्तनं च डा० रमाकान्तशुक्लेन कृतम् ।

'संस्कृतसाहित्ये गान्धि-शास्त्रिणौ' इति विषये पत्रपाठगोष्ठी

परिषदस्तत्त्वावधाने २-१०-१९८३ तारिकायां डा० रमाकान्तशुक्लेन 'संस्कृतसाहित्ये गान्धिशास्त्रिणौ' इति विषयमवलम्ब्य शोधपत्रं पठितम् । पञ्चविंशतिप्राया गान्धि-शास्त्रिपरकाः संस्कृतरचना उल्लिखन् डा० शुक्लः प्रत्यपीपदत् यदेतासु कृतिषु अनयोर्महापुरुषयोः संकीर्तनव्याजेन संस्कृतरचनाकारैः सत्याहिंसादेशभक्तिविनयसाहसदृढव्रतताद्युदात्तगुणान् प्रति स्वकीया आस्था प्रकटिता । अस्याः गोष्ठ्या अध्यक्षता परिषदध्यक्षैराचार्यरमेशचन्द्रशुक्लैः कृता ।

विंशशताब्दीयसंस्कृतसाहित्यकोशनिर्माणोपायेषु विचारगोष्ठी

१२-१०-१९८३ ई० तारिकायां देववाणीपरिषदस्तत्त्वावधाने 'आर ६ वाणी-विहार, नयी दिल्ली-११००५९' इति स्थाने 'विंशशताब्दीयसंस्कृतसाहित्यकोशनिर्माणार्थमुपयुक्ता उपायाः' इति विषयमवलम्ब्य एका विचारगोष्ठी समायोज्यत । स्मरणीयं विद्यते यत् ३०-१०-१९७७ तारिकायां परिषत्कार्यसमित्या विंशशताब्दीयसंस्कृतसाहित्यकोशस्य सम्पादनं स्वलक्ष्यत्वेन सङ्कल्पितमासीत् । ततः प्रभृति यथाशक्ति यथावसरञ्चास्यां दिशि प्रयत्यते ।

अस्यां विचारगोष्ठ्यां विद्वद्भिरनुभूतं यत् १९९८ यावदस्य कोशस्य २०,००० प्रविष्टयः अकारादिक्रमेण संयोजनीयाः । तत ऊर्ध्वं द्वयोर्वर्षयोरन्तराले प्रकाशितानां रचितानां वा रचनानां विषये यथाकालं तत्र

सूचना निवेशनीया । २००० तमेशवीयाब्दसमाप्तरुत्तरं द्रुतगत्या अस्य प्रकाशनं क्रियेत । २००१ तमेशवीयेऽब्दे पञ्चसहस्रपृष्ठात्मकस्य चास्य कोशस्य प्रकाशनं पूर्णं स्यात् । इदं हि कार्यं नूनं महत्त्वपूर्णं भविष्यति ।

अस्मिन्ननुष्ठाने विविधसंस्कृतसंस्थानानां, शोधकर्तॄणां, सम्पादकानां लेखकानां, पुस्तकालयाध्यक्षाणां, प्रकाशकानां, विश्वविद्यालयानां, शोधनिर्देशकानां, स्थाने स्थाने स्थापितानां देववाणीपरिषच्छाखानामवैतनिकसदस्यानां, सवेतनकर्मचारिणाञ्च सहयोगोऽपेक्ष्यते । पुनश्च प्रभूतधनराशिरपि अपेक्ष्यते । सर्वेक्षकाः, लेखकाः, लिपिकाः नियोक्तव्याः सन्ति । एतदर्थं भारतसर्वकारस्य, यूनेस्को-प्रभृतिसंस्थानां, देशविदेशस्थितानां संस्कृतानुरागिणां दानिनां च सहयोगो मार्गयितव्यः । श्री-सरस्वत्योः सङ्गतेनैवास्मिन् कर्मणि सिद्धिर्मता विद्वद्भिः ।

अस्याः विचारगोष्ठ्या आध्यक्ष्यं गुरुवायूरकेन्द्रीयसंस्कृतविद्यापीठप्राचार्येण डा० चक्रधरविजल्वानमहाभागेन कृतम् । विचारप्रदातृषु परिषदध्यक्षडा०रमेशचन्द्रशुक्ल - परिषन्महासचिव डा० रमाकान्तशुक्ल-डा० सातकडि मुखोपाध्याय डा० सुन्दरलाल कथूरिया-श्री मणिभाई प्रजापतिप्रभृतय आसन् ।

(प्रस्तोत्री—रमा शुक्ला)

पुस्तक-समीक्षा

(१) **संस्कृत-शिशु-गीतम्** (२) **संस्कृति-सुधा** लेखकः डा० सुभाष वेदालङ्कारः । प्रका० अलङ्कार प्रकाशन जयपुर-३०२००४ । (३) **संस्कृत-गीताञ्जलिः** ले० पूर्वोक्तः । प्रका० मनीषा प्रकाशन, जयपुर । १९८२ ।

संस्कृत-शिशुगीतस्य रचना डा० सुभाषवेदालङ्कारेण उद्देश्यचतुष्टयपूरणार्थं कृता तद्यथा—मनोरञ्जनम्, संस्कृतशिक्षणं, संस्कृते रुचिवर्धनम्, नैतिकशिक्षा-लोकव्यवहार-राष्ट्रभक्तिभावनासञ्चारश्चेति । शिशूनां कृते रचितान्येतानि गीतानि भारतीयसंस्कृतेः प्रायः समस्ताः विशेषताः समुद्घाटयन्ति । 'संस्कृतगीताञ्जलिः' लेखकस्य राष्ट्रभक्तिभावभारितानां गीतानां संग्रहः । एतानि गीतानि कैसेटाङ्कितान्यपि सन्तीति प्राक्कथेन ज्ञायते ।

'संस्कृत-सुधा' भारतीयसंस्कृतेस्तत्त्वानि पद्यरूपेणोपस्थापयति ।

गीतानां शैली शिशुजनोपयोगिनी वर्तते । 'शब्द-गीत-क्रिया-गीता'दि माध्यमेन ग्रन्थकर्ता शिशुरुचिकारिणीं सामग्रीं प्रस्तौति, यथा—

'चटका ब्रूते चू चूं चूं ।
वदति कुक्कुट : कुकडूंकूं ॥''

डा० सुभाष वेदालङ्कार: शिशूनां कृते साहित्यसर्जनायाभिनन्द्यते किन्तु स यदैतेषां पुस्तकानामग्रिमं संस्करणं सम्पादयेत्तर्हि ह्रस्व-दीर्घ-विचारदृशा पुनरपि गीतानि परिशोधयितुं प्रार्थ्यते। संस्कृते हि एकारौकारयोर्ह्रस्वता न प्रचलिता यथा अपभ्रंशे, हिन्द्याम्, उर्दूभाषायां वा। अत: संस्कृते एतादृशा: प्रयोगा न आदर्शभूता:, यथा—

'चल रे शूरवीर चल' (सं०शि० गी०/१४)
अत्र 'रे' कारस्य एकमात्रयोच्चारणं भवति ।

एवमेव क्वचिदपदान्तगानामपि ह्रस्वस्वराणां दीर्घता दृश्यते; यथा अधोदत्तेषु स्थलेषु :—

(१) 'काको वदति का का का
बालो हसति हा हा हा ॥ (सं० शि० गी०/१)
(२) दुग्धेन भवति नवीतम्
तेन शरीरं हृष्टं पुष्टम् । (सं० शि० गी०/२)
(३) शिवं करोति सा वै पातु: (सं० शि० गी०/३)
(४) कृष्ण: धर्मं चरति चरति ।
कृष्ण: कंसं तपति तपति ॥ (सं० शि० गी०/१५)

क्वचिदपाणिनीया प्रयोगा अपि दृश्यन्ते, यथा—

''मातृभूमे नमो मातृभूमे नमो
देवभूमे नमो देवभूमे नमो। मातृभूमे······
ते ऋषिभ्यो नमस्ते गुरुभ्यो नम:।
ते जनेभ्यो नमस्ते वलिभ्यो नम: ॥ (सं० गीताञ्जलि:/३)

अत्र 'मातृभूमे' इति सम्बुद्धिपदप्रयोगे 'तुभ्यम्' इत्यस्य अध्याहार: कर्तव्य: स्यात् अन्यथा 'मातृभूम्यै' इत्येव कर्तव्यं स्यात् पुनश्च पादान्ते पूर्णविरामात्पूर्वं 'नमो' इति प्रयोगश्चिन्त्य:। पादादौ च 'तुभ्यम्' इत्यस्य स्थाने 'ते' इति पदं चिन्त्यम् ।

शिशव: शुद्धानि गीतानि प्राप्नुयुरित्यर्थमवश्यमेव लेखकेन, गीतानां गायकै: प्रशिक्षकैश्च सावहितैर्भाव्यम् । (र०का०शु०)

'देववाणी-परिषद्, दिल्ली'—अष्टमसङ्कल्पनादिवसमुपलक्ष्य २१-८-१९८३ तारिकायां समायोजिते अखिल-भारतीयसंस्कृतकविसम्मेलने ग्रन्थविमोचन-समारोहे च मुख्यातिथेर्भारतसर्वकारस्य उपशिक्षामन्त्रिणः श्री पी०के० थुंगन महाभागस्यसंस्कृतानुवादमभिभाषणम्

Friends,

I am thankful to the authorities of the Devavani Parishad for having invited me to inaugurate the Kavi Sammelan and release the publications brought out by the Parishad. Though I am not a Sanskrit scholar, much less a Poet, I have great regard for this Devine language and had occasions to acquaint myself with the thoughts of Sanskrit poets of the past. It is very reassuring that we have such a large number of poets in Sanskrit even today and also scholars who can make their original contribution to Sanskrit literature. It proves that Sanskrit language is not only very much alive but is vibrating with vitality and creativity comparable to any other living modern language of the world. It can be truly said about Sanskrit what Shakespeare said about Cleopatra—"Age doth not wither nor custom stail her infinite variety." I am also reminded of a prophetic statemene that has been made in the Ramayana about Itself—"So long as the mountains and the rivers exist on this earth, thc story of Rama will remain." It shows that the author who wrote this verse was so sure of the eternal relevance and undying vitality of Indian Culture and Sanskrit language. Even our religious beliefs have undergone a lot of change from time to time, our social behaviour has undergone several changes; our political system has also been getting modified from time to time. All these are partly due to the evolution of Indian mind, partly due to the influence of foreign contacts and also because of the post Independence conciousness of self-reliance, self-respect and freedom of thought. These influences both external and internal have not affected the core of our culture nor have they seriously changed the value system which has been traditionally accepted by Indians; a value system which gives equal importance to the four-fold human objectives, namely, Dharma, Artha, Kama and Moksha. This consistency in cultural core and value system has been mainly due to the continuity of Sanskrit language and literature.

One may ask how Sanskrit could maintain its hold on the cultural life of India· The answer to it, according to me is, that the Sanskrit language with its roots in the deepest past has never refused to absorb, assimilate and own new ideas from whichever quarter they may come. That is why it is at the same time both a classical language and a living medium of expression· Other classical languages like Greek or Roman have become dead because they refused to absorb new ideas.

I am very happy to note that the Ministry of Education, Government of India has been able to encourage creative activities in Sanskrit by helping organisations like the Deva Vani Parishad. I am also impressed by the good work that the Parishad has been doing by organising Kavi Sammelans, debates, dramas and symposia. I am told that one of the most important programmes of the Parishad is to bring out the original poetic and litrary compositions of contemporay writers. It is a bold step that the Parishad is taking and we should congratulate it for the same·

Just as Sanskrit education is not attracting large number of students due to the fear that it may not fetch a decent livelihood; Sanskrit writers also do not get publishers ready to publish their works due to the fear that it may not have a market. But the Deva Vani Parishad has shown during the short period of six or seven years that it could undertake the publication of 32 volumes of modern writers in Sanskrit, and still maintains its solvancy. May be, the commercial publishers who are eagre to get a larger margin of profit are not interested in publishing these works but an organisation committed to the service of Sanskrit and Indian Culture like the Parishad has nothing to regret for having taken up the task of producing new literature in Sanskrit· I am sure more and more young writers will take advantage of the services of the Parishad and bring credit to the language and to themselves.

With these few words I am happy to inaugurate the Poetic Seminar on this evening and also release the three recent publications of the Parishad I congratulate Dr· Siva Datt Chaturvedi, Pt. Vishnu Kant Shukla, and Pt. Parameswar Iyer who have authored these three publications·

I also look forward for more such offerings from them to the Godess of learning. Thank you.

सुहृद्वर्या:

देववाणी-परिषदा प्रकाशितान् ग्रन्थान् समुन्मीलयितुम् अखिलभारतीय-संस्कृतकविसम्मेलनञ्चोद्घाटयितुम् समामन्त्रितोऽहं परिषदोऽधिकारिभ्यो धन्यवादान् व्याहरामि। यद्यपि नाहं संस्कृतविद्वान् न वा संस्कृतकविस्तथापि अस्याः देववाण्याः कृते मम मनसि महीयान् समादरः समुल्लसति । तथा च पुरातनसंस्कृतकवीनां विचाराणां परिचयार्थं मया नैकशोऽवसरो लब्धः। अद्यत्वेऽपि संस्कृतभाषाया अनेकेषां कवीनां समुल्लसत्पंक्तिम् प्रेक्ष्य अतितरां सुखदं समाश्वासनं लभेऽहम् । संस्कृतवाङ्मये एतेषां विदुषां मौलिकं योगदानं नूनं तोषावहम् । अपि चानेन तथ्यमिदं सुतरां सिद्ध्यति यत्सुरभारती साम्प्रतमपि न केवलं जीवति अपि तु जगतः कस्या अपि आधुनिक्याः व्यावहारिकभाषायाः तुलनायां समधिकशक्तिरचनार्धमिता-पुरस्सरं जनमानसे सुविराजते । शेक्सपीयरमहाभागेन क्लियोपेट्रामुद्दिश्य निगदितम् आभाणकमिद संस्कृतविषये अन्वर्थं घटते यत् 'अस्याः चिरन्तनं सौन्दर्यं न वा कालः कवलयितुं क्षमते नापि युगपरम्परा प्रणाशयितुं क्षमते।' अत्राहम् आदिकाव्यनिबद्धां भविष्यद्वाणीमपि सुस्मरामि-

'यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद्रामायणकथा लोकेषु प्रचलिष्यति ।।'

अस्य श्लोकस्य रचयिता नूनं भारतीयसंस्कृतेः सुरभारत्याश्च शाश्वतौचित्यं अनश्वरप्रभावञ्चाधिकृत्य समाश्वस्त आसीत् । अस्मदीया धार्मिकविचार-विश्वासाः युगानुरूपं परिवर्धिताः । आस्माकीनः सामाजिकव्यवहारोऽपि सुबहु परिवर्तितः; सामाजिकपद्धतिरपि काले-काले परिष्कृतिं याति; एतत्सर्वं हि स्वाधीनतावाप्तेरनन्तरमधिगतानामात्मनिर्भरत्व - आत्मगौरव - विचारस्वा-तन्त्र्यादीनाम् वैदेशिकसम्पर्कप्रभावस्य च कारणात् भारतीयजनमानसस्य विकासरूपम् । बाह्याभ्यन्तरीयेण एतेन प्रभावेण अस्माकं संस्कृतिपक्षः कथमपि नैव दुष्प्रभावितः न वा भारतीयैः पारम्परिकतया अङ्गीकृता जीवनपद्धतिः सविशेषम् परिवर्तिता या हि मानवजीवनोद्देश्यभूतान् धर्मार्थकाममोक्षात्मकान् चतुर्विधपुरुषार्थान् समानतया सुप्रतिष्ठापयति । अस्माकम् सांस्कृतिकप्रवाहे जीवनमूल्यपद्धतौ च निरवच्छिन्नं नैरन्तर्यं केवलं संस्कृतभाषायास्तद् वाङ्मयस्य च प्रभावेणैव सुशकमजायत ।

भारतस्य सांस्कृतिकजीवने संस्कृतस्य कियान् खलु अधिकार इति कृत्वा कोऽपि जिज्ञासति चेत् तदा मम तु इदमेवोत्तरम् यत् सुदूरेण अतीतेनापि सम्ब-

द्वैषा भाषा तत्तत्क्षेत्रप्रोद्भूतानां नूतनानां तत्त्वानां ग्रहणे सदैव तत्परा अवर्तत। एकतो भाषा एषा युगपदेव शास्त्रीया व्यावहारिकी च, अपरतश्च ग्रीक-रोमन-सदृश्यः अन्याः शास्त्रीया भाषाः नूतनविचाराणामस्वीकरणात्साम्प्रतं नष्टप्रायाः वर्तन्ते। भारतसर्वकारस्य शिक्षामन्त्रालयः देववाणी-परिषत्सदृशानां विभिन्न-संघटनानां साहाय्यं विधाय संस्कृतक्षेत्रे रचनात्मककार्यकलापान् प्रोत्साहयतीति कृत्वा मोमुद्यते मे चेतः। अहं संस्कृतकविसम्मेलन-वादविवादप्रतियोगिता-नाट्यप्रयोग - संगोष्ठिसमायोजन - प्रभृतीनां कार्यक्रमाणामायोजने तत्परया अनया परिषदा प्रभावितोऽस्मि। अहं सूचितोऽस्मि यत्परिषदोऽति महत्त्वपूर्ण-कार्येषु समकालीनलेखकानां साहित्यिकरचनानां मौलिककाव्यानाञ्च प्रकाशन-मन्यतमम्। एष ह्यतिसाहसिकोपक्रमः यदर्थमस्माभिरेषा परिषद्वर्धापनीया।

संस्कृतशिक्षा नाधिकान् छात्रान् साम्प्रतमाकर्षति यतो हि ते भद्र-जीविकोपार्जने एनामक्षमावगच्छन्ति। संस्कृतलेखका अपि स्वीयविपणि-मूल्यं संकटापन्न विचार्य प्रकाशकानामभावे संस्कृतलेखने नोत्सहन्ते परं देववाणी-परिषद् षट्सु सप्तसु वा वर्षेषु संस्कृते आधुनिकलेखकानां द्वात्रिंशद् ग्रन्थान् प्रकाश्य अनुकरणीयं निदर्शनं प्रतिष्ठापितवती। साम्प्रतमपि इयं स्वलक्ष्यपूरणाय प्रयत्नशीला। कामं प्रभूतार्थलाभोत्सुकाः व्यावसायिकप्रकाशकाः एतेषां ग्रन्थानां प्रकाशने न रुचिमन्तः स्युः किन्तु संस्कृत-भारतीयसंस्कृति-सेवापरायणाया देववाणीपरिषत्सदृक्षायाः संस्थायाः कृते नूतनसाहित्यप्रकाशनानुष्ठाने न मनागपि अनुतापावसरो जागर्ति। आशासे, अधिकाधिकास्तरुणलेखकाः परिषत्सेवाभिर्लाभान्विता भविष्यन्ति देववाण्याः स्वस्य च गौरवं वर्धयिष्यन्ति।

एभिः कतिपयैः शब्दैरद्यायोजितम् अखिलभारतीयसंस्कृतकविसम्मेलनं समुद्घाटयन् परिषदा सद्यःप्रकाशितान् त्रीन् ग्रन्थान् विमोचयँश्चाहं प्रमोद-मनुभवामि। अहमेतेषां ग्रन्थानां लेखकान्—डा० शिवदत्तशर्मचतुर्वेद-पण्डितविष्णुकान्तशुक्ल-पण्डित टी० वी० परमेश्वरअय्यरमहाभागान् वर्धाप-यामि कामये चैतेषामन्याभिः कृतिभिरपि सरस्वत्याः सततसमाराधनम्।

धन्यवादाः!

२१.८.८३ —पी० के० थुंगन

टैगोर हॉल,

दिल्ली विश्वविद्यालयः, दिल्ली-११०००७

अर्वाचीनसंस्कृतम्

(R. No. 34554/79)

(त्रैमासिक पत्रिका)

❀

१. प्रकाशन का स्थान — नयी दिल्ली

२. प्रकाशन की आवधिकता — त्रैमासिक

३. मुद्रक तथा प्रकाशक का नाम,
राष्ट्रीयता तथा पता : डा० रमाकान्त शुक्ल
(देववाणी-परिषद्, दिल्ली-कृते)
भारतीय
६, वाणी-विहार, नयी दिल्ली ११००५९

४. सम्पादक का नाम,
राष्ट्रीयता तथा पता : डा० रमाकान्त शुक्ल
भारतीय
६, वाणी-विहार, नयी दिल्ली ११००५९

५. उन व्यक्तियों के नाम और पता जो इस पत्रिका के मालिक या साझेदार हैं अथवा जो इसकी सारी पूँजी के एक प्रतिशत से अधिक के हिस्सेदार हैं। : देववाणी-परिषद्, दिल्ली
६, वाणी-विहार, नयी दिल्ली ११००५९

मैं डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद्, दिल्ली
प्रकाशक

सूचना

संस्कृताशुलिपि-पुरस्कारः

'देववाणी-परिषद्, दिल्ली' १३-१२-१९८३, ई० तारिकायां ११-०० वादनकाले (पूर्वाह्णे) 'आर ६ वाणी-विहार नयी दिल्ली-११००५९' इति स्थाने 'संस्कृताशु-लिपि-प्रतियोगिता'मायोजयिष्यति । अस्यां प्रतियो-गितायां प्रतियोगिभिः संस्कृतमाध्यमेन भाषमाणानां वक्तॄणां विचारा आशुलिपिबद्धाः कृत्वा तत्कालमेव देव-नागरीलिप्यां टङ्किताः अथवा हस्तेन दीर्घलिपि [Long hand] बद्धा विधाय प्रस्तोतव्याः स्युः । टंकणयन्त्रं लेखनसामग्रीं च प्रतियोगिनः स्वयमेव आनेष्यन्ति । प्रतियोगितायां प्रवेशो निःशुल्कं लप्स्यते । निर्णायकाणां निर्णयः सर्वमान्यो भविष्यति । तदनुसारं प्रथमस्थानभाजः प्रतियोगिनः कृते परिषदा पञ्चसहस्ररूप्यकात्मकः (रु० ५०००-००) पुरस्कारो दास्यते ।

प्रतियोगितायां प्रवेशार्थिभिः प्रतियोगिभिः निम्न-लिखिते संकेते सूचना देया :-

डा० रमाकान्त शुक्लः
महासचिवः
देववाणी-परिषद्, दिल्ली,
आर ६ वाणी विहारः (उत्तमनगर समीपे),
नयी दिल्ली-११००५९

,देववाणी-परिषद्, दिल्ली'—कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंट उत्तमनगर, नई दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६, वाणी-विहार, नयी दिल्ली-११००५९'तः प्रकाशितम्-अर्वाचीनसंस्कृतम्/(४/५) । सम्पादकः डा० रमाकान्त शुक्लः । प्रकाशनतिथिः १५-१२-१९८३ ।